गतम्। तदनन्तरं केन्द्रीय संस्कृतविद्यापीठस्य प्राचार्यवर्यैः ग्रन्थस्यास्य अनुवादाय प्रचोदितोऽहं तदर्थमात्मानं व्यवसायितवान्। तैः प्राचार्यवर्यैः नाम डॉ. मल्लादि दक्षिणामूर्ति बालसुब्रह्मण्यम् महोदयैः ग्रन्थस्यास्य संस्करण-संपादन-मुद्रण-प्रकाशन-कर्मणि बहुमूल्यं सहकार्यं दत्तम्। तदनन्तरम् प्राचार्य-पदमलंकुर्वद्भिः श्रीमद्भिः डॉ. एन्. एस्. रामानुजताताचार्यैः ग्रन्थस्यास्य मुद्रणार्थं भृशं साहाय्यं कृतम्। अधुना तैरेव विद्यापीठस्य कुलगुरुपदं भूषयद्भिः ग्रन्थस्यास्य मुद्रणं प्रकाशनयोग्यं साधितम्। विद्यापीठस्य सर्वाधिकारं तदा तदा भूषयन् मुनित्रयमिदं सममेव धन्यवादार्हम्। तान सर्वान् धन्यवादस्वीकरणाय प्रार्थये।

तदनन्तरं धन्यवादार्हाः तदानींतनाः विद्यापीठे मम सहकारिणः अद्यतनीयाः विद्यापीठस्य कुलसचिवाः, मम सुहृदश्च डॉ. रामचन्द्र अरळी-कट्टीमहाभागाः यैः मह्यं बहुविधं साहाय्यं बहुधा प्रदत्तम्। तथा हि विद्या-पीठस्य विभागाधिकारिणः श्रीनिवासमूर्तिमहाभागाः भृशं धन्यवादार्हाः यैः खलु प्रकाशनकार्येऽस्मिन् तेषां सक्रियं साहाय्यं विहितम्।

अस्य ग्रन्थस्य मुद्रणप्रतेः संसाधनाय, मण्डलाकृतीनां च लेखनाय यैः साहाय्यं प्रदत्तं ते सर्वे धन्यवादार्हाः सन्ति। तेषु विशिष्य निर्देशार्हाः मुंबईस्थ भारतीय प्रौद्योगिक संस्थानस्य प्राध्यापकाः श्रीमन्तः कीर्तित्रिवेदी महाभागाः तथा च मम भ्रातृजा सौ. प्रतिभागोरे, भागिनेयी सौ. सुमिता दाते तथा हि मम भार्या सौ. संजीवनी इत्येताः। मुद्रणार्थं यैः बहुमूल्यं साहाय्यं कृतं ते सत्यसाईमुद्रणालयस्य व्यवस्थापकाः डि. एस् पि. रामकृष्णमहोदयाः तथा च श्रीवेंकटेश्वरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षाः डॉ. एस्. वी. रघुनाथाचार्याः

भूरिधन्यवादार्हा ।। उपरिनिर्दिष्टान् सर्वान् तथा हि उक्तानुक्तान् अन्यानपि सर्वान् उपकर्तृन् धन्यवाद वितरण समये स्मृत्वा विरमामि ।

तिरुपति

युगादि १९१३

खिर १७-३-१९९१

प्रभाकर पांडुरंग आपटे

THE 25 MAṆḌALAS OF POUṢKARA SAṀHITĀ

1. Sarvatobhadram (beneficial)
2. Aghanirmochanam (Solvent of sins)
3. Sadadhvam (One which leads to righteous path)
4. Dharmākhyam (Bestower of merit)
5. Vāsugarbham (Enhancer of prosperity))
6. Sarvakāmapradam (fulfiller of all desires)
7. Amitraghnam (destroyer of enemies)
8. Āyuṣyam (Giver of long-life)
9. Balabhadram (Giver of strength, vigour & prosperity)

14. Mānasam (Creator of pleasing temper)
15. Jayam (Victorious)
16. Svastikākhyam (Auspicious)
17. Anantam (Eternal happiness)
18. Nityam (Eternal contentment)
19. Bhūtāvasam (Conqueror of bhutas)
20. Amoghākhyam (Remover of 'my'ness)
21. Supratiṣṭham (Mental Peace)
22. Buddhyādhāram (Buddhi well-laced in "Brahman")

10. Pausṭikam
(Giver of nourish-ment)

11. Ārogyapradam
(Destroyer of diseases)

12. Vivekākhyam
(Granter of good discriminating power)

13. Vāgīs'am
(Promoter of art of speech)

23. Guṇākaram
(The triad of gunas whither away)

24. Dhruvākhyam
(Bonded being gets one's place)

25. Paramānandam
(the ultimate bliss)

*

TABLE OF CONTENTS

CH. I DISCIPLE'S TEST (vv. 1–54 pp. 1–9)

CH. II SOIL–TESTING (vv. 1-44½ pp. 10-15)

CH. III ORIENTATION (vv. 1-96 pp. 16–29)

Note : Partially Sapplemented from Īs'vara Saṁhitā, 16. 135-36

CH IV CHARACTERISTICS OF PENDAL FOR MANDALA WORSHIP (vv. 1-207 pp. 30-56)

CH. V MANḌALA DIAGRAMS (vv. 343 pp. 57-148)

Note : As the text is obscure· the contents are paraphrased instead of translating them literally.

CH. VII CHARACTERISTICS OF THE COMPOSITE DESIGN (vv. 1–173) (pp 154–158)

S. No.	Topic	Verse No.
1	Design patterns according to petals	1–22
2	Scale and area	23–40
3	Obscure portions	41–173

Note : Since the major part of the chapter is obscure and not suitable for diagramatic reconstruction the said portions are not amenable for coherent translation.

CH. VIII CHAKRABJA-LAKSHANA (vv. 1–212) (pp. 159–169)

S No.	Topic	Verse No.
1	Thousand varities of Chakrabja design	1–7
2	Diagram worship in nine types wheels	8–17
3	Drawing method of lotuses	18–37
4	Procedure of worship	38–43
5	Nine patterns of wheels	44–62
6	Association of wheels with time divisions : months, years etc.	63–80

Note : The remaining part 81 to 212 is obscure and hence not amenable for cohuent translation.

CH. IX (CHARACTERISTICS OF MIXED LOTUS WHEEL DESIGN (vv. 1-165) (pp. 170-190)

CH. X COMPOSITE MANDAL DESIGN OF NINE CONSTITUENTS (vv. 1-9) (pp. 191-199)

CH XI VṚTABIMBALAKṢANA (vv. 1–12) (pp. 00-201)

CH. XII PĀNCAPADMA–CAKRABIMBA-LAKṢANA (vv. 1–28) (pp 202-206)

CH. XIII SŪRYABIMBA LAKṢANA
(vv. 1-13) (pp. 207-208)

CH. XIV CANDRABIMBA LAKṢANA
(vv. 1-16) (pp. 209-210)

CH. XV TRIKONA-BIMBA-LAKṢANA
(vv. 1-35) (pp. 211-215)

CH. XVI KŪRMA-BIMBA-LAKṢANA
(vv. 1–48) (pp 216–218)

CH. XVII S'ANKHA-BIMBA-LAKṢANA
(vv. 1–45) (pp. 219–223)

CH. XVIII KALAS'A-BIMBA-LAKṢANA
(vv. 1–62) (pp. 224–230)

CH. XIX WORSHIP OF NINE NAVEL DIAGRAM
(vv. .-140) (pp. 231-240)

CH. XX WORSHIP OF VISVAKSENA
(vv. 1-121) (pp. 230-266)

CH. XXI CHARACTERISTICS OF RETINUE (deities)
(vv. 1-23) (pp. 267-270)

CH. XXII CHARACTERISTICS OF THE SUPPORT AND THE SEAT (vv. 1–75) (pp 271–280)

CH. XXIII ASSIGNMENT OF SEAT-DEITIES (vv. 1-71) (pp. 281-289)

CH. XXIV CHARACTERISTICS OF DEITIES OF SUPPORTS AND SEATS (vv. 1–57) (pp. 290-297)

CH XXV THE DESCRIPTION OF SUPPORT
(vv. 1-41) (pp. 298-303)

CH. XXVI DETAILS OF THE OFFERINGS
(vv. vv. 1-60) (pp. 04-312)

*

श्री पौष्कर संहिता

अध्यायानुक्रमणी

श्री पौष्कर संहिता

अध्यायान्तर्गत विषयानुक्रमणी

शिष्यपरीक्षालक्षणोनाम प्रथमोऽध्याय : (१-५४)

भूपरीक्षालक्षणोनाम द्वितीयोऽध्यायः (१-४४½)

दिक्सिद्धिलक्षणो नाम तृतीयोऽध्यायः (१-९६)

यागामण्डपलक्षणो नाम चतुर्थोऽध्यायः (१-२०७)

भद्रादिमण्डललक्षणो नाम पञ्चमोऽध्यायः (१-३४३)

पद्मलक्षणो नाम षष्ठोऽध्याय: (१-८५)

व्यूहलक्षणो नाम सप्तमोऽध्याय : (१-१७३)

चक्राब्जलक्षणो नाम अष्टमोऽध्याय: (१–२१२)

मिश्रलक्षणो नाम नवमोऽध्याय। (१-१६५)

विषयनाम	श्लोकसंख्या

नवनाभविधानलक्षणो नाम दशमोऽध्यायः (१-९३)

वृत्तबिम्बलक्षणो नाम एकादशोऽध्यायः (१-१२)

पञ्चपद्मचक्रबिम्बलक्षणो नाम द्वादशोऽध्यायः (१-२८)

सूर्यबिम्बलक्षणो नाम त्रयोदशोऽध्यायः (१-१३)

चन्द्रबिम्बलक्षणो नाम चतुर्दशोऽध्यायः (१-१६)

त्रिकोणबिम्बलक्षणो नाम पञ्चदशोऽध्यायः (१-३५)

कूर्मबिम्बलक्षणो नाम षोडशोऽध्यायः (१-४८)

शङ्खबिम्बलक्षणो नाम सप्तदशोऽध्यायः (१-४६)

नवनाभेकलशोदरलक्षणो नाम अष्टदशोऽध्यायः (१-६२)

नवनाभार्चनो नाम एकोनविंशोऽध्यायः (१-१४०)

विश्वक्सेनार्चनो नाम विंशतितमोऽध्यायः (१–१२१)

परिवारलक्षणो नाम एकविंशोऽध्याय । (१-२३)

आधारासनलक्षणो नाम द्वाविंशोऽध्याय । (१-७५)

आसनदेवतान्यासो नाम त्रयोविंशोऽध्यायः (१–७१)

आधारासनदेवतालक्षणो नाम चतुर्विंशोऽध्यायः (१–५७)

वृत्तिविचारो नाम पञ्चविंशोऽध्यायः (१-४१)

भोगभेदो नाम षड्विंशोऽध्यायः (१-६०)

हरिः ओम्

श्री हयग्रीवाय नमः

श्रीपौष्करसंहिता

प्रथमोऽध्यायः

श्रीभगवान् उवाच[1]]

यदा [2]तीर्णव्रतस्तिष्ठेद् गुरोरग्रे हितैषिणः ।
तदा चाज्ञापयेच्छिष्यं संप्राप्तं कमलोद्भव ॥ १ ॥

[3]तत्तु प्रदापयेत् काले पात्रे गुणगणान्विते ।
[4]यत्तदाज्ञापयेत् तं वै गच्छ पुत्र धनं यतः ॥ २ ॥

यागोपकरणार्थं तु येन शान्तिमवाप्स्यसि ।
यथालब्धं तु तत् पश्चाद् गुरवे विनिवेद्य च ॥ ३ ॥

त्वत्प्रसादेन भगवन्निदं प्राप्तं गृहाण मे ।
दयां[5]कुरु त्वनाथस्य निमग्नस्य भवार्णवे ॥ ४ ॥

एवमादि[6]यदा ब्रूयात् करुणं वाक्यसञ्चयम् ।
प्रवर्तेत तदर्थं तु गुरुर्मण्डलपूजने ॥ ५ ॥

---

1. वक्ता श्रीभगवान् श्रोता च पौष्करः इति श्लो. तः४५–४७ स्पष्टम् । तस्मात् [ ]–मध्ये वक्तृनिर्देशः संपादकीयः ।
2. चीर्णं इति साधु
3. ख–कर्तुं
4. क–यस्य
5. ख–कुरुष्वानाथस्य
6. ख–तया ब्रूयात्

सूत्रयित्वा विधानेन पूरयित्वा[1]रजैश्शुभैः ।
लिखित्वा कुङ्कुमाद्यैर्वा[2]चालिख्य घटि[3]कादिकैः ॥ ६ ॥

भूमौ हेमशलाकाद्यैर्वित्ताभावात् प्रयत्नतः ।
पूजयेत् फलपुष्पाद्यैरारण्यैर्नित्य[4]संभवैः ॥ ७ ॥

पूजितं दर्शयेत्तस्य तं (तत्) तु विद्धि चतुर्विधम् ।
आद्यं[5]पद्मोदराख्यं तु[6] तत्वसंख्योपलक्षितम् । ॥ ८ ॥

अनेककजगर्भं तु द्वितीयं परिकीर्तितम् ।
तदनेकप्रकारं च चक्राब्जं स्यात् तृतीयकम् ॥ ९ ॥

यस्य[7]भेदोऽप्यनेकश्च स खल्वद्याब्जसंभव ।
मिश्रचक्राभिधानं तु मण्डलं बहु[8]भेदयुक् ॥ १० ॥

तच्चतुर्थं समाख्यातं यत्र[9]रुद्ध्वा विमुच्यते ।
महाख्यं नवनाभं तु बिम्बभेदेन यत्[10]स्थितम् । ॥ ११ ॥

---

1. क–ग–रजश्शुभैः
2. क–ग–वालिख्य
3. ख–कार्विभिः
4. ख–नीरसंभवैः
5. ख–पद्मोद्भवाख्यं
6. क–न तु संख्योपलक्षितम्
7. क–भोदोप्यनेकाश्च ग–भेदाप्यनेकाश्च
8. ख–भेदधृक्
9. ख–रुद्धो
10. ख–स्मृतम्

दृष्टेन पूजितेनाथ तथाऽग्नौ कल्पितेन च ।
मोक्षो येन भवत्याशु भक्तानां केवलेन च ॥ १२ ॥

भेदयुक्तेन कालेन दृष्टेनेष्टेन वै क्रमात् ।
द्वादश्यां प्रतिपक्षं तु वत्सरान्ते ततो द्विजम् ॥ १३ ॥

समयी स भवेद्भक्तः पुत्रकश्चापरेण तु ।
दृष्टेन पूजितेनापि ह्यनुध्यातेन वै हृदि ॥ १४ ॥

तथाविधेन कालेन योग्यता तस्य जायते ।
किञ्चारम्भेऽथ निष्पत्तौ पूजनीयं च भक्तितः ॥ १५ ॥

व्यूहद्वयं द्विजाद्यन्तं शेषैः [सांवत्सरैर्दिनैः] ।
एकैकं पूजयेत्पद्मं (? द्मं) यावदब्जं प्रपूज्यते (?प्रपूजयेत्) ॥ १६ ॥

पुत्रकत्वं यदा प्राप्तो जन्तुः प्रक्षीणकल्मषः ।
तदागसि ?द्वयं(? तदागसःक्षये)तस्य प्रवर्तन्ते खि (? फ)लान्यपि ?
॥ १७ ॥

तदाऽसौ साधकत्वेन योक्तव्यो गुरुणा तथा ।
तृतीयमण्डले चेष्ट्वा तत्र तं च प्रवेशयेत् ॥ १८ ॥

पूज्यं तं बहुभिर्भेदैर्ध्यात्वा पूजय (? य्य) गोचरे ।
पञ्चवासरहीनेन पक्षाणां त्रितयेन च ॥ १९ ॥

एकैकं पूजयेच्चक्रं यावदब्जं (ब्दं) प्रपूजयेत् । (?ज्यते) ।
तत्फलानि प्रवर्तन्ते क्रमशस्तस्य वै द्विज ॥ २० ॥

गुरुणा साधकस्यातो दर्शनीयं (? यः) प्रयत्नतः ।
चतुर्थं (?र्थम्) तु[1] महायागो येनाचार्यत्वमाप्नुयात् ॥ २१ ॥

---

1. क—महायोगो

तत्राद्योक्तं तु वै[1]कालमिष्ट्वा वाक्येन चिन्तयेत् ।
द्विज शेषदिनानां तु ह्येकैकं तु समापयेत् ॥ २२ ॥

संवत्सरचतुष्कं तु यस्तु यागेन संयजेत् ।
स संसारार्णवाद् ब्रह्मन् पारं प्राप्नोति दुस्तरात् । ॥ २३ ॥

यद्येकं तु महायागं नवनाभं समुद्यजेत् ।
अस्मिन् संसारकान्तारे ज्ञानदीपास्त्वमी कृताः ॥ २४ ॥

भक्तानां विविधा यागा संयतानां सदैव हि ।
नित्यं विप्रास्तिकानां च श्रद्धा[2]संयमसेविनाम् ॥ २५ ॥

भवार्णवो ह्यलङ्घ्यस्तु विना स्याद्यागतोऽन्यकैः ।
यागपोतं समारोप्य ज्ञेयं पारामिलक्षणम् ॥ २६ ॥

प्रोत्तारयति वै सम्यगुपकारेण वै विना ।
कृपया परयाऽऽविष्टो यो विद्वान् स गुरुः स्मृतः ॥ २७ ॥

ज्ञात्वा भक्तमनाथं च निमग्नं शोकसागरे ।
उद्धरेद्यागहस्तेन स गुरुर्मत्समः स्मृतः ॥ २८ ॥

यागानामपि तीर्थानां क्षेत्राणां सिद्धसेविनाम् ।
पूजितानामर्चितानां पुष्पवस्त्रैश्च भूषणैः ॥ २९ ॥

तथैवायतनानां च आश्रमाणां महामुने ।
वेदगीतध्वनिभिस्तु हूयमाने हुताशने ॥ ३० ॥

सन्दर्शनादकस्माच्च पुंसां संमूढचेतसाम् ।
द्विषतां हेतुदुष्टानां नास्तिकानां सदैव हि ॥ ३१ ॥

---

1. ख—कालमिष्टमवाक्येन
2. क—ग—संयमि

कुवासना कुबुद्धिश्च कुतर्कनैचयश्च यः ।
कुभावश्च कुहेतुश्च नास्तिकत्वं लयं व्रजेत् ॥ ३२ ॥

[1]भाव उत्पद्यते क्षिप्रं तन्मध्ये श्रद्धयाऽन्वितम् (? तः)
तदीयेन प्रभावेन श्रद्धाद्याद्येषु किं पुनः ॥ ३३ ॥

तस्माद्भक्तः परिज्ञेयः शिष्यो गुणगणान्वितः ।
तन्मयो नित्ययुक्तश्च विकल्पोज्झितमानसः ॥ ३४ ॥

ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा [2]स्वपदस्थितः ।
ब्रह्मचारी गृहस्थो वा कृतकृत्यो यथाविधि ॥ ३५ ॥

वानप्रस्थोऽथ भिक्षाशी नारी वा सद्विवेकिनी ।
धीरः स्वच्छः सुसन्तुष्टस्तत्त्वदर्शनकाङ्क्षितः ॥ ३६ ॥

बन्धुवर्गपरित्यागी उत्साही निश्चयान्वितः ।
लब्ध्वा पात्रं [तदा शिष्यं] यागदीक्षां समाप्य च ॥ ३७ ॥

ततोऽग्नौ प्राकृतान् बन्धांस्तदीयाञ् जुहुयाद् गुरुः ।
अतीतान् वर्तमानांश्च भविष्यान् कमलोद्भव ॥ ३८ ॥

बन्धु (? न्ध) संघे परिक्षीणे [3]शरीरिसकुलास्थितिः ? ।
तत्त्वव्याप्तिसमेता च वक्तव्ये च यथास्थिति ॥ ३९ ॥

---

1. क-ह्याव उत्पद्यते
2. क स्वपदे
3. ख-शरीरी

तद्बुद्धिदर्पणोपेतान् (? तं) हृदयस्थं तु सर्वगम् ।
[1]सर्वाभासमनाभासं चित्सदानन्दलक्षणम् ॥ ४० ॥

व्यक्ताव्यक्ततया मुक्तं निर्लेपं गगनोपमम् ।
तेनेदं तदभिव्यक्तं यत्रस्थस्समतां व्रजेत् ॥ ४१ ॥

कृतकृत्यं तु संज्ञात्वा ज्ञानतत्वं[2]विमृश्य च ।
संसारभयभीरूणामवश्यं सततं त्वया ॥ ४२ ॥

योजना च परे तत्वे कर्तव्या संपरीक्ष्य च ।
पात्रस्थमात्मज्ञानं च कृत्वा पिण्डं समुत्सृजेत् ॥ ४३ ॥

नान्तर्धानं[3]यतो याति जगद्बीजमबीजकृत् ।
पावनं परमं ज्ञानमज्ञानतिमिरापहम् ॥ ४४ ॥

पौष्कर उवाच—

कालेनाभ्यन्वगच्छध्वं (? तां) युक्तो (? क्त) यागादिदीक्षया ।
भीरूणामप्रबुद्धानां जिलस्यान (? ना) व्यवस्थिते ? (? तो) ॥ ४५ ॥

यद्यन्तरा विपद्यन्ते किं स्यात् तेषां तदुच्यते ? ।
असमाप्तक्रियाणां च त्वद्भुभज्ञानिमां विभो ॥ ४६ ॥

---

1. क—सर्वभास
2. क—ग—विमृज्य
3. ख—यथा याति

श्रीभगवानुवाच—

फलं संकल्पपूर्वं स्याद्धिद्धि तीव्रतरं नृणाम् ।
क्रियानिर्वहणात्तात संकल्पोऽसाधितस्य च ॥ ४७ ॥

यदेवालङ्कृता बुद्धिर्नागतल्पेऽर्पयाम्यहम् ।
भवाम्भोधिमपारं च आश्रमी (? त्वाश्रित्य) परमं पदम् ॥ ४८ ॥

तदेव साधितं तेन शाश्वतं पदमव्ययम् ।
सिद्धश्च सिध्यमानश्च तृतीयश्चारुरुक्षकः ॥ ४९ ॥

समत्वमेषां वे विद्धि किंचित्कालान्तरेण तु ।
यथैकस्तिष्ठते तृप्तः पूर्वाशी सिद्धभोजनः ? ॥ ५० ॥

अन्यश्च विष्ट्यनाहारो वेला तस्येन्द्र ? (तस्यन) वर्तते ।
अवसानेषु सर्वेषामतृप्तिर्न गुणस्स्मृतः ॥ ५१ ॥

एवं मन्त्रक्रियायोगे भक्तानां कमलोद्भव ।
कालेन [1]स्वमते शास्त (?समता तेषां) द्वे (? ह्ये) तस्मिन्नव्यये पदे
॥ ५२ ॥

भक्तिश्रद्धासमेतानां नृणां मन्त्रपरिग्रहः ।
संसारोत्तारकः शश्वया वै तत्त्वविद्द्विजः ॥ ५३ ॥

मतिनिष्ठाप्रमेयं च विकल्पैरप्यनावृतम् ।
लसत्समाधिनिष्ठेभ्यः सकाशाज्जन्मना सह ॥ ५४ ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
शिष्यपरीक्षालक्षणो नाम
प्रथमोऽध्यायः

1. स्वमते शास्ति द्वे

अथ द्वितीयोऽध्यायः

पोष्कर उवाच—

भगवन् मण्डलानां च लक्षणं प्रब्रवीहि मे ।
एषामुक्तस्त्वनन्तरस्तु प्रवासं ? (? प्रकाश) च स्वयं च यः ॥ १ ॥

श्रीभगवानुवाच—

पुण्यदेशं समासाद्य प्रसिद्धं सिद्धसेवितम् ।
तत्रानेकप्रकाराणि स्थानानि कमलोद्भव ॥ २ ॥

धान्याश्रितमहीभागे लक्षणे सुपरीक्षिते ।
प्रवर्तन्ते च यागानि तानि ते कथयाम्यहम् ॥ ३ ॥

पर्वताग्रे च तन्मध्ये सानुदेशे [1]द्विजोचिते ।
भूगते तु वने रम्ये पादपौषधिसङ्कुले ॥ ४ ॥

भद्रे चोपवने[2]ह्यद्य ? (? हृद्ये) प्रशस्ते कमलान्विते ।
कूलेषु निम्नगानां तु तासामपि च सङ्गमे ॥ ५ ॥

समीपे पुण्यतीर्थानां सुस्थिरे[3]सारसाकुले ।
देवतायतनोद्देशे गोष्ठेषु ब्राह्मणाश्रमे ॥ ६ ॥

दुष्टप्राणिविनिर्मुक्ते चोरातङ्क [4]भयादिके (? विवर्जिते) ।
तत्र भूमिं परीक्ष्यादौ [5]लक्षणाढ्यां [6]सुरक्षिताम् ॥ ७ ॥

---

1. ख–विभाजिते
2. हृद्ये ?
3. क–ग–सारससङ्कुले
4. भयोज्झिते इति चेत् साधु
5. ग–लक्षणाद्यां
6. ग–सुलक्षिताम्

देवानामालयार्थं तु ग्रामार्थं ब्राह्मणादिषु ।
यजनार्थं तु यगानां गृहार्थं गृहमेधिनाम् ॥ ८ ॥

धराधरवशो ? ध्यावे ? विना ब्रह्मन् गुणागुणाः ।
सन्ति भूमेस्समासेन तन्मे निगदतः शृणु ॥ ९ ॥

यस्मात् क्ष्मा दोषनिर्मुक्ता करोत्यर्थक्रियां सदा ।
सा तु दोषवती भूमिर्विघ्नानुत्पादयेद्बहून् ॥ १० ॥

अभावादस्त्रमन्त्राणां पिशाचैस्त्यज्यतेऽब्जज ।
या प्रशान्तद्रुमोपेता फलपुष्पसमाकुला ॥ ११ ॥

स्निग्धशष्पसमाकीर्णा संयुक्ता मृदुभिस्तृणैः ।
सुस्पर्शा स्निग्धतोया च गन्धाढ्या मधुरासिता ॥ १२ ॥

अनूषरा ह्यदग्धा च पावकोल्कार्करश्मिभिः ।
दुर्गन्धाद्यैर्महादोषैर्निर्मुक्ता सुखशान्तिदा ॥ १३ ॥

दुष्टजन्तुविनिर्मुक्ता सेविता सत्पतत्रिभिः ।
यत्र [1]राजन्ति वै गावस्तथाऽन्ये मृगजातयः ॥ १४ ॥

यत्र मोदन्ति वै व्याघ्रकुञ्जराः सह मानवैः ।
जनयत्याशु चाह्लादं स्वकान्तास्विव दर्शनम् ॥ १५ ॥

सर्वेषां सर्वदा सा भूः शुभदा चार्चनादिषु ।
कुमुदोत्पलकह्लारैराकुला सारसादिभिः ॥ १६ ॥

---

1. रज्यन्ति इति स्यात् किम्

पूर्वे सरोवरं यस्या ह्यपरे आम्रकाननम् ।
महच्छरवणं वामे शस्तो दक्षिणतो नगः ॥ १७ ॥

समैकवर्णा सर्पाद्यैर्निर्मुक्ता चापि शस्यते ।
वापीकूपादिकं खातमीशाने यस्य चोत्तरे ॥ १८ ॥

शुभलक्षणयुक्ता सा सर्वसिद्धिकरी मही ।
शीतरश्मिसमस्पर्शा निदाघे तु शुभावनी ॥ १९ ॥

अत्युष्णा या च हेमन्ते रसान्वा ? (? न्विता) जलदागमे ।
[1]कांस्यभाण्डस्वना घण्टा वीणावंशरवाः शुभाः ॥ २० ॥

मृदङ्गदुन्दुभिरवा सर्वकामफलप्रदा ।
समार्धं वा समं खात्वा पांसुमुद्धृत्य पूरयेत् ॥ २१ ॥

अधिकेन भवेच्छ्रेष्ठा मध्यमा स्यात् समेन तु
अपूर्णामधमां विद्धि दुरितां तां परित्यजेत् ॥ २२ ॥

त्रिपञ्चसप्तरात्रेण यस्यां बीजं प्ररोहति ।
प्रधाना मध्यमा न्यूना सा मही परिकीर्तिता ॥ २३ ॥

प्रागुत्तरप्लवा शस्ता सदैशानप्लवा द्विज ।
कूर्मपृष्ठोन्नता योग्या सुशुभा दर्पणोदरा ॥ २४ ॥

शङ्खचक्रगदापद्मश्रीवत्सगरुडाकृतिः ।
मालामुकुटरूपा च सर्वसिद्धिकरी मही ॥ २५ ॥

---

1. ख—कांस्यभाण्डरवा वापि वीणावंशरवाश्शुभा।

अतोऽन्या विपरीता च साऽनिष्टफलदा सदा ।
दूरतः परिहर्तव्या सिद्धिहानिकरी यतः ॥ २६ ॥

उक्तलक्षणसंयुक्ता यदि न प्राप्स्यते मही ।
स्वीकृत्य सर्वसामान्यां पूज्य मन्त्रांस्तु ? (?न्त्रस्तुतै)र्यजेत् ॥ २७ ॥

तत्र (? त्र) वास्तूत्तमं ? सम्यक् संख्याहीनं च होमयेत् ।
निराज्ये बहुनाऽऽज्येन मध्यदेशे यथास्थिते ॥ २८ ॥

वृक्षं वै सोत्थितं ? चैत्यकुड्यप्रासादजं तथा ।
त्यक्त्वा तु द्विगुणात्मानं [1]छायामिध्मनि गर्भवत् ? ॥ २९ ॥

शुभेऽनुकूलेऽथ दिने कुर्याद्भूमिपरिग्रहम् ।
अहिंसितेन मांसेन सक्तुना सोदकेन तु ॥ ३० ॥

फलपुष्पसमेतेन तैलक्षारान्वितेन च
स्विन्ने संस्पर्शसङ्गेन दधिक्षीरगुडेन च ॥ ३१ ॥

रजनीचूर्णयुक्तेन शाद्वलेन तिलेन च
दिग्विदिक्षु तथा मध्ये त्विदमुक्त्वा बलिं क्षिपेत् ॥ ३२ ॥

येषां वै क्रूरसत्त्वानामयं भूभाग आश्रयः ।
ते प्रयच्छन्तु मे तुष्टिं प्रयान्तु परमालयम् ॥ ३३ ॥

ध्यात्वाऽस्य सदृशं देहमस्त्रमन्त्रेण चोज्ज्वलम् ।
भूतान्याज्ञापयेत् पश्चात् तोयान्तां निखनेन्महीम् ॥ ३४ ॥

---

1. प–माया

नरोऽज्ञोयं ? समो वाऽथ शमेनैकेन वीथिकाम् ।
सुशुद्धासु समाहूय गन्धाढ्याच्छिदसंयुता ? ॥ ३५ ॥

तया संपूर्य तद्गर्तमाठकाप्रहरे ? (? रे) महीम् ।
पश्चात् समैस्तृणैर्व्रीहिपूर्णां पादपपल्लवैः ॥ ३६ ॥

कृत्वा संवासयेत् तत्र गोगणं तु दिनत्रयम् ।
शोधयित्वा चतुर्थेऽह्नि लाङ्गलैः परिवर्तिताम् ॥ ३७ ॥

प्रदीप्तेनेष्टकेनाथ स्पर्शनीया च सर्वशः ।
ततः काञ्चनजं रेणुं ताम्र[1]जं तारजं तथा ॥ ३८ ॥

रत्नजं गन्धमालाढ्यं सस्यशालिफलान्वितम् ।
सपुष्पाक्षत[2]लाजाढ्यं सिद्धार्थैश्च तिलैर्युतम् ॥ ३९ ॥

श्रीकरं पञ्चगव्येन भूमौ सर्वत्र वापयेत् ।
अकृते वा कृते खाते शुद्धिमेति च तत्क्षणात् ॥ ४० ॥

[3]यस्यां सस्यादिकं सम्यग्यत्र कुत्र समाचरेत्।
शुद्ध्यर्थं मङ्गलार्थं च स्थानशुध्यर्थमेव च ॥ ४१ ॥

दृष्टादृष्टफलार्थं तु यागयज्ञादियाजिनाम् ।
ततस्समीकृत्य यदा...स्याप्रागुदप्लवात् (?यथास्यान्महीप्रागुत्तरप्लवा
॥ ४२ ॥

---

1. क–ताम्रतामुरयति ग–ताम्रतायुरयंचपि
2. क–ग–जालाढ्यं
3. क–यस्यां तस्मादितं

मृदं यावद्वृषे [1]पृषेत्तोयं प्रसरं तच्च दिग्धयोः ।
पृथुभिर्मुसलैर्भूयः पीड्यं सघनकाष्ठजैः ॥ ४३ ॥

वर्षजस्पर्शसदृशीं कृत्वा मृद्गोमयाम्बुना ।
उपलिप्यानुसंमार्ज्य पाणिना वाऽथ वाससा ॥ ४४ ॥

शुभे वारेऽनुकूलेऽथ दिग्विदिक्[2]सिद्धिमाचरेत् ॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्कर संहितायां

भूपरीक्षालक्षणो नाम

द्वितीयोऽध्यायः

---

1. क–...मृषेत्तोयं ग–मृतयावत्वृषेत्तोयम्
2. क–ग–सिद्धमाचरेत्

अथ तृतीयोऽध्यायः

पौष्कर उवाच—

दिक्सिद्धिलक्षणं नाम कथयस्व यथास्थिति ।
हितार्थं सर्वलोकानां ममापि च विशेषतः

श्रीभगवानुवाच—

एकस्मिन् द्विज भूभागे श्लक्ष्णे पूर्वोत्तरप्लवे ।
पूर्वापरं परिज्ञेयं प्रसिद्ध्या लक्षणेन वा

देवालयमहास्तम्भरथ्यासंस्थासु भित्तिषु ।
सकाशात साधनीयं यत प्रसिद्धं पूर्वजं तु वा

सूर्यशङ्कुसमायो [1]गाद्यत्नतः पूर्वपश्चिमम ।
विज्ञेयं लक्षणार्थं तु मध्यं वै सर्वसाधनम्

तच्च ते प्रकटं [2]वच्मि यत्र यत्र स्थितो (? तौ)[3] यथा ।
निरावरणभूभागे कुर्याद्यागगृहादिकम ।

हेमादिधातुजां कुर्याच्छलाकां चतुरङ्गुलाम् ।
यावद्द्वादशमानोत्थामुभयोर्नहुषाननाम्

---

1. क–ग–गाद्यत्तवोत्पूर्वं
2. क–पश्य ग–पश्चि
3. ख–यदा

त्यक्त्वा चद्वाऽथ मानं तु त्रिभागं वा तदन्ततः ।
[1]वेधयामुपलाकारं कुर्यादेकत्र [2]चोभयोः ॥ ७ ॥

[3]सीतानीतदृढं सूत्रं कोणमाद्यन्तयोजयेत् ?
ज्ञात्वा तु विघनं व्योम शङ्कुर्वैध्रुवतेऽहनि ॥ ८ ॥

कनिष्ठाङ्गुलवद्वृत्तं प्रशस्तं दृढदारुजम् ।
सुतीक्ष्णधातुजं वाऽथ षोडशाङ्गुलमुच्छ्रितम् ॥ ९ ॥

द्वादशाङ्गुल (?चतुरङ्गुल) माभूमावारोप्य द्वादशोर्ध्वगम् ।
सशलाकं तु तत् सूत्रं [4]शङ्कुमूलावधौ न्यसेत् ॥ १० ॥

मेखलाबन्धयुक्तया वै [5]तल्लग्नं भाति पौष्कर ।
ततस्तत्तानयेत् ? सूत्रं समार्धं तु समं तु वा ॥ ११ ॥

भूमिं शलाकया कुर्यात् तेन सूत्रेण सर्वदिक् ।
समं समेन हस्तेन सूक्ष्मं साकेतलक्षणम् ॥ १२ ॥

तां च वै [6]शाङ्कवीं छायां तद्वृत्तपरिधौ द्विज ।
लक्षयेत् प्रविशन्तीं च यत्र तत्राङ्कमुल्लिखेत् ॥ १३ ॥

---

1. ख–वेधाया
2. ख–बेरयोः
3. ख–सितानित
4. क–शङ्कुमूला.... न्यसेत् ग–शङ्कुमूलावधो न्यसेत्
5. क–लग्नं भवति
6. क–शङ्करीयां च ग–शङ्करीयां चाया

पश्चिमे द्विज दिग्भागे प्राग्भागे[1] त्वेवमेव हि
तद्बाह्यभ्रममाणान्तं त्वेवं वृद्धिं यदा व्रजेत् ॥ १४ ॥

यस्मिन् देशे दिवारात्रं नित्यमेव समं द्विज ।
तस्मात् पूर्वापरं तत्र न चान्यत्र तु तद्भवेत् ॥ १५ ॥

समं यत्र दिवारात्रमेकस्मिन् वैषुवे दिने ।
तत्रानेन विशेषेण ज्ञातव्यं पूर्वपश्चिमम् ॥ १६ ॥

[2]रवेर्विषुवती काष्ठा दाक्षिणादुत्तरं गता ।
तस्यां पूर्वापरौ भागौ विज्ञेयौ छायया द्विज ॥ १७ ॥

तथा पश्चिमभागस्थं देशं प्राग्भागगं तु वा ।
तस्यामभ्यन्तरस्थं वा लक्षणीयं प्रयत्नतः ॥ १८ ॥

[3]तद्बाशां पूर्वदिग्भागं भगयं ? तु विशङ्कया ।
स्वे स्वे देशे प्रथारूपं तथा देशान्तरेषु च ॥ १९ ॥

उन्नतेष्वथ निम्नेषु मध्यादू (? दू) रस्थितेषु च
ज्ञापकं दिनरात्रिभ्यां षष्टमंशं प्रकल्प्य च ॥ २० ॥

कयत्रमपि ? संवादि तत्प्रभाते नियोजयेत् ।
एकस्मिन् [4]त्रपसंकाले ? काले तु विघनाम्बरे ॥ २१ ॥

---

1. क—ग—त्वकमेवहि
2. क—ख—ग—प्रवे
3. क—तद्बादिशां पूर्वदिशं पूर्वदिग्भागयत्नु विसविशङ्कया
4. ख—नृपसं

[1]राशिध्येया प्रणीता च मध्याह्नाद्यदि जायते ।
पूर्वापराभ्यां सन्धिस्थं तं देशं विद्धि सर्वदा ॥ २२ ॥

अर्धे पूर्णे तु मध्याह्ने यदि तादृग्विधाय वै
तथाविधा च दृश्यन्ते[2]शाङ्कवी... ॥ २३ ॥

.........छायाभागं चतुर्विधम् ।
पूर्वभागाधिके देशं विधेयं तेन गृह्यते ॥ २४ ॥

मेषे माध्याह्निकी छाया विज्ञेयाऽष्टाङ्गुला तथा ।
संयुक्ताद्यङ्गुला षड्भिर्वृषे पञ्चाङ्गुला भवेत् ॥ २५ ॥

चतुर्भिरङ्गुलैरूना मिथुने त्र्यङ्गुला भवेत् ।
दशैकद्यङ्गुलैर्भूयाद् द्यङ्गुली कर्कटे भवेत् ॥ २६ ॥

सिंहे मिथुनवद्विद्धि कन्यायां वृषवद्भवेत् ।
तुले तु मेषसदृशी वृश्चिके द्वादशाङ्गुला ॥ २७ ॥

अष्टाविंशतिभिर्युक्तद्यङ्गुलैर्धनुषि शृणु ।
अष्टादशाङ्गुला विप्र द्यङ्गुलैर्दशभिर्विना ॥ २८ ॥

त्रिंशद्भिर्द्यङ्गुलैरूना विंशत्यङ्गुलका झषे ।
कुम्भे कार्मुकतुल्या स्यान्मीने स्याद्[3]वृश्चिके यथा ॥ २९ ॥

---

1. ग–नाशिध्येया
2. ख–शाङ्कवीयमागधीः
3. ख–वद

शङ्कोदद्वांशभाग यद्विज्ञातव्यं तदङ्गुलम् ।
तस्य यत् षष्टमं भागं बोद्धव्यं ह्यङ्गुलं तु तत् ॥ ३० ॥

एवं भूमण्डले ह्यस्मिन् [1]ह्यादावेष द्विजोत्तम ।
मध्यमं पश्चिमं पूर्वं ज्ञात्वा देशं यथास्थितम् ॥ ३१ ॥

स्वस्वदेशे यथा पश्चात् प्राग्दिग्भागे तु लक्षयेत् ।
शङ्कुं च पूर्ववत् कृत्वा तद्वदुल्लिख्य मण्डलम् ॥ ३२ ॥

प्रत्यग्भागं [2]तथेशाख्यं वृत्तक्षेत्रं तु पोष्कर ।
तस्यैव मध्यदेशं तु मध्याह्नच्छायया द्विज ॥ ३३ ॥

मच्छिन्त्य पूर्ववत् प्राचीं ततस्सूत्रं प्रासार्य च ।
पूर्वापराभ्यां सूत्राभ्यां कृत्वा कमलसम्भव ॥ ३४ ॥

त्यक्त्वा तत्सूत्रनिकटाद्दिग्द्वयात् पूर्वपश्चिमात् ।
मानं मध्यन्दिनच्छाया दिव्यं चेत् दिक्समाश्रयम ॥ ३५ ॥

व्यक्तमङ्कद्वयं कुर्यात् तद्वृत्तोपगमान्तरे ।
ततः कमलसम्भूत पुरादीनां च साधयेत् ॥ ३६ ॥

पूर्वपश्चिम [3]मध्यस्थं नानाव्यक्तमवक्षिपेत् ।
सूत्रं पूर्वापराभ्यां तु देशान्तरवशे सति ॥ ३७ ॥

---

1. ख–ह्यादावेषा
2. ख–ग–तथा शक्यं
3. ख–मह्नामत्ययं

गसाध्यं तेन सूत्रेण पश्चाद्दि दक्षिणोत्तरम् ।
प्रागदत्तं वृत्तमध्ये यत् तत् सूत्रं परिमार्ज्य च । ॥ ३८ ॥

यद्यपि स्यात् तदाकारं तत्सूत्रं च तथा बहिः ।
तस्य देशस्य तत्पूर्वं [1]तत्सूत्र... ॥ ३९ ॥

सूर्योदयदिने वृत्तं तत्तन्मध्य[2]मवेक्षया ।
क्षिप्रेणैव तु कालेन ज्ञातुमिच्छति वा यदि ॥ ४० ॥

यथावत् पूर्वदिग्भागमसन्दिग्धतयाऽपि वा ।
अनेन विधिना नूनं सदेवाम्बुरुहासन ॥ ४१ ॥

सुसूक्ष्मे बहुभिर्व्यक्तैर्लेखैश्चैव निरन्तरे ।
प्राक्प्रमाणेन संपूर्य क्ष्मातलं बाह्यतः क्रमात् ॥ ४२ ॥

[3]यावच्च क्ष्मावसानं च तथा छाया (? यां) निरीक्षयेत् ।
[4]प्रविशन्ति च लेखानामुद्दिश्यैव यथा ततः ॥ ४३ ॥

यावता सा [5]पुनै............ ।
यस्मिंस्तु परिलेखा [6]भूर्वसत्या दीर्घमेव च ॥ ४४ ॥

क–ख–ग–तत्सूत्रं येति चेति च ।

मपेक्षया

क–ग–यावच्च ... वसानं

क–प्रविशास्त...लेखा

क–ख–ग–पुनैस्यामित्य (त्रि) च्छायापरके (परिके) रपि

क–सात्मतस्वस्त्या

तत् स्थानं चिह्नयेद्यत्तं वीथीनामुत्तरां दिशम् ।
समुत्पाट्य ततःशङ्कुं न चलत्यवनी यथा ॥ ४५ ॥

ततश्शङ्कुकृताङ्कस्य उदग्दिक्संस्थितस्य च
शङ्कुमूलस्थितस्यापि चिह्नस्य कमलोद्भव ॥ ४६ ॥

[1]दीर्घं प्रसार्य वै सूत्रं सुघालिप्तं तु चोपरि ।
दक्षिणोत्तरसम्रा ? तु तस्मात् ? तस्मात् पूर्वापरं तु वा ॥ ४७ ॥

परिज्ञेयः प्रयततः प्रासादादिषु साधनं ।

पौष्कर उवाच—

ज्ञातुमिच्छाम्यहं नाथं यदेतन् कथितं त्वया ।
पूर्वापरादुदग्याम्यं तस्मात् पूर्वापरं तु वा ॥ ४८ ॥

श्रीभगवानुवाच—

शङ्कुसूत्रं द्विधा भवा मध्ये विघ्नं भङ्क्त्वेत् स्फुटम् ।
कृत्वा सूत्रं तु तत्रैव निरुघनैकवर्णिना ॥ ४९ ॥

तेनेच्छादम ? सूत्रेण द्वितीयेन करेण तु ।
तच्चक्रकृद्भ्रमं सूत्रं चिह्नयेद्दिग्द्वयाद्द्विज ॥ ५० ॥

ताभ्यामन्तरस्तु दीर्घेण तयोस्संस्थेन तन्तुना ।
पाणिद्वयेन चैकैकं लाञ्छयेद्दक्षिणोत्तरम् ॥ ५१ ॥

..................पूर्वापरं लाञ्छयेद्दक्षिणोत्तरम् ।
यथा वज्राग्रवद्विप्र भवेद्भूगलाकृति ॥ ५२ ॥

---

1. ख—विवयं

ननम.पपतितं सूत्रं क्षेतव्यं [1]रुचितं यतम् ।
ञायते मध्यमात्रं तु दिक्चतुष्कस्य पौष्कर ॥ ५३ ॥

मानेनाभिमतेनाथ चतुरश्रं तु साधयेत् ।
नगममण्डलयग्मादि [2]साधके जनकं तु यत् ॥ ५४ ॥

मध्यस्थितेन सूत्रेण दिक्सूत्रेणाङ्कयेत् पुनः ।
[3]ततो दिक्संलयचिह्नानां सूत्रमानं [4]निधाय तु ॥ ५५ ॥

दिक्षु चैवान्तरालानि लाञ्छ्य पूर्वोक्तलाञ्छनैः ।
ततस्सूत्रचतुष्कं तु चिह्नाच्चिह्नगतं क्षिपेत् ॥ ५६ ॥

चतुरश्रं भवेत् क्षेत्रं सन्दिग्धस्य महामुने ।
[5]सूत्रापरपरागेव त्रिवृष्टिनिर्माणसिद्धये ॥ ५७ ॥

पूजनीयश्च विधिवत् पुरुषो वाऽथ संस्थितः ।
छायोत्थो यः पुनर्विप्र विश्वरूपस्य वै विभोः ॥ ५८ ॥

सर्वदिक्षु समैर्भागैर्नवधा संविभज्य च ।
सूत्रैस्सुधावलितैश्च यागागारवसुन्धराम् ॥ ५९ ॥

---

1. ख–रुचिरं
2. ख–साध्यते
3. ख–तं तावक्
4. ख–निधाय च
5. ख–परागे च

एकाशीतिपदोपेतां कृत्वैवं तां प्रयत्नतः ।
[1]प्रत्येकास्मि.........कुर्यात् तत्तुर्यांशेन चाम्बुजम्

दलाष्टकयुगं चैव कर्णिकाकेसरान्वितम् ।
आनीशरक्षोवायव्यबहिः कोणपदेषु च

चतुष्टयं यत् पद्मानां केवलं तच्चतुर्दलम्
ईशानपदपद्मात्तु समारभ्य प्रपूजयेत्

बाह्यपङ्क्तिषु पद्मेषु क्रमाद्देवान् सुरानृषीन् ।
वृषाङ्कपदपद्मे तु ब्रह्माणं कर्णिकान्तरे

ईश्वरं तपनं चैव दितिं चैव तथाऽदितिम् ।
पूर्वपत्र समारभ्य विन्यसेद्यावदुत्तरम

एवं तस्मिन् पदाब्जे तु पूजयित्वा तु पञ्चकम् ।
षट्कं च ततस्सम्यग्विबुधानां च सप्तकम्

क्रमात् सप्तपदस्थानां पद्मानां कर्णिकोपरि ।
[[2]वाग्वा]ख्यं चापवत्सं च जयेन्द्रो[3]समशीयकः ?

रविस्सत्यात्मदेवौ च ततो वह्निपदाम्बुजे ।
भूयः पितामहं मध्ये पूर्वपत्रे न्यसेद्वृशम्

---

1. क–ग–प्रत्येकस्मिन्वते य–प्रत्प्रेकस्मिन्यते
2. ख–पूयूवाख्यथवत्सं
3. ख–समरीयकः

गगनं हि विभु पूषा दक्षिणे पश्चिमोत्तरे ।
इ[2]ृवैवं कोणपद्मेषु पत्रस्थं च चतुष्टयम् ॥ ६८ ॥

पद्मे राक्षसकोणान्तमम्बुजेष्वथ सप्तकम् ।
सविताख्यं च सावित्रं [1]स्वस्त्ययं च ग्रहक्षमम् ॥ ६९ ॥

विवस्वान् धर्मदेवस्तु गन्धर्वाधिपतिस्स्मृतः ।
पद्मे नैर्ऋतकोणस्थे भूयो ब्रह्माणमन्तरे ॥ ७० ॥

भृङ्गाख्यो भृङ्गराट् चैव ततः पितृगणाधिपः ।
देवो [2]द्वापरिकाख्याश्च (? दौवारिकाख्यौ च)
[3]प्राक्पत्रादौ चतुष्टयम् ॥ ७१ ॥

[4]ततोऽष्टपद्मपद्मेषु देवतासप्तकं क्रमात् ।
कर्णिकान्तर्गतं न्यस्य यावद्वायुपदावधि ॥ ७२ ॥

इन्द्रश्चेन्द्रपदाख्यश्च [5]सुग्रीवं (? वः) कुसुमद्विजः ।
मित्राख्यो वरुणश्चैव त्वं (? त्व) सुराधिपतिः पुनः ॥ ७३ ॥

वायव्यपदपद्मे तु मध्ये चैव प्रजापतिम् ।
प्राक्पूर्वादिषु [6]पद्मेषु (? पत्रेषु) शेषश्चाधर्म एव च ॥ ७४ ॥

1. क–ग–स्वस्यन्हग्रह
2. ख–द्वौ परिघाः काश्च
3. ग–प्राक्पत्राष्ट
4. क–ख–ततोष्टपद्मपत्रेषु
5. सुग्रीवं कात्सुमुद्विज
6. ख–पद्मेषु

यन्मया (? यक्ष्मा) धिपतिश्चैव ? नागेन्द्रस्तदनन्तरम् ।
सप्तकं देवतानां च पूर्ववत् पूजयेत्ततः ॥ ७५ ॥

पूर्वाख्यो रुद्रदासश्च [1]मुख्यो भल्लूकसोमकौ ।
धा (ध) राधरश्च मत्संज्ञा (? ज्ञ) इत्येते देवतागणाः ॥ ७६ ॥

पूजयित्वा ततः पश्चादेकैकस्मिंस्तु पङ्कजे।
स्वनाम्ना वास्तुनाथं तु पत्रमध्ये स्थितं यजेत् ॥ ७७ ॥

कोणभागस्थपद्मानां केसराधो यजेच्च तम् ।
प्रणवं वास्तुनाथाय नमश्चान्ते प्रपूजयेत् ॥ ७८ ॥

तत्राष्टकमले (? दले) नैव पूर्य वर्णाष्टकेन तु ।
पूजयित्वा विधानेन पुष्पधूपादिकेन च ॥ ७९ ॥

दधिक्षीरोदकेनैव भक्ष्यैस्सफलमूलकैः ।
इष्ट्वैवं विबुधव्रातं बाह्यान्तःकरणे पुरा ॥ ८० ।

तदन्तरपदाब्जानामीशकोणादितः पुनः ।
नागकुण्डलवद्ब्रह्म ? [न] दक्षिणावर्तकेन तु ॥ ८१ ॥

यावन्मध्यपदाब्जं तु पूर्य वर्णाष्टकेन तु ।
मातृकावर्णभेदेन ह्यकारादिक्रमेण तु ॥ ८२ ॥

यावद (दूह) कारवर्णं तु ततोऽब्जेऽब्जे दलेषु च ।
तेनैव क्रमयोगेन पूजयेद्देवतागणम् ॥ ८३ ॥

---

1. क–मुखो भल्लक ख–मुख्यो भल्लूक

द्वितीयावरणे चैव अन्तर्यागे निबोध मे ।
[1]धाता यन्ता ध्रुवः काल (? का) माम ? कर्ता यजेत्ततः ॥ ८४ ॥

जीवं प्राणतिरोयज्ञं ? रविकारं विरेव च ? ।
लोकनाथो विधाता वै भगस्त्वष्टा नियामकः ॥ ८५ ॥

यदेव न च कल्याणो
स्रष्टारो विश्वकर्मा चेदित्येता ? कमलोद्भव ॥ ८६ ॥

देवताश्चान्तरे पूज्याश्चतुर्विंशतिसंख्यया ।
एतेषामन्तरे भूयस्तृतीयावरणे शृणु ॥ ८७ ॥

षोडशानां ततस्संख्या.........देवतागणम् ।
समुद्रमितरे द्वीपा मासा नाड्यश्च तारकाः ॥ ८८ ॥

विश्वेदेवाश्चाप्सरसो मनवो ऋषयस्तथा ।
वसवो मरुतस्सिद्धा नागास्साध्या मि......... ॥ ८९ ॥

चतुर्थावरणे न्यसेत् ।
तत्पादादौ नवानां तु पद्मानां पत्रमध्यतः ॥ ९० ॥

मध्यपद्मे तु पत्रस्थं विश्वरूपं यजेत् प्रभुम् ।
[2]यस्यैयं देवताचक्रं वाहनाश्चानुयायिभिः ॥ ९१ ।

---

1. क–...................... कालमाम
2. क–ग–यस्येयं

संयुक्तं तिष्ठते देहे सफलस्य महात्मनः ।
प्रणवेन स्वनाम्ना च नमस्कारयुतेन च

एकैकं पूजयेद्देवं तथैकैकं द्विजाक्षरम् ।
इत्येवमुत्तरस्यां दिक् पूर्वस्यां वाब्जसम्भव

[1]विविक्तमुद्धरेत् क्षेत्रं सुतुर्यारित्व[2]भानये ?
[3]यस्मादतीव तुर्यश्री ? वास्तुक्षेत्रमसिद्धिदम्

[4]विवृतास्सिद्धयस्सर्वाः प्रवर्तन्ते सदा नृणाम ।
सामान्यादविकाराद्वा शान्तिर्भवति शाश्वती

अत एव हि तत् क्षेत्रं वर्धनीयं प्रयत्नतः ।
प्रत्ययार्थं हि मोक्षस्य सिद्धयस्संस्थिता यतः

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां

दिक्सिद्धिलक्षणो नाम

तृतीयोऽध्यायः

---

1. क–ग–विषक्त......क्षेत्रं
2. ख–मानयोः
3. ख–यस्मार्वति चतुर्यशः
4. क–ग–विकृती

अथ चतुर्थोऽध्यायः

पौष्कर उवाच—

यदर्थमेव देवेश [1]चतुरश्रं त्वयोदितम् ।
तदादिश प्रमाणेन यागानां मन्दिरादिकम् ॥ १ ॥

श्रीभगवानुवाच—

सुप्रणीतं प्रमाणं च ज्ञात्वा वै माण्डलीयकम् ।
अप्रणीतप्रमाणा वा मानमाहृत्य मण्डलात् ॥ २ ॥

[2]ततश्चास्त्रायते मानमस्य भूतेस्तथैव च ।
अभूय ? बलिभूमानां भ्रामणीमानमेव च ॥ ३ ॥

ज्ञात्वा समाहरेत पश्चात् प्राकारं मण्डलं तु वा ॥

पौष्कर उवाच—

प्रणीता मानसामान्या मानानां वा जगद्गुरो ।
यागानां विस्तरं ब्रूहि अस्रादेर्भूमिविस्तृताम् ॥ ४ ॥

श्रीभगवानुवाच—

जालान्तरगते सूर्ये [3]भाति रेणुगणश्च यः ।
स एष परमाणुस्स्यादष्टाभिस्तैरणुस्स्मृतः ॥ ५ ॥

---

1. ख—चतुरश्रस्त्वयोदितः
2. ततश्चाख्यायते इति स्यात् किम्
3. ख—पश्येन्नेणु

अणुभिः क्रमलोद्भूत तैस्तु [1]लिक्षाऽष्टभिर्भवेत् ।
ताभिर्लिक्षाष्टकैर्यूकां विद्धि यूकाष्टकं यवम् ॥ ६ ॥

अष्टभिस्तु प्रमाणोत्थैरङ्गुलं च यवोदरैः ।
गोलकं हि [2]कलश्चैव नाम स्याद्व्यङ्गुलस्य च । ॥ ७ ॥

[3]षट्कलं च स्मृतं तालमध्वनीनवकर्मणि ।
चतुर्विंशतिभिर्ब्रह्मन् हस्तस्तैरङ्गुलैर्भवेत् ॥ ८ ॥

तेनैव हस्तमानेन गुरुशिष्योत्थितेन च ।
मण्डलादौ तु सर्वत्र [4]निदध्या [न्मान] कल्पना ॥ ९ ॥

भिन्नप्रमाणयागानामस्त्र[5]भूमैकजोत्त...... ।
आद्यद्वादशभिर्मानमङ्गुलैः परिकीर्तितम् ॥ १० ॥

[6]द्वितीयमष्टादशभिश्चतुर्विंशतिभिः परम् ।
[7]अङ्गुलात्रेपनत्वान्या ? त्र्यङ्गुलाचतुरङ्गुलाः ॥ ११ ॥

---

1. क–लक्ष्याष्ट
2. ख–कलाश्चैव
3. ख–षड्गोलं च
4. क–निदध्या ... कल्पना
5. ख–ग–भूमैकजोत्तवम्
6. ख–द्वतीयं द्वादशाविश्च
7. ख–अङ्गुलानेवनात्वानु

षोडशाङ्गुलमानेन[1].........क्षाधिका सताम् ।
सार्धहस्ता द्विहस्ताश्च तदा सार्धद्विहस्तकाः ॥ १२ ॥

वीथिका स्वल्पविस्तारा यागानां समुदाहृता ।
अधमं मध्यमं [2]हस्तो यागानां सा त्रिहस्तका ॥ १३ ॥

अधिका सार्धहस्तेन[3]वीथी शुभतरा मता ।
कार्या विस्तीर्णमानानां यागानां सा मिन्नरूपिणांम ॥ १४ ॥

गमनेमिचतुर्हस्ता षड्गोलक[4]युताऽथवा ।
[5]युगाख्यस्य च चक्रस्य अन्तेप्रद्विसमा ? स्मृता ॥ १५ ॥

स्वैव सांवत्सरी यस्य द्वादशाङ्गुलकैर्विना ।
बलि[6]पुष्पा.........भूस्ताभ्यां विविक्तां परिकल्पयेत् ॥ १६ ॥

[7]अस्त्राति.........यं प्रगीतमया च ते ? ।
भूभागे संमितं कुर्यात् सर्वेषां च पृथक् पृथक् ॥ १७ ॥

---

1. क-ग–तंवेद्य
2. ख–हस्तं
3. क–ग–विधिश्शुभ
4. ख–युता तु वा
5. क–ग–युगाभ्यास्य च
6. क–ख–पुष्पास्य
7. ख–ग–अस्त्रातिष्वति......मतं

वितानानां च यागानां [1]स......धसमं भवेत् ।
कुर्याच्च भूमिविस्तारमस्याप्युक्तं प्रमान्तिकम् ॥ १८ ॥

हस्तादिपञ्चहस्तान्तं यागमानं च सङ्गतम् ।
ऊनाधिकं च पञ्चहस्ता[2]न्मा (न) मस्य प्रजायते ॥ १९ ॥

यावद्द्वादशहस्तं स्यात् किञ्चिद्धीनं तु [3]वाऽधिकम् ।
मध्यमं[4]विद्धि तन्मानं ततोर्ध्वं तु स्मृतं महत् । ॥ २० ॥

प्रमाणमेवमादौ तु चिन्तयित्वा प्रयत्नतः ।
[5]यागवेश्म.........कुर्यात्तस्य तु लक्षणम् ॥ २१ ॥

स्वल्पमण्डलगेहानां हस्तेनैकेन कल्पयेत् ।
[6]वैपुल्यं विप्र भित्तीनामथवार्धाधिकेन तु ॥ २२ ।

द्विहस्तं मध्यमानां तु [7]भित्ति......... ।
विस्तीर्णा यागवेश्मानां भित्तिविस्तारमब्जज ॥ २३ ॥

कुर्याद्धस्तचतुष्केण पञ्चकेनाथवेच्छया ।
षट्सप्ताष्टसमोच्छ्राया महीयं सङ्गवेषु च ॥ २४ ॥

---

1. ख–सकलोत्थसमं ग–सकगोर्धसमं
2. क–ग–न्मास..............प्रजा........
3. ख–साधिकं ग–बाधिकं
4. क–विहितं ग–विधितन्मानं
5. ख–ग–यागयेन्मस्तहरणं
6. ख–वैपुल्यं इत्याद्यर्धचतुष्टयं गलितम्
7. प–भित्तिममातिमशा भवेत्

नवहस्ता द्विजश्रेष्ठ दशका [1]दशधोच्छ्रिता।
[2]भक्ति (? भित्ति) सङ्ख्या तु सम्पाद्य मध्यमानं तु सर्वदा ॥ २५ ॥

करद्वादशदीर्घं च तथैवैकाधिकं तु तत् ।
चतुर्दशोच्छ्रितं वाऽपि वितानां प्रकल्पयेत ॥ २६ ॥

अस्य न्यूनाति वा हि (? पि) स्यान्माण्डलीयस्य सर्वदा ।
त्रिविधं भित्तिमानं तु [3]मध्याह्ने तद्व्यपेक्षया ॥ २७ ॥

कल्पनीयं............माया संख्यया कमलोद्भव ।
उत्तरोत्तरया चैव [4]वैपुल्येन सहैव हि ॥ २८ ॥

काष्ठपक्वेष्टकामिश्रं सुधालेपाय सात्विकम् ।
यागमण्डपनिर्माणं प्रशस्तं सर्वसिद्धिदम् ॥ २९ ॥

यथाकालं यथादेशं कुर्याद्वित्तानुरूपतः ।
स्वल्पानां यागवेश्मानां द्वारमेकं प्रकल्पयेत् ॥ ३० ॥

मध्यतः पूर्वादिग्भागे पश्चिमे ह्येवमेव च ।
दिगन्तरपरित्यागात् [5]कृत (? दतद्) द्वारमसिद्धिदम् ॥ ३१ ॥

1. क–दश .... ताम्
2. क–भक्त
3. क–मध्या व्यपेक्षया ग–मध्याह्ने व्यपक्षया
4. क–ख–वैपुलेन
5. क–ग–घ–त्यागं

तस्माद्दिक्षु प्रयत्नेन मध्यतो विनिवेशयेत् ।
मध्यप्रमाणगेहानां द्वे द्वारे पूर्वपश्चिमे ॥ ३२ ॥

अतिविस्तीर्णमानानां प्राकाराणां प्रकल्पयेत् ।
दिक्षु द्वारचतुष्कं तु प्राकाराणां तथैव हि ॥ ३३ ॥

अन्नत्रयेण न्यूनानां कुर्यात् सार्धेन चोच्छ्रितम् ।
स्वविस्ताराच्च मध्यानां चतुर्थांशेन कल्पितम् ॥ ३४ ॥

अन्येषां पश्चिमांशेन द्वारोच्छ्रायं प्रकल्पयेत् ।
त्रिभागेनाथ वर्धेन ? (? वार्धेन) [1]सोच्छ्रायाद्धि विविक्तता ॥ ३५ ॥

द्वारीयशाखायुग्मस्य उदुम्बरयुगस्य च ।
उच्छ्रायात् पश्चिमांशेन न्यूनानां विस्तृतिर्भवेत् ॥ ३६ ॥

चतुर्थांशेन मध्यानामथोर्ध्वानां त्रिभागतः ।
विस्तरार्धेन बाहुल्यं [2]शङ्खवादींस्तान् समाचरेत् ॥ ३७ ॥

पञ्चसप्तक्रमाच्छाखानवकेनान्वितं तु तत् ।
द्वारे द्वारे तु शाखाभ्यां चतुर्थांशे व्यवस्थिते ॥ ३८ ॥

द्वारस्थं[3]द्विति (? भित्ति) स्थितिं कुर्यात् स्वदिग्भागक्रमेण तु ।
वज्रनाभं हरीशं च पूर्वस्यां दक्षिणोत्तरे ॥ ३९ ॥

---

1. ख–सोच्छ्रायाद् विद्धि वित्त
2. क–शङ्खादी......समाचरेत्
3. सर्वत्र 'द्वितिस्थ' इत्येवास्ति

शङ्खचक्रधरं चैव वज्रनेत्रलताधरम् ।
निषेधाभिनयोपेतं श्रोणीतटकरार्पितम् ॥ ४० ॥

हर्यस्वरूपसदृशं नेत्रवृन्दं यदेव हि ।
क्रूरं [1]दृगद्भुतोपेतं वज्रनाभं प्रकल्पयेत् ॥ ४१ ॥

एवमेव हरीशं च निषेधाभिनयोज्झितम् ।
प्रवेशाभिनयाख्येन पाणिना किन्तु चिह्नितम् ॥ ४२ ॥

एको ह्यत्र निषेधं च स्वभक्तानां करोति वै ।
भक्तानामपरश्चैव प्रवेशं संप्रयच्छति ॥ ४३ ॥

द्वारे द्वारे प्रतीहारद्वयस्यैव प्रयोजनम् ।
धर्माध्यक्षो नियन्ता च [2]दक्षिणे दक्षिणोत्तरम् ॥ ४४ ॥

बाणकार्मुकमेकस्मिन् [3]पाणौ पाशं तथापरे ।
कुर्यादन्तकसादृश्यौ पूर्ववद्भुजभूषितौ ॥ ४५ ॥

किन्तु दण्डगदाहस्तौ वज्रचक्रविवर्जितौ ।
शुद्धाक्षममृतानन्दं प्रतीच्यां दक्षिणादितः ॥ ४६ ॥

[4]बाणकार्मुकमेस्मिन् पाणौ पाशं तथापरे ।
अन्यत् करचतुष्कं यदव्यग्रं पूर्ववद्भवेत् ॥ ४७ ॥

---

1. क–ग–दृग्गतोतोपेतं
2. ख–दक्षिणे दक्षिणोत्तरं इत्यक्षराणि दृश्यन्ते । इदं प्रमादपतितं समनन्तरार्धस्य अन्त्य पादगतम्
3. श्लो. ४७ अंशः
4. ख–इदमर्धं गलितम्

आकृतौ जलनाथस्य सदृशो सर्वदैव हि ।
वसुनाथं सुधानन्दमुदग्दिग्दक्षिणोत्तरे ॥ ४८ ॥

खड्गमुद्गरहस्तौ च प्राग्वच्छेषं चतुष्टयम् ।
कराणामनयोः कार्यं [1]रूपेणोडुपतेस्समौ ॥ ४९ ॥

ततस्सारसकह्लारसचक्रं कम्बुपालिभिः ? ।
.........वनमालाविभूषितम् ॥ ५० ॥

स्वस्ति[2]राम रक्षीश.........यमुनान्वितम् ।
पूर्णकुम्भश्रियोपेतं नागेन्द्रैस्सारसान्वितैः ॥ ५१ ॥

भूषयेद्द्वारशाखाभ्यामूर्ध्वो[3]दुम्बरकं द्विज ।
व्यालसिंहगजाश्वाद्यैरुदुम्बरमतस्ततम् ॥ ५२ ॥

पूर्वे (? श)णीयं ? न पूर्वोक्तैर्युक्तं कुर्यात कदाचन ।
त्रिभागेनोन्नतद्वार उच्छ्रायार्धेन सम्ययत् ? ॥ ५३ ॥

शाखाद्यैर्द्वारवत्युक्तं गवाक्षगणमीदृशम ।
[4]दिक्कलीकं (? कीलकं) समापाद्य द्विचतुष्षट्कसंख्यया ॥ ५४ ॥

द्वाराणां सगवाक्षाणां कपोतौ सुमनोहरौ ।
विचित्रचित्रौ पङ्क्तौ च [5]निसृतौ वा प्रकल्पयेत् । ॥ ५५ ॥

---

1. क–ग–रूपेण सुपतैः
2. ख–ग–रामपरक्षोशस्तवोवोयमुना
3. ख–दुम्बरके
4. क–विवक......समापाद्य
5. क–ख–ग–घ–निधमौ

दार्षयिसाङ्गोपेतरवद्वारादिकं द्विज ।
मित्तिरन्धं विनिश्चित्य विचिन्त्वीयात् क्रमेण तु ॥ ५६ ॥

स्तम्भविन्यासमधुना मण्डपानां निबोध तु ।
यागागारगणस्वल्पं [1]यत्तत् स्तम्भविवर्जितम् ॥ ५७ ॥

शेषस्तम्भयुतं कुर्याद्यथा तत् कथयामि ते ।
बलिभूमिसमीपानां यागभूमेस्समन्ततः ॥ ५८ ॥

त्यक्त्वा भू (? भ्र) मणिभूभागात् स्तम्भविन्यासमुच्यते ।
[2]प्रच्यादिदिक्चतुष्कं तु मध्यसूत्रेण पौष्कर ॥ ५९ ॥

समीक्षयित्वा तान् सर्वांस्तत्र स्तम्भावलिं न्यसेत् ।
पूजार्थमुपविष्टस्य स्तम्भेन स्याद्यथाक्रमम् ॥ ६० ॥

स्तम्भानामन्तरं चैव सन्ततस्संख्यया यजेत् ।
चतुष्कमष्टकं चैव चतुष्कं च द्विरष्टकम् ॥ ६१ ॥

त्रिरष्टकं च स्तम्भानामथवा चतुरष्टकम् ।
तत् सार्धं द्विगुणं वाऽथ ज्ञात्वा मण्डपविस्तृत (? ति) म् ॥ ६२ ॥

[3]स्तम्भानि च सुवृत्तानि अष्टाश्राण्यथवा द्विज ।
द्विषट्कषोडशाश्राणि नानाकर्मयुतानि च ॥ ६३ ॥

---

1. ख–तत्तत्तत्त्
2. क–ग–प्राच्याद्य
3 क–ग–स्तम्भानिव सुवृत्तानि

शिष्टानामर्धे[1]विस्तारात् तत्रियं वाऽथवा द्विज ।
स्थूलान्यथ यथालाभं तथा रव्य (? चायव्य)पेक्षया ॥ ६४ ॥

अथ भित्तिसमाविष्ट आसनादिविभूषितम् ।
चतुरभ्यधिकं चैव स्तम्भेभ्यः कन्यकागणम् ॥ ६५ ॥

नियोनियम ? (? नियमोऽस्यतु) सर्वत्र नियमोऽयं न पौष्कर ।
यत्र स्तम्भो नरजितास्तत्र स्तम्भसमन्वितम् ॥ ६६ ॥

[2]चतुरश्रचतुष्पष्टिसंख्यास्तम्भा[3]विव········ ।
अन्यपूर्णानि धामानि चतुष्कं कन्यका न्यसेत् ॥ ६७ ॥

स्तम्भानां रचनाद्यानां स्तम्भाव्यास ? महामते ।
द्व्यर्धभागप्रमाणेन तासां विस्तारमाचरेत् ॥ ६८ ॥

त्रिभागेन स्वविस्तारं तद्बाहुल्यं तु पद्मज ।
एवमादीनि सर्वेन [4]युग्मास्तम्भगणाः पुरा ॥ ६९ ॥

कृत्वा तदूर्ध्वगं पश्चात् समारोप्यस्तुलागणः ।
ऊर्ध्वं तच्छादनार्थं तु यथा तद्वदतश्शृणु ॥ ७० ॥

भित्तिबन्धं पुरा कृत्वा युक्तितः कन्यकागणम् ।
बन्धैः [5]कार्ष्णायसाद्यैस्तु यथादौ लभमग्रजम् ॥ ७१ ॥

---

1. क–विस्तार......यं वा
2. क–ग–चतुरष्टचतु
3. ख–विवर्जनम् ग–विवर्जया
4. क–ग–युगास्तम्भ
5. ख–काष्ठायसा

शावयन्ते [1]हारमु.........न यात्युम्भूलता यथा ।
त्रिचतुःपञ्चहस्ताद्वा प्रमाणं चतुरङ्कणम् ॥ ७२ ॥

स्तम्भानामग्रतस्ताक्ष्यों यागभूमे[2]र्द्विजो ध्वजः ।
सन्धार्य बल्वंशैस्तु सुस्पष्टैस्सुदृढैस्ततः ॥ ७३ ॥

स्तम्भकन्याशिरोबन्धं कृत्वा यत्नेन वेतुला ? ।
पुरा मूलं न्यसेद्भित्ति नो[3].........र्गतम् ॥ ७४ ॥

वेधयित्वा ततो मूलं तस्मिन् काष्टे भुजं न्यसेत् ।
भित्तिजं लम्बमानस्य स्थूलतुर्यांश्रलक्षणम् ॥ ७५ ॥

दृढकाष्ठसमुद्भूतैस्सस्थूलैर्बहुभिस्तथा ।
स्तम्भानां कन्यकानां च तुल्यानां तु तथा द्विज ॥ ७६ ॥

बन्धश्च सदृशं दद्यात् पात्रैश्चायसनिर्मितैः ।
शङ्कुभिश्शृङ्खलाद्यैश्च बहुभिस्स्याद्यथाचलम् ॥ ७७ ॥

तुलामूलप्रदेशेऽथ भित्त्यादुपरि पौष्कर ।
इष्टकाभिः सुधालेपैः [4]कुर्याच्छीर्षगणं महत् ॥ ७८ ॥

अथ चन्द्रसमाकारमथवाङ्क (? म) [5]लसारवत् ।
क्रममाणविलाकाशं ? तदूर्ध्वे खं विराङ्गणम् ॥ ७९ ॥

---

1. हारमुबगौसुं
2. ध्वजो द्विज इति चेत् साधु
3. ख–ग–नो किं चिदेवि
4. क–कुर्याद्विधिगणं
5. क–सारयत्

[1]त्रिमण्याख्यं कृतं मार्गं भित्तेस्स्तम्भावसातन (? नक)म् ।
तुलानामूर्ध्वगं सर्वं भित्तिभूमिं समापयेत् ॥ ८० ॥

सह मृत्काष्ठवर्गैस्तु चूर्णेन क्षीयते न तु ।
तुलाशयस्यैवमेवं स्थितिं कृत्वा च[2]वर्ष्मतः ॥ ८१ ॥

कुर्यात्तदग्रतो भूयश्चितिं चावलसिद्धयेत ? ।
स्तम्भप्रदेश[3]कण्ठानां रोप्यो बहुगुणो दृढम ॥ ८२ ॥

निर्गतं च तुलान्तं यत् तच्छिरोपरि विन्यसेत् ।
तुलया सह तद्बाहुं प्रायश्शस्त्रेण बन्धयेत् ॥ ८३ ॥

किन्नरोरगगन्धर्वयक्षविद्याधरैस्सह ।
क्रीडमानास्स्वकान्ताभिस्ते च कार्यास्तुलाधराः ॥ ८४ ॥

ततस्तुलानामग्रे तु सुलग्नां स्तम्भसन्ततिम् ।
किञ्चित् समुच्छ्रितं दत्त्वा परितः पद्मसम्भव ॥ ८५ ॥

[4]शङ्को............च्छादनस्य स्थितस्य च ।
स्तम्भानामूर्ध्वगं दद्यान्नियुतं तु तुलागणम ॥ ८६ ॥

तत्तुलामूर्ध्वगं दद्याद्बाहुं कुब्जप्रसारितम् ।
सुगन्धमावसेनैव विश्रान्तं प्राक् तुलोपरि ॥ ८७ ॥

---

1. क—क्रमव्यालयं तु तम्मार्गं
2. ख—वर्गतः
3. ख—कर्णानामाप्यो
4. ख- शङ्कोश्शनार्थमुतीव ग—शङ्कोश्शनार्थमुत्थीय

तस्यापि [1]पूर्ववद्दद्याद्बन्धं च तुलया सह ।
उपबाहुद्वयेनापि तिर्यग्युक्तेन [2]सार्यताम् ॥ ८८ ॥

प्राक् पूर्वं च तुलाग्रस्थं दद्यादग्रभुजं पुनः ।
पश्चादुपतुलानां तु अग्रतो वंशसन्तति ॥ ८९ ॥

रोप्यं संकोपयेदग्रमप्रसुप्तमिवाम्बुजम् ।
तिर्यक् प्रसारितैर्वंशैर्लघुभिर्लघुभिः क्रमात् ॥ ९० ॥

प्रपूर्यमन्तिकं तं तु छादनीयं च तत्ततः ।
तनुभिर्लघुभिश्चैव काष्ठैरेश्च गणैर्दृढैः ॥ ९१ ॥

[3]वर्गैर्मृण्मयैर्वाथ कोय ? सन्धरणक्षमैः ।
भित्तौ भित्तौ चतुर्लेर्वा प्रलयानि च योज्य च ॥ ९२ ॥

मध्ये मस्तकचन्द्राणां चन्दनाद्यच्युतस्य च ।
कदाचित् तस्य मेघोत्थं मेघस्य [4]वहनाय च ॥ ९३ ॥

पादपृष्ठयुते देशे.........काले ह्युपार्जिते ।
क्षिप्रकर्मप्रसिद्ध्यर्थं शरकाष्ठमयं शुभम् ॥ ९४ ॥

गवाक्षकान्वितं चैव द्वारैस्तु परिभूषितः ।
छन्नं वितानकेनोर्ध्वे प्राकारं परिकल्पयेत् ॥ ९५ ॥

---

1. ख–पूर्ववद्दत्वा बन्धं
2. ख–साध्यतां
3. क–वर्ग.....सन्धारण
4. सर्वत्र 'वाहनाय च' इत्येव वर्तते

रजोनिर्मुक्तयागानां [1]दिक्.........पलिखितात्समम् ।
गैरिकाकुङ्कुमाद्यैश्च स्त्रीणां नानाविशेषतः ॥ ९६ ॥

दीर्घकालीयकानां तु कुर्यात् पक्वेष्टकादिकैः ।
प्राकारं गोपनार्थं तु प्रोन्नतं सुदृढं महत् ॥ ९७ ॥

चतुरश्रं [2]सुवृत्तं च त्रिकोणं वा मनोहरम् ।
सदृशं पूज्ययागस्य [3]तज्ज्ञानकलितं दृढम् ॥ ९८ ॥

कृत्वैवं मण्डपं युक्त्या तन्मध्ये तु प्रकल्पयेत् ।
दृढां समां तदाकारामीषत् प्रागुत्तरप्लवाम् ॥ ९९ ॥

प्रोच्छ्रितां च विशेषेण स्थलां दर्पणसन्निभाम् ।
[4]सामान्या न भवेद्येन मेदिनी मण्डपस्य तु ॥ १०० ॥

तत्तु पूजोत्सुकामानां ? कुर्यादीनां ? तु पौष्कर ।
विविक्तेनाङ्गुलानां तु प्रोन्नतेर्यावदष्टकम् ॥ १०१ ॥

एकवृद्ध्याल्पवेश्मानां नित्यं कुर्यात् स्थलागणम् ।
नाकाङ्गुलोन्नतेस्तद्यावत पञ्चदशाङ्गुलम् ॥ १०२ ॥

प्रोन्नतत्वं स्थलानां च मध्यमेषु गृहेषु च ।
चतुर्विंशत्यङ्गुलान्तमुच्छ्रायं षोडशाङ्गुलम् (लात्) ॥ १०३ ॥

---

1. ख–ग–दिक्पलोल
2. ख–सुवृत्तं तु
3. क–ग–तज्ज्ञान
4. ख–सामान्या तु

प्रागेव वृद्धया कर्तव्यं ज्येष्ठाकारं गणस्य च।
एतदुच्छ्रायमानं तु कथितं ते स्थलासु च ॥ १०४ ॥

पादमर्धं तु हस्तं वा विस्तारात सर्वदिक्षु वै।
स्थलानामिष्टकाद्यैश्च चिन्वीयात् प्रथमं ततः ॥ १०५ ॥

मृदा संपूर्य तन्मध्यमीषद्वालुकयाऽन्वितम्।
परीक्ष्य केशकीटादीनारोग्यं तदनन्तरम् ॥ १०६ ॥

यावद्भवति पूर्वोक्तं लक्षणं वा विशेषतः।
स्थलीं मध्योदितां रम्यां [1]सप्तमाहं परीक्ष्य च ॥ १०७ ॥

न ददाति यथा भेदं यागयोग्या भवेत्ततः।
प्रतिष्ठाप्य ततो ब्रह्मन् वेदिकातोरणान्विताम् ॥ १०८ ॥

बहिश्चतुष्किकाश्राणां समीपे न तु दूरतः।
चतुष्पादसमायुक्तमनेकाङ्घ्रियुता यदि ॥ १०९ ॥

मध्यदेशाच्चतुर्दिक्षु सुसमेष्वन्तरेषु च।
कुर्याद्वै पादविन्यासं वेदैर्वेदविदां वर ॥ ११० ॥

चतुर्द्वादशपादा सा विंशत्यङ्घ्रिसमन्विता।
अष्टाष्टाधिकवृद्धया वा संयुगापादसन्तते ॥ १११ ॥

क्षमाविस्तारजेनैव मिश्रैराधेयविंशकैः।
तस्मिन् यागगृहे दत्ता पुरा स्तम्भावली शुभा ॥ ११२ ॥

---

[1] सप्तमासं

चत्वारि तोरणान्यस्मिंश्चतुर्दिक्षु नियोज्य च ।
त्रीणि त्रीण्यथवा सम्यगेकैकस्यां न्यसेद्दिशि ॥ ११३

बुद्ध्वा मण्डपविस्तारपञ्चकं सप्तकं तु वा ।
वेश्मनि स्तम्भहीने तु वेदिकातोरणस्य तु ॥ ११४

कार्या लक्षणसंयुक्ता यादृक् तदवधारय ।
पूर्वं सामान्यमानेन सविशेषेण वै ततः ॥ ११५

पावनैर्यज्ञकाष्ठैश्च सुदृढैस्सरलैस्समैः ।
तुलायामोद्भिन्नैर्दण्डैस्स्वस्वरांशविवर्धितैः ॥ ११६

वेदवेदविदां श्रेष्ठ प्रोच्छ्रायेण भवेच्छुभः ।
तेनैवायामयोगेन कुर्यात् पादाधिकेन च ॥ ११७

तोरणानां समुच्छ्रायं तत्त्रिभागेन विस्तृतिः ।
तद्दण्डनिचयं सर्वमूर्ध्वदण्डगणं विना ॥ ११८

त्रिधा कृत्वा समैर्भागैरूर्ध्वगा वर्तुला भवेत् ।
तदधस्तद्द्वितीयं यत् तदष्टाश्रं समापयेत् ॥ ११९

चतुरश्रं तृतीयं तु [1]भागात्तत्तदधः स्थितम् ।
सर्वाण्याधेयदण्डानि सर्वतो वर्तुलानि च ॥ १२०

चतुरश्राणि वा कुर्यान्नानाकयुतानि च ।
सपुष्पमञ्जरीपत्रविहगैरन्वितानि च ॥ १२१

---

1. च—भागंततवधः

त्रिचतुःपञ्चषट्सप्तस्योल्यावष्टाङ्गुलानि च ।
अष्टमाशायो (? मांशैर्यो) विन्यस्तु वेदिकत्रिखने क्षितौ ॥ १२२ ॥

तत्समं तोरणं चान्यन्न्यस्येद्भूमौ द्विजांशकम् ।
इति सामान्यमानेन युक्तयुक्तं च लक्षणम् ॥ १२३ ॥

वेदश्चरणदण्डानां [1]तद्विशेषान् शृणुध्व भोः ।
[2]हरेरूर्ध्वात् षडंशं तु त्यक्त्वा पञ्चांशसंमितम् ॥ १२४ ॥

एतद्द्वादशमांशेन तोरणं मानमब्जज ।
सममध्यत्रिभागं च सर्वदण्डेषु भूगतम् ॥ १२५ ॥

मुखपोन्नतेभ्यस्सारेभ्यः प्राकारेष्वथ वेश्मनाम् ।
मन्दिरे स्तम्भसंयुक्ते तोरणोच्छ्रायमब्जज ॥ १२६ ॥

स्तम्भायामसमं [3]कुर्यात्तद्दण्डौ विन्यसेत् क्षितौ ।
स्तम्भमस्तकमानेन साधिकेन तदेव हि ॥ १२७ ॥

[4]स्तम्भपादोन्नतस्थेन प्रमाणेन प्रकल्प्य च ।
वैपुल्यं तोरणानां च स्तम्भाभ्यन्तरगास्थितम् ॥ १२८ ॥

तदेवेन्द्रस्वरूपेण कार्या वेदविदां वर ।
चक्रद्वितयमध्यस्थं [5]पक्षमण्डलमण्डितम् ॥ १२९ ॥

---

1. क–ग–तद्विशेष......शृणु
2. क–ख–..........षडंसं तु
3. ख–तद्दण्डं
4. ग–स्तम्भपादां ततस्तेन
5. क–ग–पक्ष

तोरणे तोरणे कुर्याद्गरुडं चोर्ध्वसंस्थितम् ।
[1]तूपेरश्रमपारं ....सचित्रं चित्रयेत् ततः ॥ १३० ॥

मुनिसिद्धामर [2]प्रान्तैरनेकाद्भुतदर्शिभिः ।
दिशापालवनोद्यानैर्बहुभि[3]र्मृगयूथपैः ॥ १३१ ॥

तद्यागवेश्म सकलं रञ्जनीयं प्रयत्नतः ।
कुर्यात् सुधाविलिप्तं वा भूषयेत्तदनन्तरम् ॥ १३२ ॥

दर्पणैश्चामरैर्वस्त्रैर्दुकूलैर्विविधोज्ज्वलैः ।
घण्टाभिरर्धचन्द्राचैरातपत्रैर्मनोरमैः ॥ १३३ ॥

विचित्रेण वितानेन सुसितेनोज्ज्वलेन वा ।
कर्णिकाजालयुक्तेन वेदेरूर्ध्वं तु भूषयेत् ॥ १३४ ॥

प्रागुत्तराद्यु दिग्भागाद्यावत्कोणं तु मारुतम् ।
सितादिवर्णभेदोत्थाः पताकास्तत्र योजयेत् ॥ १३५ ॥

एवं रागविभागेन प्रत्यग्भागाच्च वै पुनः ।
दक्षिणाशाविधिर्यावद्द्वितीयं च चतुष्टयम् ॥ १३६ ॥

एकेन [4]सर्वाणि च.........उभो कुर्याद्वितानके ।
तोरणं यो वितानं च समानं विनिवेशनम् ॥ १३७ ॥

---

1. ग–कूपेरश्रम
2. ख–प्रान्तै
3. क–ग–गुरुयूथपैः
4. ख–सर्वपर्णा च

ध्वजाष्टकं समारोप्य यथा तदवधारय ।
वह्निकोणात् समारभ्य यावत्कोणं तु शाङ्करम् ॥ १३८ ॥

सितारुणे च पीतं च कृष्णं कुर्याच्चतुष्टयम ।
भूयश्चोत्तरदिग्भागा यावद्दिक्पश्चिमं द्विज ॥ १३९ ॥

[1]तथाविधाश्चतुष्कं तु ध्वजानां परिकीर्तितम् ।
राजपाषाणवर्णाभं चक्रपक्षीश्वरोपगम् ॥ १४० ॥

वैजयन्तीत्रयं कुर्यात् तोरणे पूर्वदिक्स्थिते ।
दक्षिणे स्फटिकाभं तु प्रत्यक् सिन्दूरवर्चसम् । ॥ १४१ ॥

हेमाभं चोत्तरे कुर्यात् तोरणे ध्वजकत्रयम् ।
चतुष्केण पताकानां युक्तं श्वेतादिकेन तु ॥ १४२ ॥

एकैकं तोरणं यत्र त्रितयं पञ्चकं तु वा ।
अर्धेन तोरणायामात् पताकानां च [2]दीर्घता ॥ १४३ ॥

विस्तारं [3]सार्धभागेन तासां कुर्यात्तु सर्वदा ।
ध्वजानां तु समुच्छ्रायं पूर्वोक्तमथवाब्जज ॥ १४४ ॥

---

1. ख–तथाविधं पातकं तु
2. क–ग–वीधिका
3. ख–स्वार्धं

तोरणार्धसमं कुर्यात् त्र्यंशेन [1]स्वैव विस्तृतिः ।
ध्वजास्त्रवाहनोपेता [2]भागेष्वनुचरैर्विना

कार्या दिग्देवतास्सर्वा [3]यथाध्य.........विनिर्मिता ।
एवमेव प्रकारेण द्वारेषु सुसमेषु च

चण्डाद्यं च सुभद्रान्तं बहिरङ्गगणाष्टकम् ।
[4]कुमुदाद्यन्तरङ्गं च भूतानामष्टकं परम्

तोरणं तुर्यभागेन दैर्घ्यं तेषामुदाहृतम् ।
दैर्घ्यं चतुर्थभागेन विस्तारस्य[5].........

शतधामनिभं ध्यायेच्चतुर्बाहुं पुरन्दरम् ।
[6].........संस्थं तु [7]सुतीक्ष्णं कुलिशोद्यतम्

अजारूढं [8]स्मरेद्रक्तं शक्तिपाणिं हुताशनम् ।
सहस्रार्चिभिराकीर्णं सहस्रादित्यभास्वरम्

---

1. क–सैव
2. ख–भागैः स्वानु
3. ख–यथाध्याय ग–यथाध्यवा
4. ख–कुमुदाद्यं द्विरङ्गं च
5. ख–पतगेषु च ग–स्याप्तगेषु च
6. क–सुवि......तु ख–श्वेतद्विपस्य ग-सुवितद्विपलब्धं
7. ख–सुकीर्ति
8. क-ग–स्मरेद्वृत्तं

महामहिषसंस्थं तमञ्जनाद्रिसमप्रभम् ।
सुभीमं दण्डहस्तं तु स्मरेद्देवमपीश्वरम् ॥ १५१ ॥

दंष्ट्राकरालवदनं कृष्णमेघसमप्रभम् ।
घोरं प्रेतासनं ध्यायेत् खड्गधृग्राक्षसेश्वरम् ॥ १५२ ॥

मुक्ताफलद्युतिसमं हिमपाशकरोद्यतम् ।
नागकन्यासहस्राढ्यं मकरस्थमपांपतिम् ॥ १५३ ॥

नीलतोयदसङ्काशं महाध्वज[1]पदाङ्कितम् ।
ध्यायेत् समीरणं देवं संस्थितं हरिणोपरि ॥ १५४ ॥

सोमं तारागणोपेतं शङ्खगोक्षीरपाण्डरम् ।
बृहच्छशकपृष्ठस्थं शशिं रात्रिकरं स्मरेत् ॥ १५५ ॥

सितभूतिविलिप्ताङ्गं त्रिनेत्रं वृषवाहनम् ।
त्रिशूलायुधहस्तं च ईशानं ज्ञानिनं स्मरेत् ॥ १५६ ॥

पातालदिग्गतं ध्यायेत् [2]कूर्मारूढं हलायुधम् ।
सितं सहस्रफणभृ[3]द्योऽनन्तो नाम नागराट् ॥ १५७ ॥

[4]भूचक्रं भ्राम्यमाणं तु दण्डहस्तं प्रजापतिम् ।
हंसारूढं [5]स्वसंस्थं च ध्यायेद् ध्रुवमजं विभुम् ॥ १५८ ॥

---

1. ख–पटाङ्कितं
2. ख–कूर्मरूपं
3. क–ग–द्येनान्तो ख–द्येनन्तो
4. क–द्विचक्रं
5. ख–खगस्थं च

एते चतुर्भुजास्सर्वे अक्षसूत्रविभूषिताः ।
चिन्तयन्तः परं तत्त्वं [1]वराभयकरास्सदा ॥ १५९ ॥

दिव्याभरण[2]दिग्धाङ्गा दिव्यमाल्याम्बरान्विताः ।
दिव्यरूपधराश्चैव दिव्यगन्धवहा द्विज ॥ १६० ॥

एभ्यश्चतुर्भुजो ब्रह्मन् विज्ञातो वृषभध्वजः ।
द्विभुजास्त्रकराश्चान्ये वरदाभयदास्तु वा ॥ १६१ ॥

इति लोकेश्वरेषूक्ता ? चण्डादीनामथोच्यते ।
बहिरङ्गगणानां च ध्यानं [3]सम्यक् क्रमेण तु ॥ १६२ ॥

तरुणादित्यसङ्काशो महोरस्कश्चतुर्भुजः ।
उन्नतश्चोन्नतांसश्च पूर्णाङ्गो नातिमांसलः ॥ १६३ ॥

घनोदरो निम्ननाभो रोमराजिविराजितः ।
दंष्ट्राकरालवदनः पिङ्गलश्मश्रुलोचनः ॥ १६४ ॥

मधुपिङ्गलनेत्रश्च कुटिलभ्रूलतायुतः ।
प्रलम्बलोलश्रवणः पृथुघ्राणस्मितराननः ॥ १६५ ॥

कुण्डलालङ्कृतश्चैव हारकेयूरभूषितः ।
बद्धोष्णीषललाटश्च नीलकेशाद्यलङ्कृत ॥ १६६ ॥

---

1. क–ग–चरकायकराः
2. क–ग–सन्दिग्धां
3. ख–सर्वं क्रमेण तु

शुक्लाम्बरधरस्स्राग्वी भुजयुग्मेऽस्य दक्षिणे ।
[1]प्रेषतं संस्मरेच्चक्रं प्रज्वलन्तीं गदां परे ॥ १६७ ॥

श्रोणीतटनिषण्णां च विश्रान्तां वसुधातले ।
पूर्वे वामकरे शङ्खमन्यस्मिंश्चाक्षसूत्रकम् ॥ १६८ ॥

एवं गणाधिपश्चण्डो विक्रमेणापराजितः ।
क्रुद्धो विघ्नायुतानां च क्रमात् संहरणक्षमः ॥ १६९ ॥

आवाह्य मन्त्रनाथस्य तोरणे पुरतःस्थिते ।
विनिवेश्य यथा तत्र दक्षिणेन विभोर्भवेत् ॥ १७० ॥

स्याद्गुरोर्यजमानस्य वामभागे सदैव हि ।
तत्रैवापरभागे तु [2]प्रचण्डं त्वीदृशं न्यसेत ॥ १७१ ॥

किन्तु सव्यापसव्याभ्यां भुजाभ्यां स्याद्विपर्ययः ।
भुजद्वयेन चण्डस्य वामे संपरिकीर्तितम् ॥ १७२ ॥

दक्षिणे तत्प्रचण्डस्य ध्येयं वा परिकल्प्य च ।
पद्मगर्भप्रतीकाशौ तादृशौ भीमविक्रमौ ॥ १७३ ॥

रक्ताम्बरधरौ चैव रक्तस्रगनुलेपनौ ।
गणौ धातृविधातारौ देवौ दक्षिणतस्स्थितौ ॥ १७४ ॥

---

1. ख—ध्यात्वा तं संस्मरे
2. ख—प्रचण्डसदृशं

अतसीकुसुमश्यामो पीतमाल्याम्बरान्वितो ।
[1]पीतोष्णीषधरौ रौद्रौ प्राग्वद्भुजविभूषितौ ॥ १७५ ॥

गणौ चण्डाकृतिधरौ दुर्दर्शौ दुरतिक्रमौ ।
जयं च विजयं नाम्ना प्रत्यग्भागे तया न्यसेत् ॥ १७६ ॥

क्षीरकुन्दावदातौ च नीलकौशेयवाससौ ।
नीलनीरदवर्णाभैः पुष्पैर्भूषितविग्रहौ ॥ १७७ ॥

पूर्वोक्तगणसादृश्यौ नाम्ना भद्रसुभद्रकौ ।
न्यसेत्तोरणदण्डाभ्यां मन्त्रमूर्ते[2]रुदग्दिशम् ॥ १७८ ॥

एते गणेश्वरा ह्यष्टौ प्रभापुष्पाम्बरैर्विना ।
देहवक्त्राकृतेस्तुल्यौ तथैवाभरणायुधैः ॥ १७९ ॥

भक्तानां विघ्नजालस्य सर्वदिक्संस्थितस्य च ।
संसारफलदातुर्वै छेदनार्थं समुद्यतौ ॥ १८० ॥

परस्परमुखास्सर्वे स्थानकैस्संस्थितास्समैः ।
गणेशायुतलक्षैस्तु नानावर्णवपुर्धरैः ॥ १८१ ॥

अच्युताराधनपरैरेकैकं परिवारिताः ।
अथाग्रे लोकनाथस्य पूज्यौ द्वौ गणनायकौ ॥ १८२ ॥

कुमुदः कुमुदाक्षश्च प्रसन्नवदनेक्षणौ ।
तुहिनाचलसङ्काशौ प्रथमे वयसि स्थितौ ॥ १८३ ॥

---

1. ख—बद्धोष्णीष
2. क—ग—ववग्भूशां

नानाभरणदिग्धाङ्गौ नानाकुण्डलभूषितौ ।
नानामाल्यान्वितौ चैव नानामौलिधरौ द्विज ॥ १८४ ॥

नानागन्धविलिप्ताङ्गौ नानावस्त्रविभूषितौ ।
कुमुदाख्यगणेशस्य [1]ध्यातव्यो दक्षिणः करः ॥ १८५ ॥

चन्द्ररश्मिप्रतीकाशचामरेण विराजितः ।
अभिगच्छाभयं ध्यायेद् द्वितीयं [2]दक्षिणं करम् ॥ १८६ ॥

भवभङ्गात् प्रपन्नानां परेषां गुणशासने ।
तस्यैवाद्यं वामकरं प्रबुद्धकमलोद्यतम् ॥ १८७ ॥

[3]तूष्णीं मीसूचकं ध्याये[4]द्द्वितीयानां करं परम् ।
एते द्वे कुमुदाक्षस्य वैपरीत्येन भावयेत् ॥ १८८ ॥

द्वाभ्यां द्वाभ्यां कराभ्यां तु अन्येषामेवमेव हि
पुण्डरीको वामनश्च द्वावेतौ हुतभुक्प्रभौ ॥ १८९ ॥

गरुडध्वजहस्तौ च शेषमन्यत् पुरोदितम् ।
कृत्वा ध्यात्वाथवा न्यस्य दक्षिणे भगवद्गृहे ॥ १९० ॥

शङ्कुकर्णाभिधानो यस्सर्वनेत्रश्च पौष्कर ।
द्वावेतौ चम्पकाभौ तु मायूरव्यजनोद्यतौ ॥ १९१ ॥

महाविभूतेर्देवस्य प्रत्यग्वायुदिगास्थितौ ।
सुमुखस्सुप्रतिष्ठश्च वामभागगतौ विभोः ॥ १९२ ॥

चिन्त्यौ मुद्गफलश्यामावातपत्रकरोद्यतौ ।
नोक्तं शेषकराणां यत् तद्विद्धि कुमुदोद्यतम् ॥ १९३ ॥

एते भगवतो विप्र त्वन्तरङ्गा मयोदिताः ।
कर्मणा मनसा वाचा तद्भावगतमानसाः ॥ १९४ ॥

ज्ञानादिषड्गुणोपेतैराकीर्णाः कोटिशः परैः ।
भूतैस्सिद्धैरनन्तैश्च प्रार्थयानैः परं पदम् ॥ १९५ ॥

एवं कृते ततः पश्चाद्वेदिकातोरणैस्सह ।
[1]विलिप्य चन्दनाद्यैश्च गन्धर्वर्णोज्ज्वलैः क्रमात् ॥ १९६ ॥

चन्दनेन समालभ्य सेलेनोत्त[2]रदिग्गतम् ।
क्षीरेण चन्दनेनैव कुङ्कुमेन [3]कृतां स्थलीम् । ॥ १९७ ॥

रजनीचूर्णयुक्तेन ह्रीबेरेणाम्बुना सह ।
पुण्याहमोषधिभ्यां तद्द्वाराणां मण्डपावनिम ॥ १९८ ॥

ततस्तु विविधैर्धूपैर्बहुमिर्धूपयेद् द्विज ।
वैराजभुवनाकारं श्वेतद्वीपोपमं तु वा ॥ १९९ ॥

---

1. ख–विलिख्य
2. ख–रथुर्गतम्
3. ख–कृतं स्थलम्

कलृप्तंवं मन्त्रमूर्तेस्तु यजनोद्यानमुत्तमम् ।
भक्तानामधिवासार्थमभिषेकावसानिकम् ॥ २०० ॥

शास्त्रोक्तभोग[1]मोक्षान्तं तत्र सर्वं समापयेत् ।
युक्तमेकप्रवेशेन यागाग्रस्थदिशं विना ॥ २०१ ॥

दिक्त्रयेऽभिमतायां वा [2]कुर्याद्भवनमण्डपम् ।
धूमनिर्गमनोपेतं नानाकुण्डविभूषितम् ॥ २०२ ॥

साज्यैश्च सपलाशैश्च संयुक्तं तोरणादिकैः ।
त्रिविधं कृतकौशेयं मेखलादाममण्डितम् । ॥ २०३ ॥

अभग्नमूलप्रान्तैर्हि[3]दर्भाभिः ! कमलोद्भव ।
वेदितोरणदण्डानि सर्वाणि परिवेष्ट्य च ॥ २०४ ॥

[4]भौमस्थानं यथाभागं दर्भैर्बहुशिरोरुहैः ।
विधून्वन्तमिवात्मानं सारङ्गेण समन्ततः ॥ २०५ ॥

मृदा गोमयमिश्राया ! मुपलिप्य यथाविधि ।
गुग्गुलैराज्ययुक्तैश्च धूपयेच्च हुनेत्ततः ॥ २०६ ॥

---

1. क—मोक्षं तु
2. ख—कुर्यात् सवन
3. ख—इन्द्राभिः
4. ख—भौमस्थाने

ततस्सांसारिकानर्थान् सर्वान् भक्तजनस्य च ।
मन्त्रात्मा सुप्रसन्नस्तु [1]निर्दहत्यग्निमध्यतः

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
यागमण्डपलक्षणो नाम चतुर्थोऽध्यायः ।

---

1. ख–दन्दहत्यग्नि

अथ पञ्चमोऽध्यायः

पौष्कर उवाच—

याग (? गा)स्तु देवदेवेश भद्रादीनि (? नि्ह) प्रमाद्वद ।
यैर्दृष्टैस्समयी शश्वत् पुत्रवत्वं प्रपद्यते ॥ १ ॥

श्रीभगवानुवाच–

मण्डलं सर्वतोभद्रं भद्रकृत् प्रथमं स्मृतम् ।
अघनिर्मोचनं नाम द्वितीयं यस्य दर्शनात् ॥ २ ॥

अनेकजन्मोपात्तं तु कल्मषं क्षयमेति च ।
सद्ध्वं स्यात् तृतीयं च [1]धर्ममार्गप्रदर्शनम् ॥ ३ ॥

धर्माख्यं स्याच्चतुर्थं तु धर्मं यच्छति पूजनात् ।
पञ्चमं वसुगर्भं तु भक्तानां वसुवृद्धिकृत् ॥ ४ ॥

सर्वकामप्रदं यागं षष्ठमिच्छाफलप्रदम् ।
अमित्रघ्नमतः प्रोक्तममित्रौघविनाशनम् ॥ ५ ॥

आयुष्य[2]मष्टकं (मं) प्रोक्तं यस्य पौष्करदर्शनात् ।
परमायुरवाप्नोति अपमृत्युं जहाति च ॥ ६ ॥

नवमं बलभद्रं तु बलोत्साहसमृद्धिकृत् ।
पौष्टिकं नाम दशमं पुष्टिकृत् पूजनाच्च वै ॥ ७ ॥

---

1. ख—कर्ममार्गं
2. सर्वत्र ' अष्टकम् इत्येवास्ति

अथारोग्यप्रदं नाम सर्वामयविनाशनम् ।
द्वादशं च विवेकाख्यं फलं नामानुरूपकृत ॥ ८ ॥

एतस्मात् परमं याग वागीशं नामतः स्मृतम् ।
येन संदृष्टमात्रेण वाग्विभूतिः प्रवर्तते ॥ ९ ॥

चतुर्दशं मानसं स्यात दर्शनात सौमनस्यकृत ।
अतः पञ्चदशं याग जयं नाम जयप्रदम् ॥ १० ॥

षोडशं स्वस्तिकाख्यं तु स्वस्तिकृद्विप्रपूजनात ।
परमस्य तु यागस्य त्वनन्तं नाम कीर्तितम् ॥ ११ ॥

तदनन्तसुखावाप्ति संप्रच्छत्याशुदर्शनात ।
नित्यं नामाष्टदशमं (?) नित्यतृप्तिपदं तु तत ॥ १२ ॥

भूतावासमतो नाम्ना मण्डलं मण्डलान्वितम् ।
यद्[1]दृष्ट्वा भविनां शश्वद्भवेद्भूतजयं (? यो) द्विज ॥ १३ ॥

अतः परममोघाख्यं यागं येन निवर्तते ।
ममता पूजितेनैव देहिनां भवसागरात ॥ १४ ॥

सुप्रतिष्ठितमतो यो हि (? यागं) संपूजितेन वै ।
दृष्टेन परया भक्त्या मनश्शान्तिमवाप्नुयात ॥ १५ ॥

बुद्ध्याधारमतः प्रोक्तं येन संपूजितेन तु ।
प्राप्नुयाच्च प्रतिष्ठानां बुद्धिं ब्रह्म (न) स्वके पदे ॥ १६ ॥

---

1. ख-घ-यं दृष्ट्वा

गुणाकर इति ज्ञेयं मण्डलं यत्र पौष्कर ।
गुणसङ्घः क्षयं याति [1]हृदि ध्यानाच्च पूजनात् ॥ १७ ॥

अस्यापरं [2]महायागं ध्रुवाग्र्यं च प्रकीर्तितम् ।
येनावलोकितेनैव संसारी समवाप्नुयात् ॥ १८ ॥

स्वात्मन्यवस्थितं (? ति) सम्यङ् न भूयः प्रकृतिं व्रजेत् ।
मण्डलं परमानन्दमेतत् स्यात् परमं पदम् ॥ १९ ॥

यद्दृष्ट्वा पूजयित्वा च परं पदमवाप्नुयात् ।
एतेषां क्रमशो ब्रह्मन् लक्षणं चावधारय ॥ २० ॥

क्षेत्रं कृत्वा चतुरश्रं सप्तधा विभजेच्च तत् ।
शतार्धमेकहीनं तु कोष्ठकानां तु जायते ॥ २१ ॥

मध्यतो नवभिर्भागैः पद्मं तु परिकल्पयेत् ।
पंक्तिद्वयेन द्वाराणि [3]सत्को (? सको)णानि भवन्ति हि ॥ २२ ॥

पद्मक्षेत्रसमीपाच्च [4]दक्षैरेव (? पंक्त्यैकैकं) तु मार्जयेत् ।
[5]कोष्ठक (कं) द्वारकण्ठार्धे (? र्धं) त्रीणि त्रीणि च तद्बहिः ॥ २३ ॥

---

1. क–निदिध्यानाच्च
2. क–घ–महायागतद्यजं
3. क–ग–स च कोणा भवन्ति
4. ख–दीक्षैरेव
5. ख–कोष्ठकं द्वारं

उपकण्ठप्रसिद्ध्यर्थं द्वाराण्येवं भवन्ति हि ।
षट्कं षट्कं पदानां तु प्रतिकोणं तु मार्जयेत् ॥ २४ ॥

एवं हि भद्रकं क्लृप्तं रजसा परिपूरयेत् ।
व्योमवृत्तसमायुक्तं मध्ये तु कमलं [4]स्थि (? सि)तम् ॥ २५ ॥

रेखागणं तथा सर्वं श्यामलेन सितेन च ।
सन्धयः पद्मपत्राणामेवमेवान्तरेष्वपि ॥ २६ ॥

किन्तु वै व्योमवृत्तस्य बाह्यादादौ क्रमेण तु ।
सर्वेषां पूरणं वच्मि रजसा तु यथास्थितम् ॥ २७ ॥

[1]पाण्डुरक्तेन रागेण कण्ठाभ्यां तु यदन्तरम् ।
रक्तोज्ज्वलेन कोणानि पीतान्यभ्यन्तरं तयोः ॥ २८ ॥

प्रपूर्यैवं भवेद्भद्रमघनिर्मोचनं शृणु ।
क्षेत्रं कृत्वाऽष्टधा सम्यक् चतुष्षष्ट्यंशकानि तु ॥ २९ ॥

जायते (? न्ते) मध्यतः कोष्ठैश्चतुर्भिः कमलं लिखेत् ।
तद्बहिर्भागपंक्त्यैकां वीथ्यर्थं परिमार्जयेत् ॥ ३० ॥

द्वाराणि वीथिबाह्यं ? ह्ये) तु तदर्धं (? र्थं) द्वयद्वयम् ।
कण्ठार्धं (? र्थं) लोपनीयं च चत्वार्युपगलात्तु वै ॥ ३१ ॥

द्वारोपगेषु स्थानेषु पूर्वमण्डलसंख्यया ।
[2]विलोप्य रञ्जयेत् पश्चाद्भू (? भ्र) मणिं श्यामलेन तु ॥ ३२ ।

---

1. ख—स्मृतम्
2. क—विलेप्य

शेषं तु भद्रवच्च स्यात् सदध्वमधुनोच्यते ।
विभज्य नवधा क्षेत्रमेकाशीत्यंशकं भवेत् ॥ ३३ ॥

उत्पद्यन्तेऽनु (? मध्ये तु नव) भागानां भद्रवत् कमलं लिखेत् ।
पङ्क्त्या तु तद्बहिः पीठं रमणीयं च मार्जयेत् ॥ ३४ ॥

त्रिसंख्याकं तु भागानां [1]तस्मात् सर्वविदिक्स्थितम्
एकैकं दिक्षु संस्थाप्य भवेद् द्वाराण्यथाश्रयः । ॥ ३५ ॥

बाह्यपङ्क्तिद्वयेनैव जायन्ते ना (? ता) न्यथा शृणु ।
पीठकोणसमैर्भागैर्द्वारकण्ठं प्रकल्पयेत् ॥ ३६ ॥

पञ्चांशेनोपकण्ठं तु कोणमस्य [2]षडंशकम् ।
संमार्ज्य पूरयेत् पश्चाद्रजसा [3]राजते यथा ॥ ३७ ॥

अन्तरं व्योमपीठाभ्यां पतिरक्तोज्ज्वलेन तु
पीठदिक्स्थितभागानि श्यामलोनोज्ज्वलेन तु ॥ ३८ ॥

तदुपस्थानकोणानि पीतेन परिपूरयेत् ।
द्वाराणि सुसितेनैव पाण्डुरक्तेन चाश्रयः ॥ ३९ ॥

सदध्वं च मया प्रोक्तं धर्माख्यमधुनोच्यते ।
विभज्य दशधा क्षेत्रमंशकानां भवेच्छतम् ॥ ४० ॥

---

1. क–तस्मात् सन्धि
2. क–षडङ्गकम्
3. क–राजिते

चतुर्भिः पुष्करं मध्ये पीठं पङ्क्त्या तु साधयेत् ।
परितस्तत्र भागानि रोधयित्वाऽब्जसंभव ॥ ४१ ॥

प्रदद्यात् कोण [1]चतुर्धा जायते यथा ।
भ्रमणीं कल्पयेत् पङ्क्त्या [2]द्वारं तद्द्वितयेन तु ॥ ४२ ॥

षट् च कण्ठोपकण्ठाभ्यां भागानां परिमार्जयेत् ।
आर[3]भ्योभयपार्श्वेत्तु द्वौ द्वौ भागौ तु मर्दयेत् ॥ ४३ ॥

त्रयं द्वयमथैकैकं कोणात् संशोध्य रञ्जयेत् ।
पाण्डरारुणरागेण मध्यं वै व्योमपीठयोः ॥ ४४ ॥

द्वौ तु पूर्वापरौ भागौ [4]पीठात् पीतेन पूरयेत् ।
द्वारकण्ठोपगौ स्थानौ पूरयेत् पीतलेन तु ॥ ४५ ॥

व्योमपीठान्तरं यद्वत् तद्वत् कोणचतुष्टयम् ।
इत्येतत् कीर्तितं धर्म वसुगर्भमतः शृणु ॥ ४६ ॥

कृत्वैकादशाधा क्षेत्रमेकविंशोत्तरं शतम् ।
[5]उत्पद्यन्ते (? ते) च भागानां नवभिर्मध्यपङ्कजम ॥ ४७ ॥

---

1. ख–चतुष्कम्
2. द्वाराणि द्वित
3. ब–बाह्यान्तरेण
4. ख–पीठान्
5. ख–उत्पाद्यन्ते

मार्जयित्वा तु पीठार्थं पङ्क्त्येकं साधयेच्च तत्।
सूत्रपातविधानेन यथा तदवधारय ॥४८॥

पदद्वयावसाने तु कोणस्थाने निधाय वै।
पार्श्वाभ्यां सर्वकोणे तु सूत्रमास्फालयेच्च तत् ॥४९॥

भवन्त्यनेन विधिना दिग्भागाः कर्णिकोपमाः।
सीराग्रवच्च कोणानि ततः पङ्क्त्या तु वीथिका ॥५०॥

शिष्ट (? ष्टं) पङ्क्तिद्वयेनैव कुर्यात् कमलसंभव।
संशोध्य (? ध्यं) भागसंज्ञं तु द्वारेष्वथ सदध्ववत् ॥५१॥

द्वाराभ्यां मध्यतस्सप्तकोणदेशाच्च शोधयेत्।
एकैकं साधयेत् कोणं ततोऽशत्रितयेन तु ॥५२॥

कृत्वैवं पूरयेत् पश्चाद्रागेण विविधेन च।
प्रशान्ताग्निसमानेन व्योम[1]बाह्यं रजेन तु ॥५३॥

[2]ईशकोणात् समारभ्य सितार्द्यैः परिपूरयेत्।
तद्व[3]दाप्योत्तरेन्द्रान्तकाशासु च रजः क्षिपेत् ॥५४॥

म रोदरनिभेनैव पीठबाह्यं तु पूरयेत्।
द्वाराण्यरुणरक्तेन तयोर्मध्यं सितेन च ॥५५॥

ख–बाह्यान्तरेण

कोणं समारभ्य

ख- कोणे

शेषं तु दशपादाहे रञ्जयेच्छा[1]मलेन च
इत्युक्तं वसुगर्भं ते सर्वकामप्रदं शृणु ॥ ५६ ॥

क्षेत्रं द्वादशधा कृत्वा [2]तत्सूत्रेण च पौष्कर।
सार्धमेकशतं चैव पद्मानं जायते ततः ॥ ५७ ॥

मध्ये षोडशभिः कोष्ठैः पद्मं कुर्यात् सलक्षणम्।
भागपङ्क्त्या तु वै पीठं तस्मात् द्वौ द्वौ तु दिग्गतौ ॥५८॥

भागौ संशोधितौ ह्येवं त्रीणि त्रीणि तदाश्रिषु।
भ्रमणीं मर्दयेत् पङ्क्त्या शेष (?षं) पङ्क्तिद्वयेन तु ॥ ५९ ॥

षड्गलोपगलेष्वत्र कोणात् कोण (? ष्ठ) द्विसप्तकम्।
कृत्वैवं पूरयेत् प्राग्वदन्तरं व्योमपीठयोः ॥ ६० ॥

राजोपलनिभेनैव पीठं कोणात् प्रपूरयेत्।
तत्कोणमध्यदेशानि हेमाभेन तु रञ्जयेत् ॥ ६१ ॥

शुक्ल (? क) पक्षोपमेनाथ रञ्जयेद्वीथिका (? का) द्विज।
द्वाराणि स्फटिकाभेन रक्तरागेण वाश्रयः ॥ ६२ ॥

सर्वकामप्रदं चैव कृत्वामित्रघ्नमुच्यते।
क्षेत्रं त्रिदशधा कृत्वा भागानां जायते शतम् ॥ ६३ ॥

---

1 ख–लेन वा

2 ख–तत्सूत्रेणैव

एकोनसप्तत्यधिकमम्बुजं [1]चक्रमध्यतः।
कोष्ठकैः पञ्चविंशद्भिः पङ्क्त्या पीठं तु तद्बहिः ॥ ६४ ॥

तत्र तन्मध्यतस्त्रीणि त्रीणि चैव तथाश्रिषु।
[2]पदवी तद्बहिः पङ्क्त्या द्वारादि द्वितये नतु ॥ ६५ ॥

[3]कण्ठ भागत्रयेणैव पञ्चभिश्चोपकर्णि (? ण्ठको) कम्
[4]द्वारोपगस्य मध्यात्तु अष्टौ [5]शोभाद्वये भवेत् ॥ ६६ ॥

अथ षट्केन षट्केन कुर्यात् कोणचतुष्टयम्।
कृत्वैवं व्य (? र) ञ्जयेद्व्योम बाह्यं रक्तारुणेन तु। ॥ ६७ ॥

पीठकोणानि सर्वाणि तेन चात्युज्ज्वलेन वा।
चाषपक्षसमानेन पैठीयं दिक्चतुष्टयम् ॥ ६८ ॥

राजोपलनिभेनैव पूरयेद्[6]भ्रमणीं ततः।
द्वाराणि रजताभेन तदन्तः पाण्डरं गुणम् ॥ ६९ ॥

व्योमपीठान्तरं यद्वत् तद्वत् कोणमिति स्मृतम्।
उक्तमेतदमित्रघ्नमायुष्यमधुनोच्यते ॥ ७० ॥

---

1 ख–चाक्र
2 क–ग–पवपीतं
3 ख–कर्णं
4 ख–द्वारोभयस्य
5 क––ग–शोभद्वये
6 क–ग–भ्रमणं

कृत्वा द्विसप्तधा क्षेत्रं षण्णवत्यधिकं शतम्
उत्पद्यतें (? न्तें)ऽशकाना तु कजं षोडश[1]कोष्ठके

मध्यतस्तद्बहिः पङ्क्त्यां पद्माधारं प्रकल्पयेत् ।
तत्र द्वे द्वेंऽशके (?कैः) दिक्षु त्रीणि त्रीणि [2]तदाश्रिषु ।

पङ्क्तिद्वयेन परितस्तद्बहिः पदवी भवेत् ।
भागपङ्क्तिद्वयेनाथ यच्छिष्टं तत्समापयेत्

द्व्यंशेन [3]द्वारकण्ठं स्याच्चतुर्भिरुपकण्ठकम् ।
ततः कण्ठसमीपाच्च शोभार्थं त्रीणि शोधयेत्

उपकण्ठोपगं चैकमेवं शोभाष्टकं भवेत् ।
मण्डलस्य चतुर्दिक्षु ततः कोणेषु शोधयेत्

दशकं दशकं विप्रभागानामथ रञ्जयेत् ।
जातिरिं (? हिं) कुलिकाभेन व्योमबाह्यात्तु पूरयेत् ।

ततो मरका (? कता) भेन पीठकोणानि रञ्जयेत् ।
सर्वं रक्तारुणाभेन दिक्सङ्गं परिपूरयेत्

हेमहेमाभवीथी वा द्वाराणि सुसितानि च ।
नृपोपलाभेनाश्रीणि शोभानि व्योमबाह्यवत्

1 ख–कोष्ठकैः

2 ख–ग–तदा शृषु

3 द्वारकर्णं स्याच्चतुर्भिरुपकर्णकम

एतदायुष्यकं प्रोक्तं बलभद्रमतः शृणु।
...त्रिपञ्चधा कृत्वा कोष्ठकानां शतद्वयम् ॥ ७९ ॥

...पञ्चविंशत्यधिकममित्रघ्नवदाचरेत्।
...पीठं च पङ्कजं भागैः पङ्क्त्या चैवोपपीठकम् ॥ ८० ॥

...कण्ठरूपगलं कुर्याच्छोभासङ्घं तु पूर्ववत्।
...एकादशभागानि कोणाच्छोध्यानि पौष्कर ॥ ८१ ॥

...योमाद्यनवसानं तु पाण्डुरक्तेन पूरयेत्।
...पीठ यादृग्विधो राजा यन्त्रपीठे तथैव च ॥ ८२ ॥

दातव्यं विधिना येन तदन्यत्रोऽवधारय।
...ईशकोणात् सिताद्यैस्तु चतुर्भिः परिपूरयेत् ॥ ८३ ॥

...गैस्तु पीठकोणानि पश्चिमादि ततः पुनः।
...नैव दक्षिणाशान्तमुपपीठं तु कथ्यते ॥ ८४ ॥

याम्याशादिसिताद्यैस्तु यावत्प्रागवसानतः।
...मणीः पाण्डुरक्तेन ततो द्वारचतुष्टयम् ॥ ८५ ॥

जाम्बूनदसमानेन पश्चाच्छोभाष्टकं द्विज।
क्रमान्मरतका (? कता) मेन शिष्टं रक्तगुणेन तु ॥ ८६ ॥

स्यादिदं बलभद्रं तु पौष्टिकं चाधुनोच्यते।
[1]भङ्क्त्वा षोडशधा क्षेत्रमंशकानां शतद्वयम् ॥ ८७ ॥

ख—कोणाक्षता

क—ख—ग—कृत्वा

षट्पञ्चाशोत्तरं चैव भवेन्मध्येऽस्य कल्पयेत् ।
षट्त्रिंशद्भिस्तु कह्लारं पीठं पङ्क्तिद्वयेन तु ॥ ८८॥

द्वौ द्वौ दिङ्मध्यगौ भागौ पञ्च पञ्च तदश्रिषु ।
हृत्वा तु चोपपीठार्थं मार्गांश्च परिशोधयेत् ॥ ८९ ॥

त्रीणि त्रीणि तु कोणेषु षट्कं षट्कं दिशासु च ।
मार्गं तु तद्बहिः पङ्क्त्यां द्वारादि-द्वितयेन तु ॥ ९० ॥

गलोपगलशोभादिद्विचतुस्स्मृतये (? स्त्रयमे) ककम् ।
शोभाविपर्ययेणैवमुपशोभां तु तत्समैः ॥ ९१ ॥

समीपे चोपशोभस्य षड्भिः कोणं तु मार्जयेत् ।
एवं शोभाष्टकं विप्र उ (? तू) पशोभाष्टकं तथा ॥ ९२ ॥

शोधयित्वा चतुर्दिक्षु रजसा पूरयेत्ततः ।
पूर्यमाकाशवृत्तस्य बाह्यं रक्तारुणेन तु ॥ ९३ ॥

पीठस्य सर्वकोणानि हेमाभेन तु पूरयेत् ।
पाण्डरारुणरागेण पूरयेद्गात्रकाणि च ॥ ९४ ॥

कोणान्यथोपपीठस्य तेनैव परिरञ्जयेत् ।
तद्गात्रकाणि शुक्लेन तद्बाह्यमसितेन तु ॥ ९५ ॥

द्वाराणि सुसितेनैव शोभाश्च व्योमबाह्यवत् ।
पीतेन चोपशोभानि कोणान्यथ विभूषयेत् ॥ ९६ ॥

मानान् मरतका (?कता) भेन श्यामलेनोज्ज्वलेन च।
पुष्पं पौष्टिकं यागं [1]वच्म्यारोग्यकसंज्ञकम् ॥९७॥

प्राक् सप्तदशधा क्षेत्रं कृत्वांशानां शतत्रयम्।
एकादशांशहीनं तु [2]जायते वाऽथ मध्यतः ॥९८॥

पञ्चविंशतिभिः पद्मं ततः पङ्क्तिद्वयेन तु।
पीठं पङ्कजाधारं तस्मादिक्षु विमर्दयेत् ॥९९॥

पद्मक्षेत्रसमीपात्तु पञ्चैकं तेषु बाह्यतः।
भवन्ति शोभातुल्यानि कृत्वैवं गात्रकाणि तु ॥१००॥

परितोऽष्टकमंशानां प्रतिकोणं तु मार्जयेत्।
भागं (? ग) पङ्क्ति[3]द्वयं (? ये) जातं संचारार्थं तु शोधयेत् ॥१०१॥

द्वयेन द्वारशोभादि ततः कुर्याद्द्विजोत्तम।
त्रीण्यर्धं (? तः) पञ्चभागानि द्वारात् कण्ठोपकण्ठयोः ॥१०२॥

शोभोपशोभकोणेषु सैकैकं तु त्रिसप्तकम्।
मार्जयित्वा तु रजसा प्रपूर्य विविधेन च ॥१०३॥

आकाशपरिधेर्बाह्यं बन्धुजीवनिभेन तु।
गोक्षीरपाण्डुरागेण पीठपादं चतुष्टयम् ॥१०४॥

---

1. क-ग-वच्मि आरोग्यसंज्ञकम्
2. क-जायते चाथ
3. क-द्वये जातं पञ्चारार्थं

गात्रकाण्यथ सर्वाणि राजाश्मसदृशेन तु ।
चीनपिष्टसमानेन वीथिकां परिरञ्जयेत् ॥१०५॥

द्वारादिन् हेमवर्णेन श्यामेनान्तः सुसंस्थितान्।
सितेन चोपशोभानि शेषं रक्तारुणेन तु ॥१०६॥

एवमारोग्यकं प्रोक्तं विवेकमवधारय।
कृत्वाऽष्टदशधा क्षेत्रमंशकानां शतत्रयम् ॥१०७॥

जायते वै चतुर्विंशत्यधिकं कमलोद्भव।
मध्ये षोडशभिः पद्मं पीठं पङ्क्तित्रयेण तु ॥१०८॥

द्विचतुष्कं तु भागानां तत्र वै गात्रकान् प्रति।
द्वौ पद्मक्षेत्रनिकटात् पङ्क्तौ दिङ्मध्यतस्ततः ॥१०९॥

चत्वारि मध्यपङ्क्तौ द्वौ बाह्यपङ्क्तौ यथान्तरम्।
कृत्वैवं गात्रकगणं ताभ्यां मध्यान्तरे ततः ॥११०॥

त्रयोदशांशकेनैव पादं कुर्याद्विचक्षणः।
सप्तकं बाह्यपङ्क्तौ तु मध्यपङ्क्तौ तु [1]चांशकम् ॥१११॥

एकीकृत्वा ततो भागैर्बिम्बं कुर्यात्तु पञ्चभिः।
ईषत्तद्गात्रकाकारं यथा पङ्क्तिद्वयात्ततः ॥११२॥

कुर्यात् संचारमार्गं तु शिष्टं पङ्क्तिद्वयात्तु वै।
दशकं दशकं ब्रह्मन् प्रतिकोणं तु मार्जयेत् ॥११३॥

---

1 ख–चाष्टकम्

शेषाच्छोभोपशोभानि भागैर्द्वाराणि कारयेत्।
प्रपूर्य कर्णिकाश्चातो यथा कृत्स्नैश्च तच्छृणु ॥११४॥

दाडिमीपुष्पतुल्येन पीठदेशादनन्तरम्।
गात्रकाणि सितेनैव लिम्पकान्यसितेन तु ॥११५॥

पद्मरागोपमेनैव कोणं भागाष्टजं तु यत्।
राजोपलनिभेनैव पीठाद्बाह्यं प्रपूरयेत् ॥११६॥

सितादिना चतुष्केण द्वाराद्यं यच्चतुष्टयम्।
उक्तमेतद्विवेकाख्यं वागीशमधुनोच्यते ॥११७॥

भागैरेकोनविंशद्भिः क्षेत्रं कृत्वा तु जायते।
शतत्रयं त्वंशकानामेकषष्ट्यधिकं द्विज ॥११८॥

कमलं पञ्चविंशद्भिः पीठं पङ्क्तित्रयेण तु।
प्राच्यारभ्योत्तराशान्तं तस्माद्वै सप्तकं क्रमात् ॥११९॥

एकांशमाद्यपङ्क्तौ तु यथा तत्पञ्च मध्यतः।
एकांशेन तृतीयेन संयुक्तं चाथ साधयेत् ॥१२०॥

ततोऽग्निनिचयं सर्वं शेषेणांशगणेन तु।
पद्मक्षेत्रोपगात् कोणात् पूर्वपङ्क्तौ तु पञ्चकम् ॥१२१॥

मर्दयित्वाऽथ भागानां द्विषट्कं द्वितयात्तु वै।
द्वितयेन [1]भवेद्वीथी द्वारादिद्वितयेन तु ॥१२२॥

---

1 क–ग - भवेद्वाथ

ग्रीवांशं तत्र ? (त्रित) येनैव पञ्चभिश्चोपकण्ठकम्।
[1]दशांशेन तु कोणानि शेषैः शोभादयस्तथा ॥१२३॥

ततो रक्तोज्ज्वलेनैव बाह्यं पूर्यं चमण्डलात्।
अन्तराण्यथ पादानां हेमाभेन प्रपूरयेत् ॥१२४॥

सर्वं मरतका (? कता) भेन प्रागाद्यं दिक्चतुष्टयम्।
प्रभान्ता (? ता) भिज्ज्वलेनैव पादशेषं प्रपूरयेत् ॥१२५॥

दूविरेफरूपरागेण गममागं तु रञ्जयेत्।
सितरक्तारुणेनैव हेमहिंगुलिकं क्रमात् ॥१२६॥

चतुष्टयं च[2] द्वाराद्यं पूरणीयं तु पौष्कर।
इदमुक्तं च वागीशं मानसं कथयामि ते ॥१२७॥

क्षेत्रं द्वाद[3] (? दूविर्द) शधा कृत्वा भवेच्छतचतुष्टयम्।
भागं तत्रैव (? भागानां तत्र) यन्मध्ये षट्त्रिंशद्भिः कजं
लिखेत् ॥१२८॥

बाह्यपङ्क्तित्रयेणाथ तदाधारं तु [4]लोपयेत्।
द्वौ [5]पद्मक्षेत्रनिकटात् द्वौ बाह्यं (? ह्ये) मध्यतश्चतुः ॥१२९॥

---

1 ख—दशकेन

2 क—ग—घ—चतुर्द्वारात्

3 द्विगुणितदशधा इत्यर्थः

4 ख—लेपयेत्

5 क—ग—पत्रक्षेत्र

दिङ्गमध्याद्गात्रकाणां तु लोपयेच्चरणान्वि (? दि) तः।
भागाष्टादशकेनैव सांशेनात्रावधारय ॥१३०॥

गात्रकाभ्यां समीपं (? पे) तु त्रीण्येकं त्रितयं पुनः।
मीलयेद्बहिरारभ्य सांशषट्कद्वयं तथा ॥१३१॥

बाह्यमध्यस्थपङ्क्तिभ्यां मीलयेदंशकाद्य (? कांश्च) षट्।
मार्जयेत्पूर्ववद्वीथीं बाह्यपङ्क्तिद्वयेन तु ॥१३२॥

शेषं स्यात्प्रमाणेन तत्र संवेशनं तु षट्।
कण्ठोपकण्ठयोर्ब्रह्मन् षट्कषट्कं तथाश्रृणु (? तथा त्रिषु) ॥१३३॥

शिष्टे शोभाद्वयं कुर्यात् तदेकं चोपशोभनम्।
मध्यतो द्वारकोणभ्यां रजसा पूरयेत्ततः ॥१३४॥

पीठादाद्यं तु [1]भूभागं चीनपिष्टनिभेन च।
गात्राणि च सुपीतेन [2]तासामभ्यन्तरं तु यत् ॥१३५॥

[3]द्वादशांशैकसंभूतं वैडूर्यसदृशेन तु।
तदनन्तरं षडंशोत्थं पूरयेत् सुसितेन च ॥१३६॥

रक्तारुणेन भ्रमणों शुक्लेन द्वारसंततिम्।
द्वारोपगानि शोभानि रञ्जयेद्व्योमबाह्यवत् ॥१३७॥

क–भूभगात्

क–ग–ताभ्या

क–ग–घ–द्वादशांशैक

हेमाभेनोपशोभानि शोभान्यन्यानि पौष्कर।
झषोदरसमानेन शेषं स्यात् पूर्वशोभवत् ॥१३८॥

इत्युक्तं मानसं यागं जयाख्यमपरं शृणु।
एकविंशतिभिर्भागैः क्षेत्रं कृत्वा तु जायते ॥१३९॥

सार्धं शतं चतुर्णां तु भागानां नवभिर्विना।
पङ्कजं पञ्चविंशद्भिः पङ्क्त्या पीठं तु तद्बहिः ॥१४०॥

चतुर्दिक्षु ततो ब्रह्मंस्त्रीणि त्रीणि तु लोपयेत्।
भागानि गात्रकाणां तु तथैव हि तदश्रिषु ॥१४१॥

तद्बहिश्चोपपीठं तु कुर्यात्पङ्क्तित्रयेण तु।
तस्मात् सप्तदशांशानि शोध्यानि प्रतिगात्रकान् ॥१४२॥

तृतीयं (? त्रितयं) मध्यपङ्क्तौ तु सप्तकं सप्तकं पुनः।
आद्यन्तपङ्क्तिद्वितयाच्चरणान्यपिकल्पयेत् ॥१४३॥

एकैकं मर्दयेत् [1]कोणं ब्रह्मन् भागा (? गै) स्त्रयोदश (?शैः)।
कृते पादगणे कुर्याद्वीथिकां द्वितयेन तु ॥१४४॥

द्विती (? त) येनाथ [2]विं (?वि) शादीन् षट्कं षट्कं तदश्रिषु।
द्वारं भागाष्टकेनैव शेषैः शोभादयोंशकैः ॥१४५॥

कृत्वैवं रञ्जयेत् पश्चादथ तच्छृणु पौष्कर।
[3]खवृत्तादवसानं यत् तत्कुर्यात् पाण्डरोज्ज्वलम ॥१४६॥

---

1 क–ग–कोणान्

2 ख–ग विंशाषट्

3 क–ग–त्ता वसपानं

ततो तृतीयपङ्क्तौ तु [1]द्विती (? त) यं परिशोधयेत् ।
एवमंशकबिम्बं च कृत्वा द्वारोपमं [2]भवेत् ॥१५६॥

तत्र (? ततम्) तृतीयपङ्क्तौ तु लोपयेदंशकद्वयम्
चतुष्टयं तु त द्वाह्याल्लोपयेत् पूर्वबिम्बवत् । ॥१५५॥

द्वावेवैतादृशं (? शौ) कुर्याच्छिष्टेनांशगणेन तु ।
तिर्यग्गतौ गात्रमाजौ द्वारबन्धाकृतिं (?ती) द्विज ॥१५७॥

ततः पादचतुष्कं तु यथा कुर्यात्तदुच्यते ।
एकैकं षोडशांशेन चरणं गात्रकाकृतिम् ॥१५८॥

किंतु तद्बिम्बमेकैकं चतुर्भागान्वितं भवेत् ।
द्वौ बिम्बौ द्वारसदृशौ पीठात् प्रागदिशि संस्थितौ ॥१५९॥

एवमीशानदिक्प्रोक्तं संस्पर्शं तं तु लोपयेत् ।
द्वितीयं हुतभुक्कोणादारभ्य परिमार्जयेत् ॥१६०॥

तत्तु (तः) पश्चिमदिक्कुर्याद् द्वौ (?द्वे) विम्बौ (?म्बे) पादसंश्रिते? ।
[4]समन्वयात्तु सामीरकोणयोरादितो द्विज ॥१६१॥

द्वे द्वे विम्बे ह्युदग्याम्ये कुर्यात्त्यक्त्वा परं पदम् ।
ईशानत्वग्निवायव्यकोणेषु कमलोद्भव ॥१६२॥

---

1 द्वितीयां
2 मुद्रितपुस्तकस्य १५५ द्वितीयचरणः अथ १५६ द्वितीयचरणत्वेन परिवर्तितः ।
3 ख–तुर्यङ्गतौ
4 ख–समं कुर्यात्तु

[1]संमुखं गात्रकाभ्यां तु द्वितीयं बिम्बकद्वयम्।
भवत्यनेन विधिना शोधितेनाब्जसंभव ॥१६३॥

स्वस्तिकाष्टकसंयुक्तं कृत्वैवं कमलासन।
बाह्ये संचारमार्गं तु बाह्यपङ्क्तिद्वयेन च ॥१६४॥

शेषं पङ्क्तिद्वयेनैव यथा कुर्यात्तदुच्यते।
कण्ठोपकण्ठसंयुक्तं द्वारं षड्भागनिर्मितम् ॥१६५॥

चतुर्भागयुतं कुर्या[2]च्छोभं द्वारसमीपकम्।
शोभोपग[3]मुपद्वारं [4]भागषट्केन पूर्ववत् ॥१६६॥

उपद्वारसमीपे तु भूयः शोभं तथाविधम्।
कोणं कुर्याच्छडंशेन लुप्त्वैवं परिपूरयेत् ॥१६७॥

पाण्डुरक्तेन रजसा व्योमारण्यपरिधेः परम्।
संमुखे मध्यसूत्राणां द्वे बिम्बे गात्रकाश्रिते ॥१६८॥

रम्ये मरतकाभेन तद्वद्रक्तारुणेन तु।
तिर्यग्गते तु तद्बिम्बे सर्वगात्रेष्वयं [5]क्रमः ॥१६९॥

चतुर्बिम्बान्वितानां तु चरणानामथ क्षिपेत्।
तुल्यं चतुर्विधाकारं पाभ्रेदेन यथास्थितम ॥१७०॥

---

1 ख–समं खं, ख–भाग कः
2 छोभां
3 क–मुपचारं
4 ख–भागं षट्कोष
5 ख–क्रमात्

ईशकोणगते पादे प्राग्बिम्बे पाण्डरारुणम् ।
सितं याम्येऽथ राजाश्मसदृशं चैव पश्चिमे ॥१७१॥

हेमाभं चोत्तरे बिम्बे त्वथाग्नेयपदे शृणु ।
पूर्वस्यामरुणं तादृक् पीतं कृष्णं सितं क्रमात् ॥१७२॥

याम्याप्यसौम्यदेशेषु रक्षा (?क्षः) पादेऽथ वक्ष्यते ।
प्रागादौ चोत्तरान्तं च कृष्णपीतारुणैस्सितैः ॥१७३॥

तद्बिम्बेन य (?स) मापूर्य वच्मि पादेऽथ मारुते ।
ऐन्द्रात्कौबेरपर्यन्तं शुक्लकृष्णारुणा परैः ॥१७४॥

रागैर्बिम्बगणं सर्वमेवं पीठं प्रपूर्य च ।
वीथिका षट्पदाभेन द्वारं शुक्लेन पूरयेत् ॥१७५॥

शोभा (?भां) रक्तारुणेनैव पीतेन तदनन्तरम् ।
कोणोपद्वारमध्यस्थं शोभं श्यामेन् रञ्जयेत् ॥१७६॥

निर्धूमाग्निसमानेन कोणं [1]रागेण पूरयेत् ।
स्वस्तिकाख्यमिदं प्रोक्तमनन्तं कथयामि ते ॥१७७॥

त्रयोविंशतिभिर्भागैः क्षेत्रं कृत्वा भवेद्द्विज ।
शतानि पञ्चभागानां विशद्भिस्तु नवाधिकैः ॥१७८॥

संयुक्ता चांशकैर्मध्ये पञ्चविंशतिभिः कजम् ।
पीठं पङ्क्तित्रयेणैव [2]पङ्क्त्यैका (?पङ्क्त्या वै) चोपपीठिका ॥१७९॥

---

1 क–रागेषू
2 क–ग–पववंकावोप

...नकं चैव भागानां संशोध्यं प्रतिगात्रकान् ।
...दिक्षु स्यात्पूर्वपङ्क्तौ तु [1]भागैकं पञ्च मध्यतः ॥१८०॥

...पङ्क्तावेकांशं ततस्सप्तदशांशकैः ।
...कं साधयेत् पादमुपपीठं तथोच्यते ॥१८१॥

...चकं पञ्चकं दिक्षु कोष्ठकानां तु मार्जयेत् ।
विदिक्षु परिसंशोध्य सप्तकं सप्तकं ततः ॥१८२॥

...द्वयेन भ्रमणी द्वारादीस्त्रितयेन तु ।
...त्र ग्रीवमथ त्रीणि उपकण्ठात्तु पञ्चकम् ॥१८३॥

...आधारमुपकण्ठस्य ससप्तांशेन तद्बहिः ।
...शोभं द्वारोपगं कुर्यान्नवभिः कण्ठगैर्द्विज ॥१८४॥

...तत्राधारोपगं भागमुपकण्ठोपगास्त्र[2]यः ।
[1]पञ्चांशान्युत्तरात्पङ्क्तौ ग्रीवादेशात्तु मर्दयेत् ॥१८५॥

सप्तविंशत्यथांशानि कोणदेशाद्विशोधयेत् ।
...त्वैवं रागजालेन पूरणीयं समन्ततः ॥१८६॥

पद्मरागारुणेनैव क्षेत्रं पीठान्तरं (? रे) स्थितम् ।
जातरूपोज्ज्वलेनाथ पीठपादचतुष्टयम् ॥१८७॥

तुषारसदृशेनैव पूरयेद्गात्रकाण्यतः ।
गात्रकाण्युपपीठस्य राजाश्मसदृशेन तु ॥१८८॥

---

1. ग-भागैकः
2. ग-स्त्रियः
1. ख-ग-पञ्चांशात्युत्तरात् ।

प्रफुल्लकिंशुकाभेन चरणान्यस्य रञ्जयेत् ।
श्वेतेन गममार्गं तु द्वाराणि व्योमबाह्यवत् ॥१८९॥

शरदाकाशसंकाशमुपशोभोपगं तु तत् ।
पाण्डरारुणरागेण कोणजालं विभूषयेत् ॥१९०॥

अनन्तसंज्ञमित्युक्तं नित्याख्यमवधारय ।
कृत्वा द्वादशधा क्षेत्रं द्विधा कृत्वा तु तत्पुनः ॥१९१॥

शतानि पञ्चभागानां षट्सप्तत्यधिकानि तु
भवन्ति कमलं कुर्यान्मध्ये षट्त्रिंशकांशकैः ॥१९२॥

पीठं पङ्क्तिचतुष्केण तस्य द्वे द्वे तु मध्यतः ।
दिक्षु चाद्यन्तपङ्क्तिभ्यां तद्वन्मध्याच्चतुश्चतुः ॥१९३॥

पङ्क्तिद्वयात्तु संशोध्यं (? ध्य) एवं (? ह्येवं) स्याद्गात्रकं द्विजः
द्वादशांशकसंयुक्तं ततः पादं तु साधयेत् ॥१९४॥

अष्टाविंशतिभिर्भागैस्सुतनु सुमनोरमम् ।
पद्मक्षेत्रोपगात् कोणात् पूर्वपङ्क्तौ तु पञ्चकम् ॥१९५॥

द्विषट्कं मध्यपङ्क्तिभ्यामेकीकृत्य पृथक् ततः ।
संशोध्यैकादशांशानि बाह्यात्पङ्क्तौ क्रमेण वै ॥१९६॥

संपाद्य चरणान्येवं वीथीं पङ्क्तिद्वयेन तु ।
तृतीयेनावशिष्टं यत् कार्यं तच्छृणु पुष्कर ॥१९७॥

[?] चतुष्पदक्रमेणैव [1]द्वारं (? रात्) कण्ठादितो (? मृ) भजेत्।
पञ्चांशं त्रीणि पश्चातो बहिरारभ्य मार्जयेत् ॥१९८॥

शोभस्स्यात् (? शोभं स्यात्) द्वारनिकटे त्वेवं रम्यं ततोऽब्जज।
चतुर्भागान्वितेनैव कुर्याच्छोभोपशोभके ॥१९९॥

ज्येष्ठशोभासमीपात्तु बाह्यं (? ह्य) पङ्क्तिद्वयं तु वै।
ततस्सप्तदशांशानि प्रतिकोणं तु लोपयेत् ॥२००॥

रजसा पूरयेत् पश्चाद्यथा तच्छृणु पौष्कर।
तच्छोणितारुणं दद्याद्योमबाह्ये [2]रजोत्तमे (मात्) ॥२०१॥

जात्या हिंगुलिकाभेन गात्रकाणि विभूषयेत्।
सितासितेन पीतेन [3]त्वन्तराद्यं पद (? दा) न्तिमम् ॥२०२॥

भागात् प्रपूर्य पादानां वीथी रत्नो (? क्तो) ज्ज्वलेन तु।
द्वारान्नृपोपलाभेन शोभां पीतेन पूरयेत् ॥२०३॥

तत्पार्श्वोत्थमुपशोभं कुर्यान्मरतकप्रभम्।
कोणोपगं तु यच्छोभं विद्धि त[4]त्पाण्डरोज्ज्वलम् ॥२०४॥

---

1. क-द्वारात्
2. क-रजोत्तमम्
3. त्वन्तराद्यावदन्तिमम्। इति स्यात्।
4. क-ग पाण्डुरोज्वलं

क्षोणं सुधासमाभेन रजसा [1]राजते यथा।
इत्युक्तं नित्यसंज्ञं तु भूतावासमतः शृणु ॥२०५॥

पञ्चविंशतिभिर्भागैः क्षेत्रं कृत्वा तु जायते।
षट्शतान्यंशकानां तु पादयुक्तानि मध्यतः ॥२०६॥

एकोनेन शतार्धेन विलिख्य कमलं शुभम्।
पीठं पद्मवितचतुष्केण पादगात्रकभूषितम् ॥२०७॥

चतुर्विंशतिभिर्भागैर्बिम्बैः पञ्चभिरन्वितम्।
विचित्रगात्रकं कुर्यात् तत्र भागानि लोपयेत् ॥२०८॥

चतुर्थपूर्वपङ्क्तिभ्यामेकैकांशं दिगन्तरे।
त्रीणि त्रीणि तु भागानि मध्ये पङ्क्ति[2]द्वयाद् द्विज ॥२०९॥

एवमष्टांशजं बिम्बं प्रथमं गात्रकस्य तु।
चतुरंशकयुक्तानि [3]कुर्यात् तिर्यग्गतानि तु ॥२१०॥

चत्वारि यस्य बिम्बानि शोभाकाराणि वै[4] ततः।
त्रीणि त्रीण्याद्यपङ्क्तौ तु पद्मक्षेत्रस्य बाह्यतः ॥२११॥

द्वितीयपङ्क्तावेकैकमेवं बिम्बद्वयं भवेत्।
तत्र तृतीयपङ्क्तौ तु एकैकांशं तु लोपयेत् ॥२१२॥

---

1 क–ग–रञ्जते
2 ख–द्वयं
3 कुर्याद्रुपगतानि
4 सप्तमः

त्रीणि त्रीणि चतुर्थांशा मार्जनाद्वात्रकं भवेत्।
द्वादशेनांशकानां तु पादं पादमतः परम् ॥२१३॥

तत्रैकांशं ततः पञ्च सप्तकं सप्तकं पुनः।
आरभ्य पूर्वपङ्क्तौ तु मार्जयेद्यावदन्तिमम् ॥२१४॥

संचारपदवीं कुर्याद्भागं पङ्क्तिद्वयेन तु।
त्रितयं [1]चात्रशिष्टं यत् तत्र पञ्चदशांशजम् ॥२१५॥

द्वारं कुर्यात्तु वै पूर्वं त्रीणि ग्रीवावधौ मृजेत्।
उपकण्ठात्तु वै पञ्च द्वाराधारं तु सप्तकम् ॥२१६॥

तत्समीपे ततः कुर्याच्छोभास्थानं तु मार्जयेत्।
पञ्च त्रीणि तथैकांशं कण्ठदेशादितः क्रमात् ॥२१७॥

एवमेवोपशोभं तु कुर्यात् तद्विपरीतवत्।
ततः पञ्चदशांशानि शोध्यान्यग्रिस्थितानि च ॥२१८॥

लुप्त्वैवं रञ्जयेद्भागै रमणीयैरथेदृशैः।
क्षेत्रपीठान्तरस्थं तु कुर्याद्वै पाण्डरोज्ज्वलम् ॥२१९॥

गात्रकाणां सितं कुर्यान्मध्यस्थां बिम्बसंततिम्।
पद्मक्षेत्रसमीपस्थे तद्बिम्बे नृपशैलवत् ॥२२०॥

रक्तोज्ज्वलेन रागेण बाह्यबिम्बद्वयं तु तत्।
हेमाभेनैव [2]पादं तु वीथिकां रञ्जयेत् ततः ॥२२१॥

क-ग-चापि शिष्टं
ग-तत्पादं

सर्वं मरतकामेन द्वाराणि व्योमबाह्यवत् ।
पादवच्चो ऽसंकाशं कोणं गात्रकमध्यवत्

भिन्नाञ्जनसमप्रख्यमुपशोभगणं च यत् ।
भूतावासमिदं प्रोक्तममोघमधुनोच्यते

प्राक् [1]त्रयोदशधा क्षेत्रं कृत्वा तद्विभजेद् द्विधा ।
षट्शतान्यंशकानां तु षट्सप्तत्यधिकानि तु

उत्पद्यन्ते ततो मध्याच्चतुःषष्ट्यंशकैः कजम् ।
पीठपङ्क्तिचतुष्केण चित्रगात्राङ्घ्रिभूषितम

अष्टाविंशतिभिर्भागैराद्यं मध्यं तु गात्रकम् ।
तत्राद्यन्तस्थपङ्क्तिभ्यां द्वौ द्वौ दिङ्मध्यतोंऽशकम्

मध्यपङ्क्तिद्वयात्तद्वत् [2] द्विद्विकं द्विद्वि कं पुनः ।
एवं द्वादशभागोऽयं मध्ये बिम्बं भवेच्छुभम्

तस्य चोभयपार्श्वात्तु पत्रक्षेत्रसमीपतः ।
द्वौ द्वौ भागौ तु संशोध्यौ मध्यपङ्क्तिद्वयाच्च तु

द्वौ भागौ बाह्यपङ्क्तौ तु एकीकृत्य तु पोष्कर ।
एकैकमष्टभागे तु एवं बिम्बद्वयं भवेत्

विंशत्यंशकजं पश्चात् पादं कुर्यात द्विबिम्बकम् ।
पद्मक्षेत्रस्य बाह्यात्तु मार्जयेदंशकानि षट्

---

1 द्विधा त्रयोदशधा षड्विंशतिधेत्यर्थः

2 ख–द्वयाच्चैतद्

पादबिम्बं भवत्येकं तद्बाहिस्स्थावरं भवेत्।
चतुर्दशांशकोद्भूतं वीथी पङ्क्तिद्वयेन तु ॥२३१॥

कण्ठादीनि ततो बाह्ये कुर्यात् पङ्क्तित्रयेण वै।
द्वे चतुष्टयं तथांशानि क्रमाद् द्वारं गलादितः ॥२३२॥

कुर्याद्द्वासमीपेऽथ प्राग्वच्छोभं नवांशकम्।
उपशोभं तथा कुर्याच्छोभस्य निकटे द्विज ॥२३३॥

ततोंऽशकचतुष्केण सूक्ष्मशोभं प्रकल्पयेत्।
समीपे ह्युपशोभस्य द्वंद्वं पङ्क्तिद्वयात्तु वै ॥२३४॥

ततस्त्रयोदशांशेन कोणं कुर्यात्तु पौष्कर।
आदिमध्याच्छडंशानि बाह्यपङ्क्तौ तु सप्तकम ॥२३५॥

एकीकृत्य स्वरजसा प्रपूर्य विधिवेन तत्।
कमले भूमिभागे तु प्रदद्यात् पाण्डरोज्ज्वलम् ॥२३६॥

मध्यबिम्बे तु गात्राणां हेमाभं तु रजः क्षिपेत्।
शेषं गात्रकभागानि नीलनीरजपत्रवत् ॥२३७॥

चरणान्तरसंस्थानि बिम्बानि सुसितेन च।
रक्तोज्ज्वलेन तद्बाह्यं परितः परिपूरयेत् ॥२३८॥

वीथीं मरतकाभेन द्वारं शुक्लेन पूरयेत्।
शोभं रक्तोज्ज्वलेनैव हेमाभेनोपशोभकम् ॥२३९॥

ख–ग–हिष्ठावरं

संपूर्य सूक्ष्मशोभं तु वैडूर्यसदृशेन तु।
पाण्डरोज्ज्वलरागेण कोणं यत्तदुपस्थितम् ॥२४०॥

इदमुक्तममोघं ते सुप्रतिष्ठमतः शृणु।
सप्तविंशतिभिर्भागैः क्षेत्रं कृत्वा तु जायते ॥२४१॥

शतसप्तकमंशानां संयुक्तं [1]चैव पौष्कर।
एकोनत्रिंशदंशैस्तु मध्ये पद्मं प्रकल्पयेत् ॥२४२॥

एकाशीत्यंशकैः पीठं पङ्क्तिद्विद्वितयेन तु।
द्वात्रिंशदंशकास्तत्र गात्रकान् परिमार्जयेत् ॥२४३॥

तत्राद्यन्तस्थपङ्क्तिभ्यां त्रीणि त्रीणि दिगन्तरात्।
तथा च मध्यपङ्क्तिभ्यां भागं भागं तु लोपयेत् ॥२४४॥

बिम्बं स्याद्गात्रकस्यैवमाद्यं चाष्टपदान्वितम्।
भागे द्वादशकेनाथ द्वे बिम्बे तदुपस्थिते ॥२४५॥

तदर्थमन्तरा (?न्तिमा) दिभ्यां द्वौ द्वौ पङ्क्तिद्वयं (?ये) सृजेत्।
तत्रैव मध्यपङ्क्तिभ्यामष्टकं लोप्य मीलयेत् ॥२४६॥

कृत्वैवं [2]गात्रकं कुर्यात् पादं विंशतिभिः पदैः।
बिम्बं पादे भवत्याद्यं यथा तदवधारय ॥२४७॥

---

1 क–ग–घ–नैव पौष्कर

2 क–ग–भागकं

कोणाद्यधो कजक्षेत्रात् समारभ्य तु लोपयेत्।
द्वितयं त्रितयं ब्रह्मन् क्रमात् पङ्क्तित्रयाच्च वै ॥२४८॥

पादबिम्बं भवेदाद्यं नवांशकविनिर्मितम्।
द्वितीयबिम्बसिद्ध्यर्थं [1]कोणान्ये (?दे) कादशानि तु ॥२४९॥

बाह्यपङ्क्तिद्वयं (?ये) शोध्य (?ध्यं) द्विती (?त)यं नवकं क्रमात्।
पङ्क्तिद्वयेन भ्रमणी शेषं पङ्क्तित्रयेण तु ॥२५०॥

कण्ठादित्रितयं चारात् पञ्चकं सप्तकं पुनः।
द्वारस्य निकटे प्राग्वच्छोभं कुर्यान्नवांशकम् ॥२५१॥

समीपे त्वथ शोभस्य उ (?द्यु) पद्वारं प्रकल्पयेत्।
द्वे चतुष्टद् च भागास्तु तस्मात् कण्ठादितो मृजेत् ॥२५२॥

पञ्चांशकं ततः कोणात् पङ्क्तौ पङ्क्तौ तु मार्जयेत्।
कृत्वैवं रञ्जयेत् पश्चाद् रागैरजसमुद्भव ॥२५३॥

पद्मपुष्करिणीमध्ये निक्षिपेत् पाण्डरोज्ज्वलम्।
मध्यबिम्बानि गात्राणां रजसा सुसितेन तु ॥२५४॥

[2]रक्तोज्ज्वलेन शेषाणि तद्बिम्बान्यथ रञ्जयेत्।
ततो मरतकाभेन बिम्बं पादान्तरस्थितम् ॥२५५॥

तपनीयोज्ज्वलाभेन तद्बाह्यं परिपूरयेत्।
शरद्गगनसंकाशं (?श) सदृशेनाथ वीथिकाम् ॥२५६॥

---

1. ख–कोष्ठान्येका
2. क–रक्तोज्ज्वलानि

द्वारं कुन्देन्दुतुल्येन शोभां [1]चम्पकपुष्पवत् ।
सुसम्पूर्यमुपद्वारं चामीकरनिभेन तु ॥२५७॥

कोणं शरोदराभेन शुक्ल (?क) पक्षोपमेन च ।
सुप्रतिष्ठमिदं प्रोक्तं बुद्धाधारमथोच्यते ॥२५८॥

विभज्य सप्तधा क्षेत्रं तं चतुर्थं विभज्य च ।
शतानि सप्त जायन्ते भागानामधिकेन तु ॥२५९॥

चतुराशीतिमिर्भागै[2]र्मध्यपद्मं शतेन तु ।
बहिः पङ्क्तिचतुष्केण पीठं कुर्यात्सुलक्षणम् ॥२६०॥

[3]तदात्मकं गात्रकं स्यादष्टाविंशतिमिः पदैः ।
बिम्बत्रयान्वितं [4]तस्य मध्यतो दिक्षु लोपयेत् ॥२६१॥

द्वौ द्वावाद्यन्तपङ्क्तिस्थौ मध्यस्थाभ्यां चतुष्टतुः ।
मध्यबिम्बं द्विषट्कोणभागानामेवमुद्धरेत् ॥२६२॥

तस्य पार्श्वद्वये कुर्याद्बिम्बेऽष्टाशकसंयुतम ।
ताभ्यामाद्यन्तपङ्क्तिभ्यां त्रीणि त्रीणि विशोधयेत् ॥२६३॥

एकैकमन्तरस्थाभ्यां दत्तं पादं तु तत्समैः ।
शोभा द्वे बिम्बवत्कुर्याद्यथा तदवधारय ॥२६४॥

---

1 ख–पुष्पकैः
2 ख–मध्ये पद्मं
3 ख–तदे–कं
4 ख–तस्यां

पश्चात्क्षेत्राग्निनिकटादारभ्य परिमार्जयेत् ।
त्रीणि त्रीणि तु भागानि प्रतिपङ्क्ति[1]त्रयं द्विज ॥२६५॥

एकीकृत्य नवांशं स्यादेकं प्राक् [2]पदबिम्बकम् ।
एकोनविंशत्यंशानि तद्बाह्यात्परिमार्जयेत् ॥२६६॥

आद्यपङ्क्तौ विना ब्रह्मन् शेषात्पङ्क्तित्रयात्तु वै ।
द्वितीयपादबिम्बार्थं [3]तद्वीथ्यर्थमत परम् ॥२६७॥

पङ्क्तिद्वयं मार्जनीयं शेषं पङ्क्तित्रयेण तु ।
द्वे चतुः षट् च भागानि दिक्प्रदेशात् क्रमेण तु ॥२६८॥

शोभोपशोभौ द्वौ कुर्यात् पूर्ववन्नवभागजम् (? जौ) ।
बिम्बपञ्च ततः कोणं सप्तविंशपदोत्थितम् ॥२६९॥

कुर्याद्यथा [4]तद्गमतो ममाप्यग्रेऽवधारय ।
समीपेऽभ्युपशोभाभ्यां द्वौ शोभौ भागवर्जितौ ॥२७०॥

संमार्ज्योन्मीलयित्वा च बिम्बं तु प्रथमं भवेत् ।
सप्तादशपदाद्भूतं बाह्याद्बिम्बं तु शोभयेत् ॥२७१॥

त्रीणि द्वितीयपङ्क्तौ तु सप्तगं बाह्यपङ्क्तिगम् ।
लुप्त्वैवं रागजालेन विभागोत्थेन पूरयेत् ॥२७२॥

क–ग–त्रयात् द्विज
ख–पादबिम्बकम्
तद्द्वितीयमतः
सर्वत्र तद्गमतो इत्येवास्ति

कल्हारपरिधैर्बाह्यमादौ रक्तोज्ज्वलेन तु।
मध्यबिम्बं तु गात्राणां विधेयं पाण्डरोज्ज्वलम् ॥२७३॥

तद्बिम्बद्वितयं कुर्यात् सितं गोक्षीरपाण्डरम्।
अन्तरा पादबिम्बं तु कुर्यान्मरतकप्रभम् ॥२७४॥

बहिस्स्थं जातरूपाभ्यां [1]वीथी राजोपलप्रभा।
सुधासमानि द्वाराणि शोभानि कजबाह्यवत् ॥२७५॥

पादबाह्यसमानानि [2]तूपशोभानि सत्तम।
पादाभ्यन्तरतुल्यानि कोणेष्वभ्यन्तराणि च ॥२७६॥

गात्रमध्यसमास्सर्वा बाह्यतो मण्डलाश्रयः।
बुद्ध्याधारमिदं प्रोक्तं गुणाकरमथोच्यते ॥२७७॥

[3]एकोनेन त्रिदशधा क्षेत्रं कृत्वा तु जायते।
शताष्टकं तु भागानामेकचत्वारि (?रिंशद्) भिः पदैः ॥२७८॥

त्रिसप्तकाधिकेनैव शतेनैव तु पङ्कजम्।
पद्मक्षेत्रं समारभ्य द्विद्विपङ्क्तिष्वथासनम् ॥२७९॥

[4]तस्मिन् वै गात्रकं कुर्याच्चित्वारिंशत्पदे स्थितम्।
पञ्चबिम्बान्वितं रम्यं तदर्धं (?र्थं) दिक्षु लोपयेत् ॥२८०॥

---

1 क–विधि
2 क–ग–त्रयशोभानि
3 ख–एकोनांशेन त्रिदशधा
4 क–ग–तस्मिन् ये

आद्यन्तपङ्क्तिद्वितयात् कोष्ठकानां त्रयं त्रयम्।
एकैकं मध्यपङ्क्तिभ्यामेवमष्टपदोत्थितम् ॥२८१॥

गात्रकं (?के) मध्यबिम्बं शेषाण्यष्टपदान्यपि।
तत्पार्श्वस्थानि कार्याणि यथा तच्छृणु पौष्कर ॥२८२॥

समीपं मध्यबिम्बस्य आद्यन्ताभ्यां तु मार्जयेत्।
भागं भागं द्विजश्रेष्ठ त्रीणि त्रीणी तदान्तरात् ॥२८३॥

द्वौ द्वावाद्यन्तपङ्क्तिभ्यां तद्वन्मध्यस्थितद्वयात्।
एवं गात्रद्वयं कृत्वा चरणान्यथ साधयेत् ॥२८४॥

तस्य [1]बिम्बद्वयस्याथ [2]बहिरन्यद् द्वयं भवेत्।
प्रागुत्तराभ्यां बिम्बाभ्यां निकटाद् परिमार्जयेत् ॥२८५॥

द्विबिम्बद्वादशोत्थं तु द्विबिम्बचरणं द्विज।
कजक्षेत्राश्रिनिकटात् [3]तदर्थं भागपञ्चकम् ॥२८६॥

पङ्क्तिद्वयात्तु संशोध्यं प्राक् पङ्क्तौ त्रितयं [4]ततः।
पदद्वयं द्वितीये[5]स्याद् बिम्बमाद्यं स्फुटं भवेत् ॥२८७॥

ततः पञ्चदशांशानि तद्बाह्यं परिशोधयेत्।
द्वितीयपङ्क्तावेकांशं तृतीयेऽशं तु पञ्चकम् ॥२८८॥

नवांशानि चतुर्थायां वीथीं पङ्क्तिद्वये ततः।
तृतीयेनावशिष्टं यत् तत्र द्वारं गले त्रयम् ॥२८९॥

---

1. ख-बिम्बद्वयं स्यात्तु
2. ख-बहिरन्यत् तः कृता पर्यन्तं गलितम्
3. ख-तदर्धं पादपङ्कजम्
4. क-त्वतः
5. क-ग-घ-स्यात् नः वीथीं गलितम्

पञ्चपञ्चो[1]पकण्ठं तु तदाधारात्तु सप्तकम्।
पूर्वपङ्क्तावुपस्थं च शोभं कुर्यान्नवांशजम् ॥२९०॥

तदुपस्थमुपद्वारं तत्र [2]कण्ठपथे द्वयम्।
आद्याद्वितीयपङ्क्तिभ्यां द्विद्विकं द्विद्विकं सृजेत् ॥२९१॥

द्विदेहाच्च (?हंच) ततोऽश्रि (? श्रि) स्स्यात् त्रिसप्तदनिर्मितम्।
वीथिकाश्रेस्तु निकटात् षट्कं पङ्क्तिद्वयं (?ये) सृजेत् ॥२९२॥

पङ्क्तिद्वयं (?ये) तु तद्वाह्याच्छोध्याच्चा (?ध्यंचा) द्गणद्वयम्।
आद्यद्वितीयपङ्क्तिभ्यां द्विद्विकं द्विद्विकं सृजेत् ॥२९३॥

सप्तकं तु [3]तृतीये स्यात् परितः परिमार्ज्य च।
व्योमबाह्यं तु तस्मिन् स्यात् पाण्डरोज्ज्वलमस्य च ॥२९४॥

पैठीयं मध्यबिम्बं तु कुर्याद्वृत्तं [4]भागकावृतम्।
रवेर्मरतकाभेन तदन्तस्थे तुषारवत् ॥२९५॥

पादाभ्यन्तरबिम्बं यत् तद्व सूर्यसमप्रभम्।
रक्तारुणं तु तद्बाह्यं वीथिका व्योमबाह्यवत् ॥२९६॥

द्वाराणि धवलान्यस्मिन् शोभस्याद्बन्धुजीववत्।
काञ्चनाभमुपद्वारं कृष्णान्यभ्यन्तराणि च ॥२९७॥

---

1 ख–कण्ठात्तु
2 ख-कण्ठोपधौ
3 ख–तृतीयं
4 क–ग–भागकव्रतं

भागं मरतकामेन तेषां वै परिपूरयेत्।
एतद्गाकारं विद्धि भुवाख्यमधुना शृणु ॥२९८॥

द्विपञ्चदशधा क्षेत्रं कृत्वा जातान्यथाब्जज।
शतानि नवभागानि मध्यतः पुष्करं लिखेत् ॥२९९॥

शतेनैव तु सार्धेन पङ्क्तेन ततो बहिः।
पीठं पङ्क्तिचतुष्केण ततो द्वौ [1]गात्रगा (?गैः) पदैः ॥३००॥

चत्वारिंशत्तु भागानि चतुरभ्यधिकानि च।
दिक्षु मध्यबिम्बार्थं द्विषट्कं परिमार्ज्य च ॥३०१॥

आद्यपङ्क्तौ चतुष्कं तु अन्त्यपङ्क्तौ तथैव च।
मध्यपङ्क्तिद्वयाच्चैव द्वितयं द्वितयं पुनः ॥३०२॥

एकीकृत्य ततो बाह्ये द्वे द्वे बिम्बेऽष्टभागजे।
प्रागावसानपङ्क्तिभ्यामेकैकं च द्विजांशकम् ॥३०३॥

त्रि (? त्री) णि त्रीण्यन्तरस्थाभ्यां कृत्वैवं तस्य पार्श्वयोः।
कार्यं बिम्बद्वयं चास्य प्राक्प्रत्यक्पादयोर्द्विज ॥३०४॥

मध्यसंख्यैः [2]पदैरेता (?षा) मेकैकामन्तरा द्वयोः।
एवं गात्रगणे सिध्दे पञ्चबिम्बान्विते ततः ॥३०५॥

चतुर्बिम्बजयुक्तानि चरणानि प्रकल्पयेत्।
एकैकं चरणं कुर्यात् विंशत्यंशकसंवृतम् ॥३०६॥

---

1 क–ग–गालकापदैः

2 क–ग–पदै ह्येता

ततो व्योमाश्रिनिकटाच्छोधयेद्रागसप्तकम्।
एकांशमाद्यपङ्क्तौ तु त्रीणि त्रीण्यपरं द्वयात् ॥३०७

कृत्वैवं पादमध्ये तु बिम्बं त्रीण्यथ मे शृणु।
पार्श्वद्वये तु द्वितयं त्रितयं तदधस्तयोः ॥३०८

द्वितीयपङ्क्तावेकांशं गृहीत्वा द्वितयं पुनः,
तृतियपङ्क्तावेकं तु बहिष्ठायां तु रञ्जयेत् ॥३०९

एवं [1]चतुर्विधं विध्दि पक्षबिम्बद्वयं तु तत्।
पञ्चांशं यत्तयोर्बिम्बं बाह्यपङ्क्त्या तु कल्पयेत् ॥३१०

भागं पङ्क्तिद्वयेनाथ वीथीं शेषत्रयेण तु।
द्विचतुः षट्पदान्यत्र द्वारं कण्ठादितः क्रमात् ॥३११

शोभोपशोभशोभानि प्राग्वन्नवपदानि च।
[2]यथैकैका (?क) दिशं (? दिशो) भागे भवेच्छोभाचतुष्टयम् ॥३१२

उपशोभद्वयं चैव तथा तत् परिमार्जयेत्।
द्विबिम्बमथ कोणं च कुर्याच्छोभान्तरस्थितम् ॥३१३

एकांशं पूर्वपङ्क्तौ तु द्वितीये स्याच्चतुष्टयम्।
अग्रं हित्वा पदेनैव बिम्बं कोणगतं भवेत् ॥३१४

भागपञ्चकसंयुक्तं यथा बाह्यस्थमुच्यते।
नवांशानि बहिष्ठायां द्वितीयायां तु वै पदम् ॥३१५

---

1 क–ग–चतुर्भि संसिद्धं

2 ख–यथैकैकं

एवं दशांशजं कृत्वा रागजालेन पूरयेत्।
[illegible]लरक्तोत्पलवत् कोणं कुर्यात्तु पङ्कजम् ॥३१६॥

गात्रस्य मध्यबिम्बानि पीतपिष्टप्रभाणि च।
[illegible] बिम्बे तदुपस्थे तु कुर्यान्मरतकोपमे ॥३१७॥

[illegible]या (? ताभ्या) मपि च बाह्यस्थे तपनीयोज्ज्वले [1]स्मृते।
[illegible]रणे मध्यबिम्बं यत् तत् कार्यं रजतोज्ज्वलम् ॥३१८॥

[2]बाह्लीकपुष्पसदृशे तस्य बाह्यगते द्विज।
कुर्यान्मरकताभं तु तत्समीपगतं च यत् ॥३१९॥

[3]कुन्देन्दुधवलां वीथीं कुर्याद्द्वाराणि पूरयेत्।
राजपाषाणतुल्येन शोभां गात्रकमध्यवत् ॥३२०॥

[4]कुर्यान्मरतकाभं तु तत्समीपगतं तु यत्।
तस्यामुपगतं (? तत्पार्श्वस्थमुप) शोभं भवेत् तच्चम्पकप्रभम् ॥३२१॥

कोणात् सुन्दरगं (? कोणादन्तरगं) बिम्बं कार्यं रक्तोज्ज्वलेन तत्।
इन्द्रनीलनिभेनाथ तद्बाह्यं परिभूषयेत् ॥३२२॥

[5]ध्रुवाभिधानमित्युक्तं परमानन्दमुच्यते।
एकत्रिंशत्पदैः सम्यक् कृत्वा क्षेत्रं हि जायते ॥३२३॥

---

1. क-ग-घ-स्मिते
2. त्रुटित ३१९ तः पुनर्निर्मितः
3. त्रुटित ३२१
4. त्रुटित ३२२
5. क-ग-घ-धूपाभिधान

(ध्रु)वाभिधानमित्युक्तं परमानन्दमुच्यते ।
एकत्रिंशत्पदैः सम्यक् कृत्वा क्षेत्रं हि जायते ॥३२४॥

शतानि नवभागानामेकषष्टिपदैस्तथा ।
युक्तानि भागकैर्मध्ये पद्मक्षेत्रं तु पौष्कर ॥३२५॥

एकोनसप्ततिपदैर्युक्तैरेव शतांशकैः ।
बाह्यपङ्क्तिचतुष्कं तु पीठार्थं मार्जयेत्ततः ॥३२६॥

शतद्वयं तु भागानां द्विसप्तत्यधिकेन तु ।
भवेत्पीठं सुललितं पादगात्रकसंयुतम् ॥३२७॥

तस्मिन् वै गात्रकं रम्यं चत्वारिंशत्पदैर्भवेत् ।
अष्टाधिकैस्तु भागानां पद्मबिम्बयुतं तु तत् ॥३२८॥

दिक्षु मध्यमबिम्बार्थमष्टकं परिमार्ज्य च ।
आद्यपङ्क्तौ तृतीयं तु अन्त्यपङ्क्तौ तथैव च ॥३२९॥

मध्यपङ्क्तिद्वयाच्चैव पञ्चकं पञ्चकं पुनः ।
एकीकृत्य ततो बाह्ये द्वे द्वे बिम्बेऽष्टभागजे ॥३३०॥

आद्यन्तपङ्क्तिद्वितयात कोष्ठकानां त्रयं त्रयम् ।
एकैकं मध्यपङ्क्तिभ्यां लुप्त्वैवं तस्य पार्श्वयोः ॥३३१॥

कार्यं बिम्बद्वयं तत्र प्राक्प्रत्यक्पादयोर्द्विज ।
प्रागावसानपङ्क्तिभ्यामेकैकं च द्विजांशकम् ॥३३२॥

त्रीणि त्रीण्यन्तरस्थाभ्यां कृत्वैवं परिमार्ज्य च ।
एवं गात्रगणे सिध्दे पद्मबिम्बान्विते ततः ॥३३३॥

चतुर्बिम्बसमेतानि चरणानि प्रकल्पयेत्।
पञ्चकं चरणं कुर्याद् विंशत्यंशकसंयुतम् ॥३३४॥

ततो व्योमाग्निनिकटात् शोधयेद् भागसप्तकम्।
पञ्चांशमाद्यपङ्क्तौ तु त्रीणि त्रीण्यपरद्वयात् ॥३३५॥

[illegible] पादमध्ये तु बिम्बं त्रीण्य मे शृणु।
पादाग्रे तु द्वितयं त्रितयं तदधस्तयोः ॥३३६॥

द्वितीयपङ्क्तावेकांशं गृहीत्वा द्वितयं पुनः।
तृतीयपङ्क्तावेकं तु बहिष्ठायां तु रञ्जयेत् ॥३३७॥

चतुर्थं तु तद्विद्धि पक्षबिम्बद्वयं द्विज।
भागपङ्क्तिद्वयेनाथ वीथिं शेषत्रयेण तु ॥३३८॥

तृतीयपङ्क्तावुपस्थं च शोभं कुर्यान्नवांशजम्।
तदुपस्थमुपद्वारं तत्र कण्ठपथे द्वयम् ॥३३९॥

चत्वारि चोपकण्ठात्तु षट्कं तद्बाह्यतो मृजेत्।
ततोंऽशकचतुष्केण सूक्ष्मशोभं प्रकल्पयेत् ॥३४०॥

[illegible]ाच्च ततोऽग्निः स्यात् सप्तविंशतिकोष्ठयुक्
नाभिकाग्रेस्तु निकटादाद्यपङ्क्तौ नवांशकम् ॥३४१॥

तृतीयपङ्क्तौ द्वित्रितयं तृतीयायां पदं पदम्।
एकीकृत्य भवेदाद्यं बिम्बं सप्तदशांशजम् ॥३४२॥

ततो बाह्याद्दशांशं तु एकीकृत्य विमृज्य च।
लुप्त्वैवं रागजालेन विभागोत्थेन पूरयेत्) ॥२४३॥

इति पञ्चमोऽध्यायः समाप्तः

——————————————*

अथ षष्ठोऽध्यायः

[1] ....

....

[2]भूमौ विभजयेत्तस्मात् ततो विभजयेत् पुनः।
कृत्वोभयं परिच्छिन्नं [3]........गवं पुरा ॥१॥

ततोऽष्टमनवांशं च [4]दशमैकादशं च वा।
द्वादशांशं परित्यज्य [5]क्रमात् पद्मप्रसिद्धये ॥२॥

पद्मानामपि [6]पद्मानां ([7]पद्मानां) त्रिपत्राद्यावदन्तिमम्।
शेषेण कर्णिकाभागे केसराणि दलानि च ॥३॥

सम्यग्विकसिताकारं (?) पद्मक्षेत्रेष्वयं क्रमः।
दलाप्रसिद्धये नूनमाख्यातं कमलोद्भव ॥४॥

अयमध्यायः पद्मलक्षणप्रतिपादकः तथैवान्ते निगमितश्च। अस्यादौ महान् ग्रन्थपातः। अत्रेदमवधेयं–अस्मादध्यायात् पूर्वतनः पञ्चमोऽध्यायः इदम्परतया सर्वतोभद्रादिमण्डललक्षणप्रतिपादकः। तस्य चान्ते ग्रन्थपातः तच्चिह्नमपि न किञ्चित् प्रदर्शितम् सर्वेषु कोशेषु; प्रत्युत पञ्चमाध्यायस्य त्रुटिस्थले भग्न–पृष्ठोऽयं षष्ठाध्यायभागः अलक्षितसन्धिबन्धस्संयोजितः दैवादन्ते "इति षष्ठोऽध्यायः" इति निगमितो दृश्यते।

क–...पुनः ग–घ–भूतसमात् तः विभज

ख–चिह्नं व्यामो? ग–घ–चिह्नं च्छयामो

ग–घ–दशमैकादशं

क–ग–घ–क्रमपात्राभशोधये

पद्मानां इति स्यात्

वक्ष्ये मुकुलिताकारं (?र) पद्मपत्राग्रसाधनम् ।
[1]मध्याच्चिह्नावसानं तु कर्णिकाद्यैर्विभज्य च

भागैश्चतुष्प्रकारोत्थैः सुसमैर्विषमैस्तु वा ।
यथा तत् ते प्रवक्ष्यामि येन निःसंशयो भवेत्

नवाष्टसप्तषट्पञ्चचतुर्भिश्चांशकैर्भवेत् ।
त्रिदलाद्यष्टपत्रान्तक्षेत्रं वक्ष्ये पृथक् पृथक्

मध्यदेशात् समारभ्य शेषं क्षेत्रावसानकम् ।
एकैकांशेन सर्वेषां मध्ये कार्या च कर्णिका

शेषाणां [2]त्रिंशत्संख्यानां त्रिष्वाद्यप्रति[3]दीर्घिताः,
केसराण्यंशदीर्घाणि [4]दलमूलार्धकर्णिका

अ (?न्य) थवा कर्णिकोच्छ्रायतुल्यानि परिकल्प्य वै ।
स्थितानि पत्रमध्ये तु सर्वत्र द्वित्रिसंख्यया

दलशेषं द्विधा कृत्वा तन्मध्ये प्रथमं स्मृतम् ।
मध्यात् पद्मदलाग्रं यत् कोटिमूले तु कीर्तितम्

त्रिपत्राद्यष्टपत्रान्तं पद्मानामीदृशो विधिः ।
[5]नवपत्रादितो यावत् सप्तविंशद्दलान्तकम्

---

1 ख–मध्याद्विह्नावसानं तु
2 क–ग-घ–त्रिंशत्संख्येन
3 ख–दीर्घकाः
4 क–बलमूला ग–घ–बलमूलाधकान्यथा
5 क–ग–घ–नवपत्रान्ततो

यथा स्यात् कर्णिकामानं तत् ते वच्मि सकेसरम्।
न्यूनं विंशतिमं भागमष्टपत्रस्य कर्णिकम् ॥१३॥

तत्कर्णिकाप्रमाणस्य [1]त्वेकवृद्ध्या तु वंशयेत्।
विधिनानेन पद्मानां प्रथि (? धि) का कर्णिका नयेत् ॥१४॥

दलाग्रदं केसरं यत् कुर्याच्छिष्टेन पूर्ववत्।
दीर्घिका (?का) केसराणां तु कर्णिकार्धेन वर्धयेत् ॥१५॥

अथोऽन्येन दलाब्जानां यागानां देवता पुनः।
ब्रह्मन् निर्वर्त्यमानानामेष एव विधिस्स्मृतः ॥१६॥

सुस्थिताधारपद्मानां हेमशैलादिवर्त्मनाम्।
पर्यङ्कशयनाभोगं मूर्त्यादीनां निवेशने ॥१७॥

तत्प्रभा (?भा) [2]पति (प्रधि) कानां च चतुर्थांशेन कल्पयेत्।
पत्राणि केसराढ्यानि त्रिभिरंशैस्तु कर्णिका ॥१८॥

सा चोच्छ्रिता दलार्धेन दलमानेन वा भवेत्।
कुर्याद्दलार्धदीर्घाणि वर्तितानि तदन्तरे ॥१९॥

केसराण्यथवा विद्धि तत्त्रिभागसमानि च।
कल्पनीयानि वा विप्र कर्णिकासंश्रितानि च ॥२०॥

प्रागुक्तोच्छ्रायमानानि सम्यगेवोत्थितानि च।
ईदृशानां द्विजाब्जानां सहस्रशतसंख्यया ॥२१॥

---

1 ख–त्वेकवृद्धितु
2 क-ग-घ–पतिकाब्जानां

शोभानुरूपया दृष्ट्वा संपाद्या पत्रसन्ततिः।
कर्णिकाऽपि ततः कुर्यादुक्तमानाधिका [1]यया ॥२२॥

वृत्तायतानां पद्मानामेष भाव (?एक) विधिस्स्मृतः।
एवं सञ्चिन्तयित्वा तु योऽस्त्याद्रूनाधिका यथा ॥२३॥

भ्राम्यं वृत्तचतुष्कं तु मध्यस्थं विद्धि कर्णिका।
द्वितीयं केसराख्यं तु दलमध्यं तृतीयकम् ॥२४॥

नार्यं? (?तुर्यं) दलावसानं तु स्यात्तं चिह्नो (?तच्चिचह्ना)
न्तिकन्तुवत् (? तृ वा)।
पश्चाद्दलावसानस्यवृत्तः याभ्यन्तरे स्थिते ॥२५॥

पद्मानां प्राग्बहिश्चोक्तं प्रागुक्तपरिसंख्यया।
अनुक्तेष्वपि वाऽब्जेषु नियमादूर्ध्वगेषु च ॥२६॥

सामान्यमंश [2]संख्याता (?न) तेष्वन्येषूदितेष्वपि।
त्रिपत्रादिषु सर्वेषु त्वथवा कमलोद्भव ॥२७॥

येन यद्भ्राजते पद्मं सोंऽशस्तस्याग्रतः क्षिपेत्।
पत्रविस्तारसंक्षेपवशेन च वरप्रदः ॥२८॥

तस्मात् संक्षिप्तपत्राणामग्रं दीर्घं विराजते।
तद्वद्बिम्बोदरस्थानां बहुपल्लविनां तु वै ॥२९॥

---

1 ग–घ–ऽथवा

2 ख–ग–घ–सङ्घाता

साध्यपत्रांशसिद्धिं च कृत्वैवं सूत्रसञ्चयम्।
स्फटिकादर्धमंशानां विनिक्षिप्य ततोऽब्जज ॥३०॥

दलार्धमानसूत्रेण दलाग्रं संस्थितेन च।
दलांशकं 1...सन्तु दलांशस्यैव मध्यमा ॥३१॥

मत्स्यचिह्नद्वयेनैव सम्यगुत्ताद्य सङ्गमम्।
पत्रमध्यं प्रसिद्ध्यर्थं तेषु सूत्राण्यतः क्षिपेत् ॥३२॥

दलरा (?लाया) मध्यमं सूत्रं प्रकीर्त्यां? ह्यवतिष्ठते।
शेषं सूत्रद्वयं ह्येषां साधकं स्यात् परस्परम् ॥३३॥

इत्युक्तं पद्मयागानां सूत्रपातं समासतः।
दलानां [2]घटनां चाथ समासाच्छृणु सन्ततिम् ॥३४॥

यद्वेन्दुलाञ्छनाद्यैस्तु ससूत्रैरेव जायते।
अभीप्सि [3]तामपूजास्य? (?ब्जपूज्यस्य) प्रादक्षिण्याल्लिखेद्दलम् ॥३५॥

दिग्विदिक्सप्तसंश्लेषैः पूरणाय कजच्छदैः।
दलमध्ये कदो (? जो) रस्थं? सूत्राणां तु दलान्तरम् ॥३६॥

तुर्यवृत्ता [4]वसानाद्वै समारभ्य तु लाञ्छयेत्।
स्पृशेत् तत्सिद्धिसूत्राभ्यां मध्ये तु सदशाक्षितिः ॥३७॥

---

1 ख-घ-द्विसासन्तु
2 ख-त्वदलानां च समासा
3 ख-तामपूजा स्यात्
4 ख-वसानाद्यैः

सूत्रयोः शशिनो? न (?नि) न्यायथा कण्ठो तु [1]मीलिता (?तो)
ततश्शशिकलाश्रृङ्गस्थाने सूत्रं निधाय च ॥३८॥

दलाग्रभागपर्यन्त [2]निष्पाद्यावपरं तु वा।
कृतेनानेन विधिना शीर्णपत्राकृतिर्भवेत् ॥३९॥

[3]अन्तराद्यन्तसूत्राभ्या[4]मशान्तानाममत्यशीम्।
सिद्धस्य [5]शर्णो (?शीर्ण) पत्रस्य [6]त्वप्रांशार्धस्य चान्तरे ॥४०॥

कृत्वा सूत्रं [7]समानीय प्राग्दत्तांशस्य सन्निधिम्।
एवं तदवधे (?धेः) [8]सूत्रस्त (? सूत्रं त) देव? कमलोद्भव ॥४१॥

दिव्य [9]चन्दनलेख्यां च ज (?चा) लयेच्छशिलाञ्छने।
अग्रवज्जायते तीक्ष्णं मध्यदन्तो (ध्यादन्तं) दलान्तरम् ॥४२॥

---

1 क-ग-घ-मीलिना

2 क-ग-घ-निष्पाल्यावपरं

3 क-ग-घ-अन्तरावद्य

4 क-मन्तनाम ग-घ-मन्तनाममत्यशि

5 क-'शीर्णपत्रस्य' इति स्यात्

6 घ-त्वप्रांशुशार्धं स्य शान्तरे

7 ग-घ-समानीया

8 क-घ-सूत

9 क-चन्दनवे ग-चन्दनवेल्यां चा घ-चन्दनवेला लाचा

अथ संसक्तपत्राणां [1]स्यादिदं (दल) साधनम्।
अभासंसक्तपत्राणां [2]स........सूत्रत्व [3]........विना ॥४३॥

विना श (? विनाशं हि) कुर्याच्चपसा........।
..........मुत्थानमर्पानां पत्रजन्मावधेः पृथक् ॥४४॥

यथा तदधुना वच्मि तव सन्देहशान्तये।
दलसिद्धिं विना प्राक्......संयुक्तं लिख्य पङ्कजम् ॥४५॥

त्यक्त्वा व्योमार्धमात्रं तु समीपात् सूत्रमध्ययोः।
तृतीयांशं तु पादं वा ज्ञात्वांशाब्जे पदे स्मृतिम् ॥४६॥

[4]एतं चन्द्रेऽर्धचन्द्रं तु दलमध्यं तु पूर्ववत्।
छत्रं ग (? पत्रं तु) ब्रह्मदेशस्थं सूत्रद्वितयपातनात् ॥४७॥

(? तत्) स्यात् संसक्तपत्रं तु मार्जना[? नात्] सिद्धिसूत्रयोः।
अदृष्टपृष्ठभागस्य परिवारावृतस्य च ॥४८॥

सामुख्यं तु विभोः कल्प्यं भागमाश्रित्य दक्षिणम्।
आश्रयं भूतपादी (?दा) नां दिग्विदिग्घृदयं हियम् (?त) ॥४९॥

क्रमात् प्राच्यमथाग्नेयं दक्षिणे नैर्ऋतिक्रमात्।
एवमुत्तरभागे तु ऐशानं दैवतं स्मृतम् ॥५०॥

---

1 ख–थय
2 ख–सहि सपि
3 ख–विर्मविनाम्
4 ख–एतच्चन्द्रार्धं

दलता (?लाप्रा) देवमस्या थ? ददतं ध (दल सन्धा) नमुच्यते।
प्रागीशदलसन्धेस्तु मध्यात् सूत्रं प्रसार्य च ॥५१॥

आप्यऋक्षेशयोः पत्रं सिद्ध (?द्धि) पर्यन्तमानयेत्।
प्राक्पदादीश्कराख्यस्य पोम्य (?प्रा॰त) र्व्यं? पूर्वलक्षितम् ॥५२॥

पङ्क्तित्वे वर्तमानस्य दलजालस्य लक्षणम्।
इत्येतत् पत्रबन्धानामब्जनामब्जसंभव ॥५३॥

कीर्तितं सर्वसामान्यं कर्णिकासाधनं शृणु।
सार्धेन मूलव्यासेन तेन पदाधिकेन वा ॥५४॥

द्विगुणेनाथवा विप्र कुर्याद्वै कर्णिकोच्छ्रितम्।
सबीजं वक्त्रविस्तारं [1]तथैनेन प्रकल्पयेत् ॥५५॥

हि (?ही) कर्णिकाप्रान्तः? मेखलार्थं विवर्ज्य च।
ब्रह्मस्थानपदे शेषं बीजार्थं विभजेद् द्विधा ॥५६॥

[2]बीजैस्तन्मध्यतस्तस्य दिग्विदिक्ष्वष्टकं लिखेत्।
परिधेरवसानं तु बीजानामन्तरं द्विज ॥५७॥

किंचिन्निम्नाऽथ कर्तव्यं [3]बीजो वै कथ्यते यथा।
जाम्बूनपदादिधातूत्थं यज्ञकाष्ठाश्मजं तु वा ॥५८॥

---

1 तथैतेन इति स्यात्

2 घ–बीजैः इत्याद्यर्धत्रयं गलितम्

3 ख–बीजोपं सज्यते

सुषिरं कर्णिकाकारं मन्त्रं (?पत्रं) कुर्याद्वि [1]मेदभृत् ।
तेनेन्द्र (द्रं) कर्णिकाकारं कर्णकेल (?कर्णि वर्ध) समुच्छ्रितम् । ५९॥

श्रीवेष्टकरस (?कैः स) मुदितमीषत् क्षीरमधुप्लुतम् ।
(? कूष्मा) ण्डपिष्टशालीनचूर्णेन सह योज्य च ॥६०॥

रञ्जितं कुङ्कुमेनैव [2]सुपीतेनाथ सानुना ।
द्विदेहं तेन तद्वक्त्रं पत्रबन्धु (?न्धे) प्रसूर्य (?सार्य) च? ॥६१॥

कवाटरहितं कृत्वा पिण्डीभूय यथागतम् ।
तदा नियोज्य स्वक्षेत्रे हेमरत्नादिकान्विते ॥६२॥

[3](मसी) पात्राणि सर्वाणि का (? क) मान्निम्नादि पूर्य च ।
प्रोक्तावि तु च वै मध्याज्जलस्थमिव गोलकम् ॥६३॥

करिकुम्भसमानानि द्विजाण्डसदृशानि च ।
स बाह्याभ्यन्तरन्तस्थो देवीशोणोन्नतानि च ॥६४॥

क्रमान्निम्नं तु वै यावद्भागस (? म) तां व्रजेत् ।
तनुमूलप्रसुप्रान्तं ? मध्यमध्यामि पूरयेत् ॥६५॥

वृक्षलास्थल (?मूलास्थि) तुल्यानि क्रमशः केसराणि च ।
[4]..
एवं सम्पाद्य संपूज्य अन्येषाम्य (?म(न)न्तरे द्विज ॥६६॥

---

1 ख-केधकृत्–हृत्
2 क–ग–घ-सवि....थ
3 ख–ग–घ–मसा पत्राणि
4 अत्रमहान् ग्रन्थपातः

अध्यात्मा ह्य (ख्या) धिदेवाख्या अ [?ध्य] धिभूतक्रमेण तु।
मन्त्राणि मन्त्रमूर्तिश्च तत्त्वानि सकलानि च ॥६७॥

मन्त्रो ह्यध्यात्ममुद्दिष्टं मन्यमूर्त्य (?तिर) धिदैवतम्।
अधिभूतं स्मृतं तत्त्वमित्येवं क्रियते द्विज ॥६८॥

स्थूलसूक्ष्मपरत्वेन स्वयं [1]मान्त्री स्थितिस्तथा।
संनिवेश्यात्मसक्तं वा उत्तरोत्तरया सह ॥६९॥

प्रभवाप्ययनयोगेन [2]योजयेन्मन्त्रसन्ततिम्।
अभिन्नाभेदभूतानां वेदानां च पृथक् पृथक् ॥७०॥

अध्वक्रमेण युक्त्या वै स यागफलमश्नुते।
मन्त्रोदितं हि यद् वस्तु तद् विद्यानन्दलक्षणम् ॥७१॥

सर्वभावेष्वतीतत्वात् सर्वेषां [3](तत्) योजयेत्।
समस्तपद्मयागानां पत्रेष्वाद्यन्तयोस्तथा ॥७२॥

सर्वेष्वाधारभूतत्वात् [4]तद्बिम्बात्वात्तु तत्त्वतः।
न्यसेम केसरे लाजास्तां शक्तिं तद्धि कर्मणि ॥७३॥

अनेकभेदभिन्नानां व्यापिनीं सर्वदेहगाम्।
तदङ्गषट्कज्ञानाद्यं [?द्य] [5]समुदाया (?यात्) न्यदैश्वरम् [तदैश्वरीम्) ॥७४॥

---

1 ख—मन्त्रस्थित
2 ख—यो यजेन्मन्त्र
3 ख—स्तुत ग—घ-स्फुट
4 क—ग-घ-तल्लंबत्वात्तु
5 ख—समुदायां तु?

[1]येनानन्दाच्च शक्त्या वै ग्रहणं प्रतिपद्यते ।
सिद्धश्चो (?न्ती) तत्त्वतो भिन्ना (न्नां) न्यसेत् केसरकोटिभ
(? भा) म् ॥७५॥

साधिभूताधिदैवो यो मन्त्रोऽनुग्रहकृत् प्रभुः ।
पष्ठ्यो दलमध्ये तु तदङ्गानि च तत्र वै ॥७६॥

तदग्राच्च चतुर्दिक्षु [2]साष्टमन्त्रा दृदादयः? ।
विदिक्संकल्पनां कृत्वा तत्रास्त्रं तु प्रपूजयेत् ॥७७॥

केवलं द्विति? (?त्रि) शक्तित्वान्मध्ये मन्त्रसमीपतः ।
ध्यात्वा न्यस्याथ संपूज्यो नेत्रमन्त्रो द्विजोत्तम ॥७८॥

इत्येष परमात्मीयमन्त्रन्यास उदाहृतः ।
पृथक् षड्विंशसंख्यैस्तु तुर्यादौ यत् प्रकाशितम् ॥७९॥

स्थानभेदैः शरीरस्थं मन्त्रव्रतमह (?व्रातमिह) द्विज ।
थत् पिण्डं मन्त्रसंख्य (?ख्यं) स्तु (?तु) पदमन्त्रगणस्य च ॥८०॥

वर्तते हि प्रभुत्वेन त्वाधिपत्येन वै तथा ।
व्यूह [3]स्थागममन्त्राणां प्रागुक्तानां च सर्वशः ॥८१॥

[4]यदयत्यभिविंशत्य (?त्या) [5]त्वथवा ध्येययुक्तिभिः ।
पीठाख्यदेवतानां च पीठस्थाना (?नां) न (?ह्य) नेकशः? ॥८२॥

---

1. ख–येनानन्दाद्यशक्त्या
2. क–ग–घ–सह्यभूतं
3. ख–स्थानगमन्त्राणां
4. ख–यवद्यस्यभिविंशस्य
5. ग–घ–त्वायाद्येय

द्वाःस्याद्वाःस्थानुयायिभ्यां स्थानाश्रिष्वपरेष्वपि ।
सबाह्याभ्यन्तरस्थानि यागानां विविधानि च ॥८३॥

तानि त्वया ह्यभक्तानां नाभिव्यञ्ज्यानि पद्मज ।
वचसा कर्मणा चैव [1]इुतसे (?ष) क (?ल्म) षात्मनाम् ॥८४॥

विषयग्राहभूतानां ज्ञानज्ञेयाभिलाषिणाम् ।
श्रेयोर्थिनामिदं बाच्यं यो (?या) गभेदं मयोदितम् ॥८५॥

---

1 ख–सुपक्वे...

इती श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
पद्मलक्षणो नाम
षष्ठोऽध्यायः

———O———

अथ सप्तमोऽध्यायः

पोष्कर उवाच—

भगवन् पुण्डरीकाक्ष ज्ञातलोकव्रत त्वया।
भविनामभुवं [?शुभं] ज्ञात्वा व्यूहभेदस्तु सूचितः ॥१॥

तस्याहं श्रोतुमिच्छामि यथावत् परमेश्वर।
स्वरूपं च प्रमाणं च [1]साधनं न्यासमेव च ॥२॥

श्रीभगवानुवाच—

शृणुष्वावहितो ब्रह्मन् कथयामि समाहितः।
स्वरूपं लभते ब्रह्मन् [2]नानायोन्यस्य निर्वृतिम् ॥३॥

[3]द्वाराणा [? णां] [?पीठ] कोणानां पुरा[4]णान्तरतो [? न्तु ततो] द्विज।
वर्तुलानां विचित्राणां भुवनानां विशेषतः ॥४॥

पीठवीथीयुताद्वा [? नां] वा तुर्याप्राणां [?श्राणां] तु मध्यतः।
प्रागुक्तानां च सर्वेषामेकैकास्मिन् यथेच्छया ॥५॥

---

1 ग-घ—साधनान्यास क—साधनन्यास

2 क—नानायोन्यस्य ग-घ—ननायोस्य

3 क-ग—द्वाराणानिति

4 ग-घ—णान्तरते

सपद्मपत्रभेदेन त्वेकमूलोत्थितानि [?तेन] च।
प्रवृत्त [?प्राग्वृत्ते] पीठवीथ्यग्रद्वारमध्ये चतुर्दलम् ॥६॥

[1]कमलं तद्बहिस्त्रीणि त्रित [?द] लान्यम्बुजानि च।
चतुर्दश [?ल] समानेन यथा[2]या (?गान्तरं] शृणु ॥७॥

अस्य चाद्यं चतुर्व्यूह (? हं) त्रिकोणभुवनान्तरे।
चतुरश्रेण वाऽब्जानि [3]वृत्तशेषाणि मध्यतः ॥८॥

प्राग्व्यूहं स्याच्चतुःपद्मं तन्मध्ये तु चतुर्दलम्।
कमलं तद्बहिस्त्रीणि त्रित [?द] लान्यम्बुजानि च ॥९॥

द्वितीयं पञ्चभिः पद्मैः पञ्चपत्रे [?त्रं] हृदन्तरे।
चतुर्दिक्ष्वथ चत्वारि चतुष्पा [?ष्प] त्राणि तद्बहिः ॥१०॥

षड्भिरब्जैस्तृतीयं तु तन्मध्ये लिख्य षड्दलम्।
पञ्चभिः पञ्चवक्त्रे [?पत्रै] स्तु प्रागादापा [?वा] वृतं तु यत् ॥११॥

व्यूहानि त्रीण्यतोर्ध्वं वै सप्तपद्मानि पौष्कर।
सप्ताष्टनवपत्राणि तेषां मध्येऽम्बुजानि च ॥१२॥

बाह्यस्थानि च षट् सप्त क्रमादष्टदलानि च।
व्यूहत्रयमथोर्ध्वान्तादष्टकं कमलं भवेत् ॥१३॥

---

1 प्रथम चरणः श्लो. ९व मध्ये पुनरावृत्तः

2 ख-यायां तमहं ग-घ-यार्णमहं

3 ग-घ-वृत्ते

सप्त सप्त कजास्तस्मिंस्तृतीया (?तयं) बाह्यतस्तथा।
एकैकमन्तरस्थं तु क्षेमपद्मं तु पद्मज ॥१४॥

त्रीण्यथो नवपद्मानि व्यूहानि कमलोद्भव।
तेषामेकैकशो मध्येष्व (?त्य) ष्टदिक्ष्वष्टकं स्थितम् ॥१५॥

पत्र (?पश्चात्) त्रयोदश (?शं) व्यूह (?हं) संसाध्यैकादशाम्बुजम्।
एकं पूर्वोक्तवत् तस्मिन् दश शेषाणि तद्बहिः ॥१६॥

ततश्च सप्तमव्यूहादादितश्चाष्टपङ्कजम्।
सप्तादशदलं यावत्............................ ॥१७॥

[1](?अ) न्तस्थबाह्यपद्मानां दलसंख्यां निबोध मे।
आधस्याभ्यन्तरे कुर्याद्दशपत्रं सरोरुहम् ॥१८॥

तदेकैकं च तद्वृद्ध्या [2](?शेषाणां परिकल्पयेत्।
सप्तादशदलं यावत् तेषामभ्यन्तरे भवेत् ॥१९॥

[3]भूयस्तदपि (।पद्मानां) बाह्यस्थानां प्रकल्पयेत्।
[4]नवपत्रात् समारभ्य) त्वेकवृद्ध्या तु पूर्ववत् ॥२०॥

पृथक् पृथक् [5]............तस्य सत्तम।
बहिःस्थानि च पद्मानि सुरोऽशदलानि च ॥२१॥

---

1. ख-ग-घ—संतस्थ
2. घ—( ) कुण्डलान्तर्गतं गलितम्
3. ख—भूयस्तदपि....विप्र
4. क—ग—नवपत्रात्
5. ग—घ—कहआध्यायवं तस्य

इत्येषां व्यूहयागानां सपद्मा पद्मकल्पना।
कीर्तिता वै समासेन मया ते कमलोद्भव ॥२२॥

दिग्विभागं च पद्मानां प्राग्वत् पत्रोदितं भवेत्।
प्रमाणमयनं पश्चाद् गर्भस्थकमलादितः ॥२३॥

वीथ्या वै सह बाह्यस्थपङ्कजानां क्रमेण तु।
एकादशक्षेत्रमाद्यं (?पद्म) व्यूहस्य वर्तुलम् ॥२४॥

तादृग्द्वादशहस्तं स्याद्द्वितीयस्य ततः परम्।
एकैकं तु करं तावत् क्रमेणानेन कल्पयेत् ॥२५॥

निष्ठां व्यूहस्य वै यावच्चतुर्विंशतिभिः करैः।
सर्वदिग्वर्तुलं क्षेत्रं जायते विततं समम् ॥२६॥

[1]आकुलस्य पुरा मानं ब्रह्मन् व्यूहस्य कस्य चित्।
तन्मानेनार्धसूत्रेण मध्याद्भ्राम्य भ्रमं समम ॥२७॥

क्षेत्रमानमिति स्यातमधुना साधनं शृणु।
प्रागुक्तयुक्तं प्रागादौ भागौ द्वादशभिः समैः ॥२८॥

(?चतुरश्रीकृते तद्वत्) क्षेत्रे भागीकृते सति।
मध्यदेशात् समारभ्य तन्तुभिः पक्षसंमितैः ॥२९॥

प्रपूर्य व्यूहभृन्नाम यत् पुरा वर्तुलीकृतम्।
ततो (?त) पद्म (?पूर्वे) पदादादौ भागैर्द्वादशभिः समैः ॥३०॥

---

1 ग–घ–आकलस्य

निक्षयेत् सर्वसूत्राणि यावत् क्षेत्रमवाप्यते।
ब्रह्मस्थानात् समारभ्य क्षेत्रस्याद्याच्च तद्गुण (?णात्) ॥३१॥

न ध्वंशकानां तु...क्षेत्रान्तात् तावदाचरेत्।
मध्ये तु पञ्चभिर्भागैरेकैः प्राग्भ्राम्य वर्तुलम् ॥३२॥

एकांशमथ संत्यज्य वीथ्यर्धं चैव तद्बहिः।
परितो मध्यवृत्तस्य बाह्यवृत्तगणाश्च (?शि) तम ॥३३॥

सूत्राणामुपरि ब्रह्मन् चतुरंशकसंमितम्।
भ्रमणीयं च सूत्रेण मध्यापक्षे समे स्थितो ॥३४॥

भ्रामितानां च वृत्तानां क्षेत्राल्यपरिधेर्द्विज।
अंशकद्वितयं मध्ये [1]सवि (?रि) ताने (?न) च शिष्यते ॥३५॥

मध्यतो[2] बाह्यसूत्रस्य बहिस्स्थानं च पौष्कर।
स्वङ्या......... ॥३६॥

बहिस्स्थानां तु वृत्ताना [3]मन्तरालं तु यत् स्मृतम्।
तच्चानियतमानेन समानं स्यात् परस्परम् ॥३७॥

अन्तर्गतं हि वृत्तस्य···· ।
एकस्मिन् बहुधा व्यूह्य त्वन्तरालेषु चान्तिमम ॥३८॥

ग-घ-वर्धितान्ते

क-बाह्यस्य वृत्तस्य ग-घ-सूत्रस्य

ख-मन्तरालासु

एवमुल्लिखिते वृत्ते दिग्विदिक्परिसंस्थिते।
परिमण्डलरूपाणि गा·····... ॥३९॥

[1]·····...ये द्वे ते संयुतानि च।
स्थूलसूक्ष्मस्वरूपाणि पत्रभेदान्वितानि च ॥४०॥

काम[2]····ये......ब्जानि ततः शृणु।
प्राक् चोदितानि सूत्राणि बहिस्सत्ताप्रसिद्धये ॥४१॥

[3]····मध्यमाद् वृत्ता [4](माज्ययोत्रतिकावते)।
प्राक् प्रत्यक् सौम्ययाम्यं च समं सूत्रद्वयं तथा ॥४२॥

सूत्राणां द्व्यंशमानेन भ्राम्य मध्यं तु पौष्कर।
मध्यमस्य·········तत्राब्जं लिख्य पूर्ववत् ॥४३॥

चतुर्दलानि भेदेन यस्मिन् तर····।
प्राक् साधयित्वा पीठादि (?दि) द्वारान्त (?नां) मण्डलं बहिः ॥४४॥

संसाध्यं (?ध्य) च ततः पद्मा? ना (न्य) न्यथाऽर्थस्य साधनम्।
अंशकत्रितयाशेषात् षपूद्यं [5] [शं साधनस्य मे] ॥४५॥

..........................तो भवेत्।
शिष्टं यदन्तरस्थं तदेकीकृत्य विभज्य च ॥४६॥

---

1 तु–घ कामप्रथतामार्गमद्वारे ये द्वे
2 ख...ब्जानि तत
3 ग–घ निर्वद्वै
4 –ख (   ) कुण्डलगतान्यक्षराणि
5 ख (   ) अन्तर्गतान्यक्षराणि–ग-घ शंवासवस्त्यमे

चतुर्धा सुसमैर्भागैर्भ्येकांशेन चासमा? ।
............यैद्वारादीनां तु येन तु ॥४७॥

एवं क्षेत्रत्रयं भ्राम्यं ततः? पीठं तु साधयेत् ।
पादगात्रकमेदेन यथा तदवधारय ॥४८॥

पूर्वयामं...... बीजसंमुखम् ।
क्षिप्तसूत्रचतुष्कं प्राग् ब्रह्मस्थानक्रमेण तु ॥४९॥

ततः पैठीयवृत्ताभ्यां दिक्सूत्रस्य तु मण्डले ।
........ये च द्वयोर्द्वयोः ॥५०॥

[1]पीठ.... पुरुषगात्रेण (? सूत्रस्य सूत्रेण) द्विगुणेन बहिस्स्थितः ।
[2]सार्धेनान्तर्गतं वृत्तं तन्मात्रेण न पौष्कर ॥५१॥

[3]भागस्तु चिह्नवृत्ताभ्यां द्वाभ्यां ह्येतव तथान्तरे ।
सूत्रं कृत्वा तथाऽल्पस्य.... [4]देव हि ॥५२॥

षोडश [5]वीथिभूभागं? सूत्राभ्यामन्तरा भ (?मृ) जेत् ।
ब्रह्मस्थानं तु सूत्रेण मत्स्यवल्लाञ्छयेत् ततः ॥५३॥

पातिताभ्यां तु सूत्राभ्यां वृत्ताभ्यां तु समासतः ।
उक्तषड्भागसूत्रेण मध्यभागद्वयस्य च ॥५४॥

---

1 ख–पीठवेसूत्रस्य तु सूत्रेण
2 ख–एकेनान्तर्गतं
3 क–ग–घ–ततस्तु
4 ख–ग–घ–द्वितप्तत्वं द्वि
5 ख-विधि

[1](?दिग्) भागाभ्यां (?तु) मत्स्याभ्यां सं (?नि) रुद्धेन मद
(?त) न्तुना? ।
लाञ्छयेदथ चन्द्रौ द्वौ दिक्सूत्रस्य तु संमुखौ ॥५५॥

शृणुष्व पीठवृत्ताभ्यां [2]यथैकैकं लयं व्रजेत् ।
एकं वै मत्स्यचिह्नाभ्यां शृङ्गमेति लयं तथा ॥५६॥

प्रागास्फालितसूत्राभ्यां [3](चान्द्रया) परिधे (?र्धेर्द्वि) द्विज ।
मीलनं विधिना येन जायते लाञ्छयेत् तथा ॥५७॥

आ........मध्यस्थितं मध्यमर्धचन्द्रं तु लाञ्च (?च्छ) येत् ।
विधिना येन तद्वच्मि गोत्र [4](?गात्र सूत्रप्र) सिद्धये ॥५८॥

समीप (?पे) स्पष्टसूत्राभ्यां ममत्पु........विवर्जयेत् ।
पीठं वैपुल्यमानं तु तत्र सूत्रं निरुध्य च ॥५९।

प्राक् प्रमा (? पत्राग्र) मध्ये तु लाञ्छयेत् पादसंमुखम् ।
गात्रकं विधिना येन पार्श्वयोरुभयोर्भवेत्. ॥६०॥

विततादन्तरहितं व्यालवक्त्रं यथा द्विज ।
[5]भूता [?भुजा) भ्यां गात्रकाभ्यां तु मध्यं यच्चरणं ततः ॥६१॥

तदीया ब्रह्मलोकं च नरकस्थाश्च यान्त्यपि ॥१३॥

---

1. क-वेहं पतिव्रत
2. क-ह्याप मत्य विवजयेत्
3. क-ख-समृत्याबलवाहृता
4. क-घ-माना च ददेष्या

यानैश्चंद्रप्रतीकाशैर्द्योतयन्दिर्दिशो दश ।
[1]स्तूयमानश्च गन्धर्वैर्गीयमानश्च किन्नरैः ॥१४॥

वीज्य (ध्य) या (ऽमा) नश्च चमरैरप्सराभिः समन्ततः ।
अयमेव महात्मासौ [2]देहपातादनन्तरम् ॥१५॥

स काया कामचारि स्यात् सर्वत्र भगवानिव ।
प्राग्भुक्ता चाणिमादीनि स्वेच्छयाऽवतरेत् पुनः ॥१६॥

जात्युत्कर्षं समाश्रित्य प्रभावात्तस्य कर्मणः ।
कुले सतां च सिद्धानां देशे धर्मपरे शुभे ॥१७॥

[3]जातस्तमाच्छ्रिया युक्तो धीमान् सत्यपराक्रमः ।
प्रवर्तनार्थमन्येषां भविनां करुणापरः ॥१८॥

भुञ्जमानस्तु विषयानविरुद्धान् सदैव हि ।
ज्ञानकर्मरतः सम्यङ्मतिमान् सुप्रसन्नधीः ॥१९॥

तिष्ठेद्यथेष्टं संसारे रागनिर्मुक्तमानसः ।
अन्ते भूतमयं [4]देहं त्यक्त्वाऽस्ते वासुदेववत् ॥२०॥

सकृदप्यर्चितो देवो नवाब्जे मण्डलोत्तमे ।
[5]विद्याबीजे समुद्भूते विद्यामात्रे विनिर्मिते ॥२१॥

---

1. क–ख–ग–घ–स्तूयमानैश्च गीयमानैश्च
2. ग–घ–देव पादादनन्तरम्
3. ग–घ–जात तस्याश्रया
4. क–अन्ते तु पातयेत्
5. क–ख–विद्याबिम्बे

विश्वात्मा मूर्तिभेदस्य सत्यानन्दस्वरूपधृक् ।
विरजस्कैरमुक्तैस्तु मन्त्रैर्ब्रह्मप्रकाशकैः ॥२२॥

न भूयस्संभवस्तस्य भवेऽस्मिन् भयसंकुले ।
आरम्भावं (?आरम्भे एव) कामस्य नैष्ठिकस्यापवर्गिणः ॥२३॥

पौष्कर उवाच—

मूर्तयस्तु मया सम्यक् परिज्ञाताः पुरात्र [1]याः ।
ज्ञातुमिच्छामि विद्याख्यं मन्त्राणां लक्षणं प्रभो ॥२४॥

यैः पद्मकल्पना कार्या पद्मैर्निर्वर्तितैः प्रभो ।
ब्रह्मप्रकाशकानां तु मन्त्राणामथ लक्षणम् ॥२५॥

यैरुद्दिष्टं महायागे नवाब्जे पूजनं तथा ।

श्रीभगवानुवाच—

सर्वकामप्रदातव्यं (?न्यं च) इच्छाधारानिभं तव ।
महासमूहविभव क्षेत्रभूतास्पदेति च ॥२६॥

[2]मध्यपद्मे पदानां च नवकं परिकीर्तितम् ।
तत्त्वगर्भ (?र्भं) जगद्बीजं क्षारते क महात्मने ॥२७॥

[3]विद्यात्स्वरूपं निखिलमव्यक्तं [4]त्रिगुणेन वै ।
शब्दब्रह्मसंख्येयं [5]भगवामाग्यहामयः ॥२८॥

---

1. क–ख–पुरात्रयैः
2. ग–घ–मध्यपद्मपदानां च
3. विद्युत्स्वरूप
4. ग–घ–त्रिगुणे तु वै
5. क–भगवाभावमहाप्रथम्'

प्रकृते बहुमूर्तेऽथ प्रधानालम्बने तथा।
पादं वै ब्रह्मसोपानं तृतीये कमलेऽब्जज ॥२९॥

[1]संकल्पसिद्धिविषयानथ वस्तुप्रकाशक।
अविनाश महाबुद्धे व्यूहादष्टगुणा यतः ॥३०॥

मायामयेऽन्ते कमले चतुर्थे तु पदं स्मृतम्।
गुप्त प्रत्यक्ष नीरूप सर्वाधार सुखास्पद ॥३१॥

प्रजापते जीवकोश लिङ्ग[2]पुर्यष्टके ति (?च)।
दिग्देशकालप्रकटात् [3]चिद्बुद्धेर्बुद्धिगोचर। ॥३२॥

[4]धर्मोदये तु····रिति [5]सर्वेच्छापरिपूरकः।
[6]परिमाणो विश्वरूपं वा स्पष्टे मम्बुजेत्यमी ॥३३॥

सदातनोऽप्यपूर्णश्च [7]भद्रसर्वाभगास्सता।
नानास्वरूप [8]शब्दादेर्बहुभेदो ततोऽब्जज ॥३४॥

---

1. क–संकल्पसिद्धविषयात्
2. ख–ग–घ–पुर्यष्टके दिवैः
3. क–ख–चिद्बुद्धेः प्रतिगोचराः।
4. क–वर्मोवधेतु...रिति
5. ग–घ–परिपूजकः
6. ग–घ–परिमाणे
7. ख–सर्वभगास्पद, ग घ–भद्रसर्वाभगस्सदा
8. ग–घ–शब्दादे बहुभेदे

[1]प्रभवच्चिद्य ब्रह्मेति सप्तमेति [2]क्रमाक्रमैः।
व्यक्ताव्यक्त ततो माये विद्ये [3]व्यक्तविकासके ॥३५॥

[4]पुरो···च्छिन्नसंतान अष्टमे कमले पदात्।
भूतभव्य भविष्याथ परिमाण विजृम्भिताः ॥३६॥

महाचक्रमहावर्ता सिद्धे सिद्धफलप्रदा।
इति विद्यापदानां च स्वरूपेण प्रकाशितम् ॥३७॥

अथ ब्रह्मपदानां च लक्षणं चावधारय।
सकृद्विभागता सद्ब्रह्म सुप्रतिष्ठित अनाहतः ॥३८॥

महा विभूषतानन्द घ्रतमित्योऽस्मि (दि) ताक्षर।
अज संपूर्णषाड्गुण्य अचिन्त्याद्भुत केवल। ॥३९॥

सर्वशक्ते असंकीर्ण सुशान्त पुरुषोत्तम।
शाश्वताचल सर्वेश निर्विकार निरञ्जन ॥४०॥

[5]स्वभाव वासुदेवत्य [6]निस्तरङ्गे स्त्रिपोष्कर।
उपादेयमनौपम्य [7]सुप्रकाशास्थिरामृत ॥४१॥

---

1. ग–घ–मभवच्छाद्य
2. ग–घ–क्रमः क्रमैः
3. क–ग–व्यक्तिविकासकः
4. ग–घ–प्ररो...च्छिन्नसंताने
5. क–ख–प'सुदेवस्य
6. ग–घ–निस्तरङ्ग इति साधु–
7. क–ख–संप्रकाअ

[1]अग्राह्यानन्त चिद्रूप हंसेति तदनन्तरम् ।
[2]अव्ययातर्क कूटस्थ निर्मलापार सद्बृहत् ॥४२॥

सर्वातिशायिनी यत्र इत्यब्जे पद्ममेऽब्जज ।
पुण्डरीकाक्ष संबुध्द परिपूर्णगुणोज्झित ॥४३॥

अकलङ्क असङ्कल्प [3]ज्ञेयापरिमित श्रिया ।
[4]सदानन्दापतीहीनि बीजं ह्यन्यपलायन ॥४४॥

अनन्त संमितस्सर्वे ज्ञानज्ञेय सनातन ।
विकासित्वैश्वर्यक्ष परमानन्द भास्वर ॥४५॥

स्वच्छन्दगमनालोक नित्यतृप्त निरञ्जज ।
लोकनाथ अनिर्देश्य प्रशान्त परमेश्वर ॥४६॥

निष्कम्प निर्विकल्पे कं महाधर्म [5]महामतम् ।
इति ब्रह्मपदानां च लक्षणं संप्रकाशितम् ॥४७॥

यैस्स्मृतैः पूजितैर्वा तैर्ब्रह्म संपद्यते पुमान् ॥

पौष्कर उवाच—

नष्टासिद्धिप्रदाः पूर्वं कथिता मूर्तयस्तथा ।
मन्त्रासिद्धयस्याश्य किमत्रार्थप्रयोजनम् ॥४८॥

---

1. ग–ख–अग्राह्यानन्त
2. अतर्क्य इति साधु
3. क–ख–ज्ञेयापरिमिति
4. –ग–घ–पतिहिनि
5. ग–घ–महात्मन्

श्री भगवानुवाच —

कर्षणादिप्रकृष्टस्य [1]विज्ञानेनान्वितस्य च।
केवलाब्जाब्जसंभूतं तथा रूपफलात्मह ।।४९।।

[2]तत्वैर्ज्ञानानुसिद्धिश्च फलभावनया विना।
ऊर्ध्वतो देहविन्यासो विदधादच्युतं पदम् ।।५०।।

प्रवृत्तिश्च निवृत्तिश्च कर्मचैतद् द्विधाऽब्जज।
जयन्ति भोगैकरताः प्रवृत्तेन तु कर्मणा ।।५१।।

परितृप्तास्तुसम्भोगैः [3]निवृत्तेनाचरन्ति च।
सर्वदा षड्गुणैश्वर्य फलेन हि स सिध्यति ।।५२।।

तानि संशुध्द्भावानां भावसंसिध्दभाविनाम्।
विद्याब्रह्ममयाद्यैस्तु नित्यमेव तथाऽब्जज ।।५३।।

प्रवृत्तिफलदा मन्त्रा यैर्विद्या[4] तपचर्यते।
कर्मणा केवलेनैव फलमिच्छति योऽचिरात् ।।५४।।

शृणु तेन यथा कुर्यात् त्वाधाराधेयकल्पने।
सर्वकामप्रदाद्यैस्तु पादैः कल्प्य कजावलीम् ।।५५।।

कर्णिकादौ यथासिद्धिं [5]प्रवृत्तिदशगोचर।
पादानां नवकेनैव [6]मधिष्ठायां तु मध्यमम् ।।५६।।

---

1. क–ख–विज्ञानेनोज्झितस्य
2. क–ख-तत्त्वज्ञानानुसिद्धिश्च
3. क–ख–निवृत्तो नाशयन्ति
4. ग-घ–विद्या तव चर्यते
5. क–ख–प्रावर्प्रन्त्रिवशगोचरा
6. क-ख–मनिष्यायां तु

[1]तातास्त्विन्द्रपदं स्या ([?]पदस्थाच्च) च्च पद्मादीशपदावधि ।
मध्यपद्मक्रमेणैव नवकं नवकं न्यसेत् ॥५७॥

पादानां कर्णिकादौ तु ह्यधिष्ठातृव्यपेक्षया ।
एवं विद्यामयं पद्मं व्यूहं निष्पाद्य सर्वदा ॥५८॥

अराधनार्थं मूर्तीनां भोगमोक्षफलाप्तये ।
सांप्रतं [2]भोगयागार्थं पादपूजाक्रमेण तु ॥५९॥

[3]सकृद्विभागपूर्वैस्तु पदैः सद्ब्रह्मवाचकैः
प्रणवादिनमोन्तैस्तु अर्घ्यपुष्पादिनाऽर्च्यते ॥६०॥

क्रमेण प्रभवेनैव तल्लक्षणमथोच्यते ।
मध्ये [4]मध्यगते पद्मे [5]प्रापदं ([?]प्राक्पदं) विनिवेश्य च ॥६१॥

प्रभातयष्ट्यान्याद्या पादादाग्नेयदिग्दलम् ।
यद्भ्रमं विधिना येन प्रागुक्तं [6]न तु तादृशम् ॥६२॥

अत्रापि नित्यसंसिद्धं प्राग्भागं च समाश्रयेत् ।
पद्मानां पद्मपत्राणां पादपूजाविधौ सदा ॥६३॥

---

1. क-ख—ततस्त्वीन्द्रपदम् ।
2. ग-घ—भोगयोगार्थम्
3. ग—घ—संकृद्विभात
4. क—ख—मध्ये मध्ये गते
5. क—ख प्राचदम्
6. —ग—घ—न तु तामृतम्

ततोऽवतार्य संपूज्य स्वेच्छया तत्र मूर्तया (?यः)।
[1]एकमूर्तिर्द्विमूर्तिश्च त्रिमूर्तेर्न्तमयावति ॥६४॥

मध्ये पद्मो (?द्मात्) समारभ्य यावदीशानपङ्कजम्।
विद्यातत्त्वप्रदानं तु पूजनं प्राहरेत् ततः ॥६५॥

स्वाहान्तं प्रणवाद्यानां मध्यपद्मादितः क्रमात्।
कर्णिकादौ समारभ्य पू (?म्) र्तैरग्रच्छदात्तु वै ॥६६॥

तत्प्रागपेक्षया यावत् प्रादक्षिण्येन मध्यगम्।
अनेनैवाब्जसंभूत न्यायेन कमलाष्टकम् ॥६७॥

मध्यपद्मस्य यागाभ्यां बाह्यस्थ पूरणीय च।
सर्वगा मध्यमा मूर्तिस्सर्वतोऽक्षिशिरोमुखम् ॥६८॥

भावयित्वाऽथ विन्यस्य यावता यत्र कुत्रचित्।
आवाह्यान्यत्र विन्यस्य मूर्तयस्तस्य संमुखाः ॥६९॥

अथार्चावसरे प्राप्ते मूर्तेर्मूर्तेः क्रमेण तु।
संमुखीकरणं कुर्यादात्मना सह पौष्कर ॥७०॥

एवमुक्तं [3]सकामानां वेदन्यासं तु चार्चनम्।
[4]कैवल्यं यः क्रियात् पूर्वमभ्यर्थयति साधकः ॥७१॥

---

1. -ग-घ-एवं मूर्तिद्विमूर्तोश्च त्रिमूर्तेन्तवद्मापति
2. -क-एवमुक्तं समानानाम्
3. -क-ख-एवमुक्तं समानानाम्
4. ग-घ-वैकल्यम्

[1]पदमन्त्रैस्तु विद्यारव्यैः प्राग्वत्पद्मजकल्पना ।
निष्पाद्याप्ययुक्ता वै ततो मोक्षापि ततैः ॥७२॥

क्रमेण पूजनं कुर्याद्यजेन्मूर्तिगणं ततः ।
भूयो मध्यस्थपद्माच्च कुर्याद्ब्रह्मवदर्चनम् ॥७३॥

भ्रमणेनाभ्यचाल्येन तस्यापि शृणु लक्षणम् ।
अविद्याव्ययन[2]दाद्यात् प्रागुक्तमखिलं च यत् ॥७४॥

व्यत्ययं विद्धि तत्सर्वं सविधानं तु ।

पौष्कर उवाच—

वासुदेवादिमूर्तीनां नवानां कथितं पुरा ।
पूजार्थं नवपद्मं तु सबिम्बं मण्डलोत्तमम् ॥७५॥

इदानीं नयतस्तस्मान्मध्ये चाग्निं यथास्थितम् ।
एकद्वित्रिचतुष्पञ्चमूर्तयस्तु [3]तथेच्छया ॥७६॥

कथ (?थं) नवानामब्जानां पूजनीयं ममादिश ।

श्रीभगवानुवाच—

बिम्बपीठादिसंयुक्तं नवाब्जमण्डलं हि यत् ।
पुरा प्रोक्तं तु वै तस्मिन् स्थास्याथ नवमूर्तयः ॥७७॥

---

1. क-घ-पदमध्यैः
2. अविद्याख्यपवादाद्यात् इति स्यात्
3. ग-घ-यथेच्छया

साङ्गास्सपरिवाराश्च न्यस्तव्याश्च सकृत् सकृत्।
बिम्बं विधानपीठादि द्वाराद्यै र्नवभिर्युतम् ॥७८॥

वृत्तं रेखागणेनाथ सर्वैस्तैरुज्झितं तु वा।
[1]नवाब्जं मण्डलं कृत्वा यथासंपत्तिविस्तृतम् ॥७९॥

विद्याब्रह्ममयैर्मन्त्रैर्निमित्तं पूजितं तथा।
साधारमेकमूर्त्यादौ मूर्तीनां विध्दि तद्द्विज ॥८०॥

स व्याप्तौ सन्निधानं च नवमूर्तेर्विशेषतः।

पौष्कर उवाच—

नवमूर्तेर्मया ज्ञातं पुरा चात्र निरोधनम्।
एकमूर्तेस्समारभ्य अष्टमूर्त्यवसानकम् ॥८१॥

अथ मन्त्रं जगन्नाथ विन्यासं तु विधीयते।

श्रीभगवानुवाच—

षडङ्गमेकमूर्तिं च ह्येकैकं नवकं न्यसेत्।
नवानां कर्णिकानां तु तदङ्गानि दलेषु च ॥८२॥

द्विमूर्तेः प्रथमा मध्ये द्वितीयाष्टासु वै क्रमात्।
[2]त्रिमूर्तेर्दिक्चतुष्केऽथ[3] द्वितीयां विनिवेश्य च ॥८३॥

---

1. ग-घ-नवाब्जमण्डलम्
2. क-ख-दिक्चतुर्थात्प्राक्
3. अत्र क-ख-कोशयोर्ग्रन्थो गलितः अर्धचतुष्टयात्मकः प्रत्युत गलितस्य तुरीयार्धस्य द्वितीयः पादः प्रमादादत्र संयोजितः यथा त्रिमूर्तेर्दिक् चतुर्थात् प्राक् आग्नेयमम्बुजद्वयं इति।

विदिक्ष्वष्टचतुष्केषु तृतीयायां समन्वितः।
प्राक्प्रत्यगाभ्यां पद्माभ्यां चतुर्मूर्तेर्वरं न्यसेत् ॥८४॥

तृतीया याम्यसौम्याभ्यां चतुर्थी कोणकेषु च।
पञ्चमूर्तेर्द्वितीयाथ प्रागाग्नेयाम्बुजद्वये ॥८५॥

तृतीया याम्यया त्वब्जे चतुर्थी वरुणानिले।
उदगीशगताभ्यां तु पद्माभ्यां पञ्चवि (?वि) न्यसेत् ॥८६॥

षण्मूर्तेरीशदिक्पद्मे द्वितीयां विनिवेश्य च।
तृतीयां पूर्वसौम्याभ्यां वह्निवायुगतेषु च ॥८७॥

पञ्चमं पश्चिमे याम्ये षष्ठी निर्ऋतिनिर्गते।
ईशपूर्वस्थपद्मानां सप्तमूर्तेस्तु या परा ॥८८॥

तृतीयाग्निपदस्थे च चतुर्थी दक्षिणे कजे।
रक्षो वारुणपद्माभ्यां पञ्चमा कमलोद्भव ॥८९॥

वायव्येऽथ उदक्पद्मे शेषमूर्तीश्च विन्यसेत्।
ईशप्रागग्निपद्मेषु यात्वाप्यानिलकेषु च। ॥९०॥

द्वयेऽनिले सौम्ययाम्ये अष्टमूर्तेस्सदाब्जज।
अङ्गीकृत्य पदन्यासमिहोक्तं द्विविधं तु वै ॥९१॥

संकल्पविहितं मन्त्रं सव्याप्तान्वया यजेत्।
शशि ब्रह्म समाप्नोति स्वादुष्टादमिरीप्सितम् ॥९२॥

इदमुक्तं समासेन सामान्यं मूर्तिपूजनम्।
वक्ष्ये विशेषविन्यासं नवात्वन्यत्र मण्डले ॥९३॥

स्थितसंचारभेदेन पुनः पुण्येन पद्मज।
विन्यस्य कोटरोर्ध्वे च आदिमूर्तिं च मध्यतः ॥९४॥

तदीयमथलाखीनं स्वस्थानेऽङ्गगणान्न्यसेत्।
ततः पत्राष्टके पूज्यं क्रमात् संकर्षणादिकम् ॥९५॥

अथ प्राक्पङ्कजे स्वोर्ध्वे यजेत् संकर्षणं द्विज।
वासुदेवादिकं कृत्वा तच्छेषं मूर्तिसप्तकम् ॥९६॥

तथैवावरणत्वेन यजेत् पत्राष्टकं क्रमात्।
एवमेव वराहान्तं क्रमान्मूर्तिगणं यजेत् ॥९७॥

किन्तु कोटरय तस्य मन्त्रमूर्तेर्महात्मनः।
विनिवेश्यादिमूर्तिं च समासात् तालकेतुवत् ॥९८॥

एवं हि मूर्तिनवकमब्ज···च्छे न वश न्यसेत्।
संसारभयभीतं तु सर्वकामफलाप्तये ॥९९॥

पादानां च विलोमेन यथोद्दिष्टं पुरार्चनम्।
वाराहात् वासुदेवाधि नाथ फलवशाद्भवेत् ॥१००॥

मूलमन्त्रस्य मूर्तीनां सामान्ये गगने सति।
मूर्तीनां तु तनुन्यासं प्राप्तादङ्गगणात्तु वै ॥१०१॥

---

1. क—ख—मम नवत्वन्यत्र

अप्रामान्येषु वेतेषु मालानां प्राङ्निवेशनम् ।
[1]कृत्वाऽथ पञ्च सप्त च (?त्वैव)तृतीये विनिवेश्य च ॥१०२॥

[2]द्वाविंश पञ्चसप्तस्तु तत्राद्यं च प्रभात्मकम् ।
[3]साकारं परमं चैव नामध्यानोपलक्षितम् ॥१०३॥

अपरं कमले स्वे स्वे एकपद्मेऽथ पौष्कर ।
पद्मन्यासप्रयोगेण दलमलक्षितौ तु वा ॥१०४॥

न्यस्तव्यमर्चनीयं च नानाध्यानोपलक्षितम् ।
प्रभवस्थितिसंहारन्यासमूर्तियुतस्य च ॥१०५॥

साङ्गस्य मन्त्रनाथस्य न्यासमापेक्षितं द्विधा ।
सिध्दयेऽर्चनपूर्वाणां कर्मणां नित्यमेव हि ॥१०६॥

मूर्तिन्यासस्तु विहितः [4]प्राङ्मूलाङ्गगणात्तु वै ।
यस्माद्वै मन्त्रवेन्द्राणां षाड्गुण्यफलदास्तदा ॥१०७॥

अणिमाद्यां प्रयच्छन्ति तदाङ्गानि महात्मनाम् ।
मूर्तिभ्यस्त्वविविक्त यन्मन्त्रेशगुणजं फलम् ॥१०८॥

तदङ्गानि प्रयच्छन्ति [5]मदमस्फुटमञ्जजः ।
स्थित्यर्थं बहिरङ्गत्वं क्वचिन्मूर्तिभिराश्रितम् ॥१०९॥

---

1. ग–घ–कृत्वाथ सप्त पञ्चभ्च मूर्तयो विनिवेश्य च
2. ग–घ–द्विविंशसप्तपञ्चस्तु तत्राद्यम्
3. क–ख–ककारच···वनाम
4. घ–प्राङ्मूला गगनात्तु
5. क–ख–मन्त···स्फुट मन्त्रमस्फुटमिति स्यात्

अनुग्रहार्थं भक्तानां भोगमोक्षाभिलाषिणाम् ।
भक्तानां [1]भविनां नाथ ह्यन्तरङ्गत्व (स्त्व) मेव हि ॥११०॥

स्वयमङ्गीकृतं विप्र तेषां संसारशान्तये ।
एवं न्यस्यार्चयित्वा तु कुर्याद्भक्तिपुरस्सरम् ॥१११॥

विशेषपूजनं तन्मे गदतश्चावधारय ।
हिरण्यमानं रजतैस्सौवर्णैः कमलोत्तमैः ॥११२॥

पद्मरागमहानीलवज्रैर्वैडूर्यभूषितैः ।
सप्रवाल[2]महामुक्ताफलसन्तिच्छपूजितैः ॥११३॥

ततोऽन्यैस्सुशुभैः पुष्पैर्यथाकालोद्भवैर्यजेत् ।
तुषार[3]क्षारवल्मीकमलयारुणवासितैः ॥११४॥

सुगन्धैर्मधुरैर्धूपैः [4]पट्टवस्त्रानुलेपनैः ।
केयूरकटकैश्चित्रै[5]र्मुकुटैः कङ्कणैस्तथा ॥११५॥

महार्हैस्सुशुभैर्हारैरङ्गुलीयकनूपुरैः ।
संपूज्य परया भक्त्या नवाब्जोदरगं विभुम् ॥११६॥

---

1. भक्तानां भविमानार्थम्
2. घ–महानील···फलसंतिच्च
3. ग–घ–क्षोरवल्लीक
4. ग–घ–पट्टवस्त्रं तु
5. क–ख–मंकुलोकङ्कणैः

व्यञ्जनैश्चामरैश्छत्रैर्दर्पणैश्शयनैर्ध्वजैः ।
घण्टाभिः किङ्किणीयुक्तैः स्थि (?सि) तैश्छत्रैर्वितानकैः ॥११७॥

नानावर्णपताकाभिरर्धचन्द्रैस्सुबुद्बुदैः ।
गोभिरश्वैर्गजैर्यानैर्बहुभिर्बहुभूषणैः ॥११८॥

[1]प्रतिग्रहैः पादपीठैः पादुकाभिरुपानहैः ।
घृतादिकैर्महादीपैरच्छिन्नैरर्चयेध्दरिम् । ॥११९॥

कुसुमप्रग्रहैश्शुभ्रैर्मधुपर्केण वै ततः ।
[2]षड्ऋतुप्रभवैर्दिव्यैर्नैवेद्यैः पावनैः फलैः ॥१२०॥

पवित्रैश्शीतलैस्स्वादुयुग्मगन्धैश्च [3]पानकैः ।
गुळखण्डाचितैर्भक्ष्यैर्बहुभिर्घृतपायसैः ॥१२१॥

सरसाभीरसालाभिः पयसा सुशृतेन च ।
श्रध्दापूतेन मनसा [4]यष्टव्यमजमव्ययम् ॥१२२॥

हेमराजतताम्रोत्थपात्राणि विततानि च ।
हिरण्यतिलसच्छालिरसा बीजान्वितानि च ॥१२३॥

सफलानि सुपूर्णानि मन्त्रार्थं विनिवेश्य च ।
लवङ्गतक्कोलैलात्वक्कर्पूरपरिभावितम् ॥१२४॥

---

1. पतद्ग्रहैः इति स्यात् ।
2. ग-घ-सर्वसाप्रभवैः ।
3. क-ख-ग-वानगैः घ-पानहैः
4. ग-घ-यष्टव्यजय

जातिपूगफलोपेतं [1]सुसुगन्धान्वितं बहु ।
प्रद्यात्प्रणतश्चान्ते [2]ताम्बूलं जगतः पतेः ॥१२५॥

नानावाद्यविशेषैश्च नृत्तगीतस्तवादिकैः ।
परितोषं नयेत् सम्यक् पुण्डरीकाक्षमव्ययम् ॥१२६॥

यद्यदिष्टतमं किञ्चिन्मनसः प्रीतिदं महत् ।
[3]वाप्य? मविरुध्दतत्तत्व सर्वं प्रकल्पयेत् ॥१२७॥

कुम्भमण्डलमध्यस्थमन्त्रमूर्ते जनार्दन ।
अथ त्वत्प्रीतये दानैः [4]हेमानाननगरा (?मरला) दिकैः ॥१२८॥

तन्मयानर्चयेत् तद्द्विशुद्धेनान्तरात्मना ।
नवाब्जे मण्डले ह्यस्मिन्नाब्रह्म [5]भुवनादिकम् ॥१२९॥

पिबतिष्ठत्यनाहूतं मन्त्राख्यावरणाद्बहिः ।
मन्त्राभिमन्त्रितवलैस्सा? दक्षाक्षय··· ॥१३०॥

आत्मनोश्चोपराधाय? या यज्ञानां? तु सिध्दये ।
अस्यादूरतरे यावद्भूलयो मन्त्रसंस्कृताः ॥१३१॥

कीर्तिनाथस्य यागस्य [6]वरदोपरि तद्द्विज ।
यान्ति सिध्दास्तथा मन्त्रे मन्त्रेशैरखिलैर्युताः ॥१३२॥

---

1. ग–घ–सुसुगन्धच्छदम्
2. ग–घ–तांबूलीम्
3. ग–घ–वापिमपिविरुद्धतं च, ख–वाप्यमविरुध्द
4. ग–घ-हेमकानगरा
5. ग-घ-भुवनान्तिकम्
6. ग–घ–परवोधपरिद्विज

भुवना भुवनेशाश्च नत्वा स्तुत्वेश्वरैस्सह ।
देवता वसवस्साध्या अग्नयो वायवस्तथा ॥१३३॥

[1]कुट्याद्याद्यादयः कालो भूतभव्यभवात्मकः ।
[2]नक्षत्राश्चाखिलास्तारा राशयश्चाखिलग्रहाः ॥१३४॥

आदित्या मारुता रुद्रा [3]मर्त्यास्तु च तथाश्विनौ ।
विश्वे देवास्सप्तर्षयः पितरो मुनयस्तथा ॥१३५॥

गन्धर्वाप्सरसाङ्घस्थाः किन्नराश्चारणोरगाः ।
देवा विद्याश्च मनवः [4]स्वाहा सिध्दा स्वधा ध्रुवा ॥१३६॥

धर्मस्सरस्वती सोमः स्वः प्रजापतयो युगाः ।
[5]ऋक्सामसूक्ताश्छंदांसि लोकाश्चैव दिशो दश ॥१३७॥

[6]द्वीपा नद्यः तदस्थित्वा ससमुद्रा च मेदिनी ।
पर्वतास्तरवो वल्यो रसाश्चौषधयोऽखिलाः ॥१३८॥

---

1. ग-घ-तुग्धाद्यङ्गातयः
2. ग-घ-नक्षात्राद्यानवस्तारा
3. ग-घ-मात्यास्तु···तया
4. क-ख-सा···सिध्वस्वयध्रुवा
   ग-घ-स्वाहा सिद्वस्वयध्रुवा।
5. ग-घ-मत्साम
6. क-ख-ग-घ-द्युपनस्थोद्यातदस्थित्वा सद्यमुद्राच

क्षेत्राभ्यायतनास्सर्वे योगपीठस्थनेकशः।
गावश्चामृतदोह्यास्तु जङ्गमाजङ्गमं च यत् ॥१३९॥

क्रमेण तस्मादेकैकं स्वनाम्ना तर्पयेद्गणम्।
नतिप्रणवगर्भेण भोगकैवल्यमाप्तये ॥१४०॥

*

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
नवनामार्चनो नाम
एकोनविंशोऽध्यायः

अथ विंशोऽध्यायः

श्रीभगवानुवाच—

पूजितेषु च मन्त्रेषु तर्पितेषु विशेषतः।
[1]विधाग्नि विनियुक्तेषु गणनाथं द्विजोत्तम ॥१॥

विष्वक्सेनाभिधानं यद्विधिदृष्टेन कर्मणा।
तदर्चने च संपन्ने तर्पणे सविसर्जने ॥२॥

प्राक्सेवनं तदा कुर्यात् तेषां वृत्तसमन्वितम्।
तथाभिमतसिद्ध्यर्थमर्घ्यपात्रं तु पौष्कर ॥३॥

पौष्कर उवाच—

किमर्थमाह भगवन् विघ्नच्छेदकरं प्रभुम्।
समस्तविघ्ननाशानां परमं कारणं च यत् ॥४॥

विष्वक्सेनस्तु यष्टव्यो भोगभूमौ[2] गतेऽच्युते।
कैर्द्रव्यैर्विधिना केन किं करोत्यभिपूजितः ॥५॥

श्रीभगवानुवाच—

भविनां बहवो विघ्नास्सद्धर्मविनिवारकाः।
न यागयज्ञापमार्गैर्मन्ये संसारिणाः शुभम् ॥६॥

---

1. ग-घ स्वधाग्नि
2. ग–घ–भोगभूमिगते

तत्प्रवृत्तौ तु ये विघ्नाः प्रोत्साहविनिवारकाः।
व्यपयान्ति च ते सर्वे चक्रज्वालाभयार्दिताः ॥७॥

मध्ये [1]नावसरे तेषां भूते बाल्यचये सति।
[2]तत्सन्निपानसामर्थ्यात् क्व दोषः क्व विनायकः ॥८॥

क्षुद्राश्छिद्रपरा विघ्नास्तुकर्मनियमे स्थिताः।
याजिनां फलकालं च प्रवीक्षन्ते बहिर्जिताः ॥९॥

प्रागार्जितेन केनापि कर्मणा द्विज सांप्रतम्।
[3]अनुभुङ्क्ते फलं यागाद्विविधं [4]चाप्रतस्स्वकम् ॥१०॥

तस्य संरक्षणार्थं तु विष्वक्सेनं तदैव हि।
काले यागवसानाख्ये द्वितीये वासरेऽथवा ॥११॥

कृत्वा निर्व्याकुलं चित्तं यष्टव्यं फलसिद्धये।
याग [5]निर्वर्तनाच्छेषै रासनैरर्घ्यपूर्वकैः ॥१२॥

उपचारमयैर्भोगैस्सर्वै राभरणादिकैः।
नैवेद्यैर्मधुपर्काद्यैर्मुख्यमूर्ते निवेदितैः ॥१३॥

द्विजप्रदानशिष्टैस्तु स्वयं प्रागनवर्जितैः।
तथा चर्वन्तरस्थैश्च ह्यपरेद्युर्निवेदितैः ॥१४॥

---

1. ग–घ–मध्ये नावसरेस्तेषां
2. क–ख–ग–घ–सत्सन्निधान
3. तद्भुङ्क्ते न फलम्
4. ग–घ–स्वाग्रनास्म
5. क–ख–निर्वर्तनोच्छोषैरम्लानैः

संस्कृतैरूष्मणोपेतैर्मधुराज्यपरिप्लुतैः।
तस्मान्मण्डलमध्ये तु प्रागदत्वा कमलासन ॥१५॥

धर्माद्यमनन्तपर्यन्तं पञ्चकं नवकं तु वा।
सत्त्वेनाच्छादितं पश्चात् केवलानम्बुजं स्मरेत् ॥१६॥

ऐशानसोमदिङ्मध्ये चतुरश्रपुरेऽथवा।
[1]द्वारशोभाप्रविमुक्ते रेखात्रितयभूषिते ॥१७॥

तदन्तरेऽर्धचन्द्रस्थे कमलेऽष्टदलान्विते।
साम्राज्ये विनियुक्तं यद्विघ्नाना [2]मच्युतेन तत् ॥१८॥

पूजयेद्विधिना शश्वदभीष्टं साधकोऽश्नुते।
तस्मान्मन्त्रैस्तदीयैस्तु स्नात्वा पूर्वविधानतः ॥१९॥

प्रक्षाल्य पाणिपादौ वा त्वाचम्य न्यासमाचरेत्।
तदधिष्ठातृकत्वेन धारणाभिस्स्वविग्रहम्। ॥२०॥

शोधयित्वा पुनर्न्यस्य षडङ्गाद्यङ्कुरादितः।
प्राग्वदानंदधामा च ह्यवतार्य तथा प्रभुम् ॥२१॥

इष्ट्वा हृत्पुण्डरीके तु स्वापेक्षानिष्कलात्मकम्।
[3]तमेव सकलत्वेन यातं ध्यात्वा यजेद्बहिः ॥२२॥

---

1. ग–घ-द्वारशोभाश्च
2. –मच्युतेन तु
3. ग–घ–तेनैव

नवदूर्वाङ्कुराभं च [1]त्वीषत्पीतलकान्तिधृत् ।
चतुर्दंष्ट्रं चतुर्बाहुं चतुर्मुष्कं चतुर्गतिम् ॥२३॥

पूर्णाङ्गं केसरिस्कन्धं पृथूलस्थलराजितम् ।
दक्षिणावर्तनिम्नेन नाभिरन्ध्रेण [2]शोभितम् ॥२४॥

आजानुबाहुं श्रीमन्तं [3]पीङ्गलार्चिर्जटाधरम् ।
द्रवत्कनकपिङ्गाक्षचुबुकं पृथुनासिकम् ॥२५॥

सितदीर्घनखश्रेणिशोभितं कुटिलभ्रुवम् ।
मुक्ताविभूषितं मध्ये[4] महारत्नोपसंस्कृतम् ॥२६॥

कुर्याच्च दक्षिणे [5]पक्षे कृतश्रीवत्समङ्गलम् ।
[6]अमासि···तन्मध्ये [7]कमलालयम् ॥२७॥

द्विगुणं ब्रह्मसूत्रं स्यान्नाभेश्चाभिप्रदक्षिणम् ।
विस्तीर्णगण्डवदनं बालेन्दुकुटिलोपमैः ॥२८॥

नवार्क (?वर्कि) शुकारुणाभैर्लोमैस्संपूर्णविग्रहम् ।
शोभनेन प्रलम्बेन पृथुना प्रोन्नतेन च ॥२९॥

---

1. क–ख–त्विषट्पतल
2. क–ख–पूजितम्
3. –क–प···जटा ख–अपिश्मश्रु जटा
4. क-ख–रत्नोपसंस्थितम्
5. –ग–दक्षिणे वष तत्श्रीवत्स
6. ख-आमासिकोणि···तन्मध्ये ग-घ–अमासितवयोमणि–वितन्मध्ये
7. घ–कमलातहाम्

माणिक्यकुण्डलाद्वयेन युक्तं श्रोत्रद्वयेन तु ।
मकुटेनोन्नतेनैव हाराद्यैरुपशोभितम् ॥३०॥

चित्रकौशेयवसनं विचित्रस्रग्विमण्डनम् ।
प्रलयद्वादशादित्यसहस्रगुणदीप्तिम ॥३१॥

ईषदूर्ध्वे तथा तिर्यग्विनिपातितलोचनम् ।
कुन्देन्दुकान्तिदशनं किञ्चिद्विहसिताननम् ॥३२॥

स्वभावसौ[1]म्यममलं मायाक्रोधोपरञ्जितम् ।
सविलासलसत्पादन्यासस्थानकसंस्थितम् ॥३३॥

स्वेनान्तः[2] करणेनैव भावयन्तः परं पदम् ।
अङ्गुष्ठेन कनिष्ठान्त[3]मङ्गुलैस्तु लतात्रयम् ॥३४॥

[4]नामयित्वोन्नता चैका घ्राणेन विनियोजिता ।
सद्विघ्नभीतिप्रदया त्वनया मुद्रयान्वितम ॥३५॥

रथाङ्गशङ्खहस्तं च लम्बमानगदाधरम् ।
श्रोणीतटनिविष्टेन सावहेलेन पाणिना ॥३६॥

इत्थं रूपधरं देवमनेकाद्भुतविक्रमम ।
कर्णिकामध्यगं तस्य हृदाद्यामुख्यमन्त्रवत् ॥३७॥

---

1. क–ख–मुन्मोन्नम्
2. ग–घ–करणैरेव
3. ग–घ-त वामपाणौ लता
4. ग–घ–नमयित्वा

पद्मच्छदान्तरस्थां च तदाकारद्युतिं विना ।
किन्त्वङ्गानां च सर्वत्र ध्यानमुक्तं सितादिकम् ॥३८॥

गजाननो जयत्सेनो हरिवक्त्रो महाबलः ।
कालप्रकृतिसंज्ञश्च [1]चतुर्थः कमलोद्भव ॥३९॥

गणराजेश्वरा ह्येते चत्वारश्चण्डविग्रहाः ।
आज्ञाप्रतीक्षकाश्चास्य सुश्वेतचमरोद्यताः ॥४०॥

विनायकादयश्चैव विघ्नेशप्रवरास्तु ये ।
अमीषां गणनाथानां नित्यमाज्ञानुपालिनाम् ॥४१॥

ईशानादिषु कोणेषु पद्मबाह्यस्थितान्न्यसेत् ।
वीक्ष्यमाणा विभोर्वक्त्रं [2]तत्तुल्यस्थानकास्स्थिताः ॥४२॥

तद्वत्कराङ्किताः सर्वे किन्तु मुद्राविवर्जिताः ।
ध्यानमेषां पृथग्भूतं शरीरमवधारय ॥४३॥

भीमं द्विपेन्द्रवदनं चतुर्दंष्ट्रं त्रिलोचनम् ।
कम्बुग्रीवं चतुर्बाहुं पूर्णचन्द्रायुतद्युतिम् ॥४४॥

हारनूपुरकेयूरमेखलादाममण्डितम् ।
नानास्रग्गन्धवस्त्राद्यमनौपम्यपराक्रमम् ॥४५॥

---

1. क-ख-चत्वारः
2. क-ख-तत्तुल्यस्थानके
3. -क-ख-मिषत्कुण्डलिनम्

ध्यायेद्गजाननमतो जयत्सेनं च संस्मरेत् ।
महत्तुरङ्गवदनं पद्मरागाचलप्रभम् ॥४६॥

द्रवच्चामीकराक्षं च अनेकाद्भुतविक्रमम् ।
हरिवक्त्रमतो ध्यायेत् सटाच्छुरितमस्तकम् ॥४७॥

निष्टप्तकनकप्रख्यं घोरघर्घरनिस्वनम् ।
मृगराड्वदनं विप्र कल्पान्तानिलवेगिनम् ॥४८॥

कालप्रकृतिनामानं भावयेदञ्जनाद्रिवत् ।
दंष्ट्राकरालवदनं पिङ्गलश्मश्रुलोचनम् ॥४९॥

[1]झषकुण्डलिनं रौद्रं मीनवन्निम्ननासिकम् ।
गणराजेश्वरा ह्येते महापुरुषलक्षणैः ॥५०॥

संयुक्ताश्चाखिलैर्विप्र त्वापादात्कन्धरादिव ।
यत्किञ्चिन्मण्डनं वस्तु तदाद्योक्तं स्मरेत् त्रिषु ॥५१॥

एतेषामर्चनं कुर्यात् स्वनाम्ना प्रणवादिना ।
नमोन्तेनाब्जसंभूते नानासिद्धिफलाप्तये ॥५२॥

पौष्कर उवाच—

क एषोऽतुलवीर्यो हि यस्य दूरात् द्रवन्ति च ।
विघ्ना निमेषमात्रेण त्रैलोक्योन्मूलनक्षमाः ॥५३॥

---

1. –क–ख–मिषत्कुण्डलिनम्

श्रीभगवानुवाच—

कालवैश्वानराख्या या मूर्तिस्तुर्यात्मनो विभोः
स एष द्विज देवः स्याद्विष्वक्सेनः प्रकीर्तितः ॥५४॥

स्थित आहवनीयादिभेदेन मखयाजिनाम्।
[1]पतित (?ऋक्पूतं) हुतमादाय तर्पयत्यखिले जगत् ॥५५॥

एवं मन्त्रमयाद्यागात् [2]सात्त्विकात् ब्रह्मभावितात्।
संप्राप्य [3]गुरुमूर्तेर्वै प्रापणं [4]मन्त्रसत्कृतम् ॥५६॥

अनाहूतामराणां च सर्वलोकनिवासिनाम्।
स्वयं संविभजत्याशु तदनुग्रहकाम्यया ॥५७॥

पौष्कर उवाच—

सर्वासां मन्त्रमूर्तीनां मध्ये मुख्यपरा त्वया।
मूर्तिरेका समुद्दिष्टा वासुदेवाख्यलक्षणा ॥५८॥

तदुक्तशिष्टैर्निर्दिष्टं विष्वक्सेनस्य चार्चनम्।
यथा [5]पृथक्पृथग्यागो मूर्तीनां साधकः प्रभो ॥५९॥

---

1. —ग—घ—ऋक्पूतं
2. क—ख—सात्त्विका ब्रह्मभाविनः
3. ग—घ—गुरुवृत्तेर्वै
4. ग—घ—संस्कृतम्
5. यागः साधकः इति साधु

कुर्याद्वा व्यूहभेदेन यन्त्रसंघस्य पूजनम् ।
अन्योन्याङ्गानि फालेन मुख्यतन्त्रत्रिकस्य च ॥६०॥

यदि येनार्चितं तस्य कुर्यात् पुष्पादिकेन वै ।

श्रीभगवानुवाच—

सर्वत्र सर्वदा विप्र केवलस्य (?त्व) प्रदा (?द) स्य च ।
आराध्य मन्त्रनाथस्य प्रागाभूतस्य मध्यतः ॥६१॥

बहिर्व्याहृतये तस्य [1]मुख्यत्वान्नापरस्य च ।
परत्वमेव सर्वत्र त्वाराधनवशात् स्थितम् ॥६२।

भावांशकवशाच्चैव नानाकर्मवशादपि ।
मन्त्राणां मन्त्रमूर्तीनां व्यूहानामब्जसंभव ॥६३॥

तथैवाखिलतत्त्वाना [2]मौपाधिकमुदाहृतम् ।
परत्वमब्जसंभूत न कश्चित्तत्त्वतः परम् ॥६४॥

मुक्तैकं वासुदेवाख्यमध्यक्षान्तं सदोदितम् ।
सद्विरूपं चतुर्व्यूहं प्रभवाप्ययलक्षणम् ॥६५॥

समत्वं सति भेदे वै चतुर्णां येऽत्र सर्वदा ।
यद्ब्रह्मण्याधिपत्येन [3]पिण्डीकृत्येथ पत्रवत् ॥६६॥

चित्ते ते पूर्णषाड्गुण्य [4]सलक्षण... ।
प्रवृत्तिकालादारभ्य त्वात्मकालावसानकम् ॥६७॥

---

1. क ख—मुख्यत्वेनापरस्य
2. क—ग—मेवादिक
3. क·ख—पिण्डीकृत्येत पत्रतः
4. -क—तक्षण ख—लक्षणम् ग—घ—लक्षणमनेश्वरम्

यत्रावकाशे विघ्नानां तद्विधा न कदाचन।
वैभवं देवताचक्रं दूरे तिष्ठति यत्र वै ॥६८॥

समाराधनकाले तु [1]तत्रेन्द्रादिषु का कथा।
[2]तत्र दायान्वयं सिद्धमनिच्छातोऽपवर्गदम् ॥६९॥

आमूलाद्ब्रह्मनिष्ठं च निर्मुक्तमखिलैः परैः।
अन्त एव हि तद्व्यूहे [3]नार्चना विहिता द्विज ॥७०॥

ईषद्रागा तु विद्यानां देवतानां कदाचन।
तथैव विष्वक्सेनस्य गणबृन्दावृतस्य च ॥७१॥

अस्मात् परतराद्व्यूहात् सुसूक्ष्माद्वा सविग्रहः।
गत्यै नित्योदिता···स्तु संयुक्तात् सर्वसिद्धिदा ॥७२॥

मोक्षाद्यभीष्टसिध्यर्थमेकैकं यदि पूज्यते।
द्वितयं त्रितयं वाऽपि भिन्नभावनया द्विज ॥७३॥

तत्र न्यासादिकैर्भोगैर्विघ्नारियजनान्तिकैः।
विना न सिद्धिं यद्यङ्गं जायते युगकोटिभिः ॥७४॥

पौष्कर उवाच—

अस्य व्यूहत्रयस्य स्यात् सकाशाच्च सनातनः।
भेदनित्योदिता (?तो) न्यायं (?यो) श्रोतुमिच्छामि सांप्रतम् ॥७५॥

---

1. –क–ख–तत्रेन्द्रादि तथा
2. ग–घ–तत्तदाद्यामयम्
3. –क–ख-नानाविहितता

श्रीभगवानुवाच—

यदिदं च समुद्दिष्टमनौपम्यमतीन्द्रियम् ।
संशान्तपरमानन्दं स्वरूपं च सदोदितम् ॥७६॥

सौदामिनीचयार्काग्निपूर्णचन्द्रायुतद्युति ।
सूक्ष्मसंज्ञं द्वितीयं [1]स्यात् तदुदेत्यस्तमेति च ॥७७॥

लाञ्छनाम्बरवर्णाद्यैर्यदत्योन्यैः पृथक् पृथक् ।
[2]कालेन [3]कृतकृत्यत्वं मुक्तो रोगादिकैर्मलैः ॥७८॥

[4]प्रभवेन समायुक्ता प्रत्यस्तमितसर्वदा ।
मुनिसङ्घे परे धाम्नि विकल्पगगना द्विज ॥७९॥

पौष्कर उवाच—

त्वया मण्डलयागेषु विष्वक्सेनार्चनादिकैः ।
[5]... ... ...

[6]... ... ...
नामनाशागणं सर्वं ध्वंसयन्ति सदैव हि ॥८०॥

तस्माद्ददाति योऽन्येषां स्वयमश्नाति वाऽधमः ।
मोहादुपेक्षते वाऽपि स याति नरकेऽ[7]धमः ॥८१॥

---

1. ग–घ–यत्तदुदेत्यस्तमेति च
2. क–ख–कुलेन
3. –ग–घ–कृतकृत्यर्थम्
4. विभवेन
5. अत्र–पौष्कर प्रश्नस्य शेषभागो लुप्तः
6. अत्र भगवदुत्तरस्य आदि भागः गलितः
7. क–ख–वाधमम्

आश्रयोर्थतनाकार्यः परिवारस्सदैव हि।
तस्या द्विदेवतेन्द्रस्य तद्देवस्य तथैव हि ॥८२॥

स्वयं सङ्कल्पितस्य प्राक् शासनेनापि तस्य वा।
कृतस्य श्रद्धयाऽऽनन्दनानारूपस्य पौष्कर ॥८३॥

[1]दधिभक्षफलाद्यस्य देवान्नस्य विशेषतः॥

पौष्कर उवाच—

देवद्रव्यं तु किं नाथ देवस्वं च किमुच्यते।
[2]गणान्नं च निषिद्धं च भक्तानां भक्तवत्सल ॥८४॥

श्रीभगवानुवाच—

यत् कोशे विधते किञ्चित् पत्रालङ्कारपूर्वकम्।
लग्नं च भवमूर्तौ तत् प्रसादेन ममान्तरे ॥८५॥

विपणे वा तदीये च देवद्रव्यं तु विद्धि तत्।
नगरग्रामपर्यन्तविषये गोगजादयः ॥८६॥

शालिसस्येक्षुपुष्पाद्या दासीदासाः कुटुम्बिनः।
सत्संबन्धं च [3]वाणिज्यं सुपुत्रपशुबान्धवम् ॥८७॥

देवस्वं च विरुद्धं यत् सिद्धानामपि पापकृत्।
स्वदत्तं परदत्तं वा यत्नात् तत् परिवर्जयेत् ॥८८॥

---

1. क–ख–पद्मपक्षः ग–घ–दधिपक्ष
2. क–ख–गणं च न निषिद्धं च
3. क–ख–तत्संबन्धं च व···पुत्र पशुबान्धवाः

[1]दोषदं चापि माद्यस्मा दक्षय्यनरकप्रदम् ।
प्राक् प्रवृत्तमतस्तस्मिन् निबन्धा देवतागृहे ॥८९॥

प्रयत्नात् पोषणीयं च योति नूनमथा [2]यथा ।
प्रवृत्तकार्याकरणाद्विष्णवायतनेषु च ॥९०॥

प्राप्नोति सुमहद्दोषं राजा राजपदेषु च ।
[3]यथा तद्विपुला कीर्तिस्तथा चेहाक्षयं [4]सुखम् ॥९१॥

देहान्ते शुभमाप्नोति प्राक्प्रवृत्तस्य पालनात् ॥

पौष्कर उवाच—

दानं संप्राशनं प्रोक्तं [5]देवान्नस्य पुरा त्वया ।
तस्याधुना जगन्नाथ निषेधः कथ्यते कथम् ॥९२॥

श्रीभगवानुवाच—

प्राक्साधितं च यागार्थं देवतानां प्रयत्नतः ।
तत्सन्तर्पणपर्यन्तं यावद्देवान्नमुच्यते ॥९३॥

अन्यथा भक्षणं तस्य यदि मोहात् कृतं द्विज ।
प्रायश्चित्तशतैश्चीर्णैश्शुद्धिर्भवति मानवः ॥९४॥

1. क–ख–दोषा···ञ्चापि···माद्यस्मात्
2. ग–घ-कामस्मात्
3. ग–घ–यत्नविपुला
4. शुभम्
5. ग–घ–देवतास्य

मन्त्रसन्तर्पणादन्ते याजिना यजतां वर।
गर्वबुद्धिविमुक्तानां भक्षणं सर्वशुद्धिकृत् ॥९५॥

पावनं शुद्धिदं पुण्यं [1]भूतिभृत्यभिवृद्धिदम्।
भक्षणं यद्यपि प्राप्तं नैवेद्यस्य च सर्वदा ॥९६॥

गुर्वादीनां तथाऽन्येषां भक्तानां तत्त्वतोऽब्जज।
तत्रापि साधकानां च निषिद्धं वन्दनं विना ॥९७॥

अथ वासादृतेऽन्यत्र नित्यनैमित्तिकार्चने ॥

पौष्कर उवाच—

हेतुना केन भगवन् निषिद्धं साधकस्य च।
मन्त्रपूतं तु नैवेद्यमत्र मे संशयो महान् ॥९८॥

श्रीभगवानुवाच—

नाप्रार्थितं गृहीतव्यं पुष्पमात्रं कदाचन।
स वै मन्त्रेण विभवादग्राह्यं केचिद्दिगाजिना ॥९९॥

नैवेद्याद्यखिलानां च भोगानां भावितात्मनाम्।
गुरुणा [3]प्रार्थना कार्या मन्त्रेशस्य पुनःपुनः ॥१००॥

---

1. ग–घ–भूमिभृत्यभि

2. ग–घ–विभवोदग्रात्

3. क–ख–प्रार्थनां कुर्यात्

स सर्वतस्स्वतन्त्रत्वात् तत्सिद्धत्वान्न दोषभाक्।
लब्धान्तरे यथा मन्त्री नृपेन्द्रात् सर्वे [1]मध्यगे ॥१०१॥

स न रूष्यति वै तस्य एवं मन्त्रेश्वरो गुरोः।
फलपर्यवसानं च सेवार्थं यस्समुद्यतः ॥१०२॥

न तेन प्रार्थना कार्या स्वल्पेऽप्यर्थे नृपस्य च।
संप्रयच्छेत् प्रसन्नश्चेत् स्वयं तुष्टमयो यदि ॥१०३॥

[2]प्रसादमिति वै ब्रूयात् शिरसा [3]चाभिनन्दयन्।
नाभिं कुर्याच्च मेधावी महार्थफललंपका ॥१०४॥

[4]एवं मन्त्रव्रतपरो यमाचरति साधकः।
अचिरात् सिद्धिमाप्नोति मन्त्रमूर्तेः प्रसादतः ॥१०५॥

पौष्कर उवाच—

आराध्यमूर्तेर्मन्त्रस्तु [5]नैवेद्यस्य जगत्पते।
विनियोगं [6]महाज्ञानमपि शिष्टस्य का गतिः ॥१०६॥

श्रीभगवानुवाच—

मण्डलावयवेशानां [7]बाह्याधारसशक्तिषु।
गुर्वादिकालनाथानां दत्तं यद्विभवे सति ॥१०७॥

1. ग–घ–मध्यते
2. क–ख–प्रस–वं ब्रूया···चाभि
3. –ग–घ–चाभिनन्द्य यत्
4. क–ख–एवं मन्त्रावृत
5. क–ख-नैवेद्यस्तु
6. –क–ख–महा···नमपि
7. -ग–घ–बाह्या···शशक्तिषु

[1]दद्यात् तद्ब्रह्मचारीणां भक्तानां भावितात्मनाम्।
हृदयादिदिगन्तानामङ्गानां यन्निवेदितम् ॥१०८॥

श्रियादि [2]मूर्तिकान्तानां तथा [3]व्यूहाख्यमूर्तिषु।
विहितं पुत्रकाणां तद्दानकर्मणि सर्वदा ॥१०९॥

चक्राद्यायुधजातस्य मन्त्रोपकरणस्य च।
भोगस्थानावतीर्णस्य यत्तत् [3]सामाधिना स्मृतम् ॥११०॥

गणचक्रदिगीशास्त्रद्वारस्थानां [4]क्षेत्रियस्य यत्।
दत्तं तत् क्षेत्रियादीनां वैष्णवानां विभज्य च ॥१११॥

एतद्विसर्जनात् पूर्वं विहितं कमलोद्भव।
प्रतिषिद्धं च सर्वेषां मन्त्र [5]चक्रे विसर्जिते ॥११२॥

यस्मादायान्ति भूतानि कोटिशस्समनन्तरम्।
विष्णुपार्षदपूर्वाणां तादर्थ्येनाब्जसंभव ॥११३॥

[6]पवित्रता न तद्वीर्या भ्रात्वा संभूषयन्ति च।
जलजानां परीवारसत्त्वानामनुकम्पया ॥११४॥

---

1. क–ख–विद्यात्
2. ग–मूर्तकान्तानाम्
3. ग–संमर्थिनां घ–विमूर्तिनाम्
4. क–ख–क्षेत्रियस्य–इत्याद्यर्धचतुष्टयं गलितम्
5. क–ख–क्षेत्रविसर्जने
6. ग–घ–पवित्रतान्त तद्वीर्या

दत्तशिष्टमतस्सर्वं दत्तं वाऽप्यन्ययाक्षयम् ।
समभृत्य च निष्पिष्य ह्यगाधेऽम्भसि यत्नतः ॥११५॥

[1]अर्चासंरुद्धमन्त्राणां दत्तस्य विहितं सदा ।
दानं तदाश्रितानां वै भूतानां पूर्वरूपिणाम् ॥११६॥

तत्सेवकानां च तथा नृत्तगेयरतात्मनाम् ।
प्रार्थयन्त्यपि भक्तानां विप्रग्रामनिवासिनाम् ॥११७॥

तस्मान्मन्त्रेश [3]दृक्पूतं नैवेद्यं पावनं परम् ।
कुरुते कायशुद्धिं च तच्छुध्या [4]काललाघवम् ॥११८॥

निर्मुक्तचित्तदोषाणामचिराद्भवते शुभम् ।
यद्प्येवं महत् तस्य तथाऽपि कमलोद्भव ॥११९॥

प्रदानाच्चोदनाच्चैव श्रेयांस्त्यागो हि पूर्ववत् ।
न येन लोभो लोकस्य दोषस्योपरि संभवेत् ॥१२०॥

भवेत् तल्लोभमुक्तानामतीव विमला मतिः ।
या[5] या वेत्ति पलप्राप्तिफलदं कर्म शाश्वतम् ॥१२१॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
विष्वक्सेनार्चनो नाम
विंशतितमोऽध्यायः

*

---

1. ग-घ-सं रुद्ध
2. क-ख-ग-प्रार्थयन्त्यपि
3. क-ख-विवपूतम्
4. कुलाघवम्
5. यथा वेत्ति फलप्राप्ति

अथ एकविंशोऽध्यायः

पौष्कर उवाच—

देव त्वया [1]शक्तिचयः पुरा तु समुदीरितः ।
तस्याहं श्रोतुमिच्छामि सविन्यासं च लक्षणम् ॥१॥

श्रीभगवानुवाच—

सर्वसंपत्प्रदा लक्ष्मीः पुष्टिः परमसिद्धिदा ।
कान्तिः [2]प्रभा मतिः शक्तिः क्रियेच्छा महिमोन्नतिः ॥२॥

स्वधा[3]विद्याणिमा माया मूर्तिर्ह्रीः [4]श्रीः कला द्युतिः ।
निष्ठा ऋज्वी रुचिः चेष्टा शोभा शुद्धिर्विभूत्यतः ॥३॥

वृत्तिर्व्याप्तिर्गतिः सुप्तिर्भोगा वागीश्वरी रतिः ।
[5]सिद्धिर्नतिः स्तुतिः क्रीडा संपत् कीर्तिः शिखा मतिः ॥४॥

गायत्री चापि मर्यादा [6]सृष्टिः चेत्यब्जसंभव ।
पूर्वमात्मगुणत्वेन मन्त्रदेहं [7]स्मरेद्धिया ॥५॥

---

1. क–ख–शक्ति तथा ग–शक्तितयो घ-शक्तितयोपरासक्तस
2. ग–घ–प्रभामितिश्शक्तिः
3. क–ख-विद्यारणीमया
4. क ख–मूर्तिह्रीः श्रीस्तुलाद्युतीः
5. क-ख–सिद्धि ... क्रीडा
6. ग–घ–सृष्टिश्चेत्यब्ज
7. क–ख–स्मरेच्छ्या

आभिरापूरितं कृत्स्नममूर्ताभिः सदैव हि ।
एतत् सामान्य [1]संयोगं शक्तिश्चक्रस्य (?चक्रं च) पौष्कर ॥६॥

सह मन्त्रगणेनैव विशेषमधुनोच्यते ।
आदि [2]मूर्तिन्न (?म) सन्तुष्टं (?ष्टौ) दक्षिणोत्तर (?रं) विन्यसेत् ॥७॥

लक्ष्मी [3]पुष्टिद्वयाख्यं [4]यद्यत्नेनावकराश्रयम् ।
अष्टादिक्ष्वष्टकं न्यस्येत् केसराग्रात् श्रुतक्रमात् ॥८॥

दलमध्ये हृदादीनां बहिर्वा सिध्यपेक्षया ।
आसां [5]मुख्यांशमध्ये तु [6](विन्यसेत्) परं पदम् ॥९॥

यथेष्टं लभते भोगमङ्गसङ्गाद्बहिः स्थितम् ।
शेषव्यो [7]मावृताद्दूर्ध्वे बद्धपद्मासनात्तु वै ॥१०॥

पर्येयाः परियोगेन वीक्षमाणाः परं प्रभुम् ।
पृथग्यागावतीर्णानां मन्त्राणामेवमेव हि ॥११॥

शक्त्यष्टकं च न्यस्तव्यं लक्ष्मीपुष्टिद्वयं विना ।
तच्छिष्टदेवता व्यूहं [8]प्राग्व (?क्प) दं परिवृत्तकम् ॥१२॥

---

1. क–ख–संयोगं…पौष्कर
2. ग-घ–मूर्तिन्नसंसष्ट
3. क–ख–दाच्छयाख्यम्
4. क–ख–यत्नेनावत्तरा घ–यत्नेनावत् कराश्रियम्
5. क-ख–आसां मुखयेंशमध्ये
6. ग–घ–विनासं स्यात
7. क–ख–व्योमाहृताद्दूर्ध्वे शुद्धपद्मा
8. ग–घ–व्यूहं प्राग्वदम्

अष्टपत्रं विनाऽन्यस्मिन् [1]पद्मे केसरसन्तते।
मूलदेशे यथा याति कर्णिकोपममष्टकम् ॥१३॥

एवं चाखिलयागानां न्यासः स्याद्देवतासु च।
मुक्त्वैकं मिश्रचक्रं तु शारदं कमलोद्भव ॥१४॥

तत्राष्टकं तु कह्लारे शेषा (षं) चक्रे बहिः स्ववत्।
ध्यानमन्त्रं क्रमाद्ब्रह्मन् कथयामि यथास्थितम् ॥१५॥

रक्तपङ्कजवर्णाभा लक्ष्मीर्नीलाम्बुजेक्षणा।
दुग्धौघधवला पुष्टिरानन्दकलितानना ॥१६॥

[2]कान्त्याद्युन्नतिपर्यन्त*मष्टकं स्फटिकामलम्।
**यचतुस्त्रिंशकं विप्र शक्तीनां शुभलक्षणम् ॥१७॥

अन्तरान्तरयोगेन ध्यायेत् कनकसन्निभम्।
[3]पद्मरागोद्धत किञ्चिदनोपम्यगुणान्वितम् ॥१८॥

प्रसन्ननयनाः सर्वाः प्रसन्नवदनाम्बुजाः।
रूपलावण्यसौभाग्यैरन्योन्येन समन्विताः ॥१९॥

[4]सर्वा माल्याम्बरधराः सर्वालङ्कारमण्डिताः।
चन्द्ररश्मिप्रतीकाशबालव्यजनचिह्निताः ॥२०॥

---

1. क–ख–पत्रे केसर
2. कान्ताद्युन्नोति
* कान्तिः प्रभा मतिः शक्ति क्रिया इच्छा महिमोन्नतिः
** स्वधादिसृष्टयत्त
3. ग–घ–पद्मरागैर्धतम्
4. ग–घ–सर्वमाल्या

[1]वामहस्तेन चान्येन ध्यायेदभिमतार्थदाः ।
[2]मन्त्र ?वत्क्रम (?प्र) चारिण्यस्तद्वत् सर्वफलप्रदाः ॥२१॥

समाराधनकाले तु भक्तानामनुकम्पया ।
वैश्वरूप्यं समाश्रित्य [3]दिक्षु दृक्पातयन्ति च ॥२२॥

एवं बहिर्व्यापृतयो सहमन्त्रार्चनाब्जज ।
विन्यासमर्चनं ध्यानं देवीसंसिद्धमन्त्रिणम् ॥२३॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
परिवारलक्षणो नाम
एकविंशोऽध्यायः

*

1. ग–घ–वामहस्ते च सर्वासां ध्यायेदभिमतान्वितम्
2. क–ख–मन्त्रवत्क्रम
3. क–ख–दिक्षु द्रवतयन्ति

अथ द्वाविंशोऽध्याय:

पौष्कर उवाच—

सम्यग्वेदितुमिच्छामि त्वत्तोऽहममरार्चित ।
हिताय साधकेन्द्राणां तदध्याराहिचासनम् ॥१॥

सरहस्यमसङ्कीर्णं [1]साधितैव ?यथास्थितम ॥

श्रीभगवानुवाच—

आधेयमञ्जसंभूत [2]स्वेऽविकारे स्वरूपिणि ।
[3]स्वयमाद्यन्तयोरु (?रु) द्वं सूत्रे [4]मणिगणा यथा* ॥२॥

प्रागाधारात्मना चैव विश्वाकारतया ततः ।
नानामन्त्रात्मना ह्यूर्ध्वे निस्तरङ्गो हि तत्त्वतः ॥३॥

अभ्यस्तवासनानां च कर्मिणां कर्मशान्तये ।
तदिच्छाविष्कृतानां च भोगकैवल्यसिद्धये ॥४॥

अनाद्यविद्याविद्धानामियत् तेषां हि वस्तुनि ।
नाथोर्ध्वे न त्वदृष्टीनां तत्त्वतो वाऽथ पौष्कर ॥५॥

---

1. 'साधिवंवम्' इति साधु
2. ग–घ–स्वे विकारोर्ध्वंरूपिणि
3. क–ख–सधर्माद्यन्तयोरूद्वम्
4. ग–घ–मणिगणो यथा
* cf गीता···७.७

[1]न तिर्यग्ब्रह्मपूर्वे च न हेयादिविकल्पना।
या विशेषविकल्पैस्तु प्रत्यस्तमितलक्षणा ॥६॥

शक्तिर्भगवतो विष्णोः साधाराख्याऽभिधीयते।
प्राग्वदासनसामर्थ्यं बीजमादाय चेच्छया ॥७॥

अव्यक्तव्यक्तरूपा च यथाऽऽदित्यकदम्बकम्।
भाविप्रसरधर्मत्वाद्विश्वबीजचयस्य च ॥८॥

[2]साम्प्रतं संभृताङ्गस्य कूर्मसंज्ञाऽभीधीयते।
यो विश्वं निर्दहत्यन्ते कालवैश्वानरात्मना ॥९॥

दैवतं यस्य भगवान् कूर्मात्मा लोकपूजितः।
अजहद्भगवच्छक्तिः सामर्थ्यं पुनरेव तत् ॥१०॥

अनन्तं सविल्पानां यद्विश्वाङ्कुरमव्ययम्।
नयत्यूर्ध्वं यथा कूर्मो ग्रीवां स्वात्मनि संहृतम् ॥११॥

शेषाख्यं [3]फणिदैवत्यं तदनन्तं हि गीयते।
आश्रयं बीजभूतानां चतुर्णां च महामते ॥१२॥

तद्गन्धविटपस्तस्माद्यक्तिमभ्येति पूर्ववत्।
भूरात्मा भगवान् यस्मिन्नभिमानाख्यदेवता ॥१३॥

---

1. ग–नतिर्यक् वृष्टपूर्वं च
2. क–ख–सांप्रतं प्रहृताङ्गस्य
3. पणिदैवत्यम्

फलं रसात्मकं तस्माद्व्यज्यत्यमृतलक्षणम् ।
यस्याभिमानिकं रूपं क्षीरार्णवमनश्वरम् ॥१४॥

तस्मादनन्तरत्नोत्थं कान्ति कमलमब्जज ।
व्यक्तं यस्य च वै शक्तिर्नित्या दहनलक्षणा ॥१५॥

तदनन्तदलं विद्धि दिव्यं विकसित सितम् ।
परपूर्वेण भेदेन [1]चक्रद्वित्रिगुणात्मना ॥१६॥

स्थित्वा [2]बुद्धिविकारैस्तैः सह चाष्टाभिरब्जज ।
[3]यत्राथ देवतात्वेन वाग्विकारा मृ (?ऋ) गादयः ॥१७॥

तथा कालविकारा ये चत्वारः कृतपूर्वकाः ।
तत्र रूपं हि सर्वेषां सत्तामात्रपरं स्मृतम् ॥१८॥

[4]व्यक्तिकारणध्यानाभिः साङ्गाभिरपरं तु तत् ।
तृतीयमभिमानाख्यं देवता देहलक्षणम् ॥१९॥

तस्माद्वै वायुदैवत्यं स्पर्शतन्मात्रमेव च ।
जाता यस्य स्फुटा व्यक्तिर्नानाचक्राङ्गलक्षणम् ॥२०॥

तस्मादाकाशदैवत्यं शब्दमुत्पन्नमब्जज ।
सर्वाङ्गसंहता चक्र[5]वृत्तिर्यस्यामलं वपुः ॥२१॥

---

1. ग–घ–चक्रद्वित्रि
2. क-ख–बुद्धिविकारैस्तु
3. ग–घ–यत्राहिदेवतात्वेन वाग्विकारान्मृगापयः
4. क-व्यक्तिकरण···नभिः ख–व्यक्तिकरणधानाभिः
5. ग–घ–चक्रव्यक्तिर्यस्य

गीयते व्योमवृत्तं तत् प्रधानकमलालयम् ।
यस्यान्त (:) स्थानि भूतानि यस्मिन् सर्वं प्रतिष्ठितम् ॥२२॥

तस्मादुन्मेषपूर्वं हि महत्प्रलयपश्चिमम् ।
प्रवर्तते कालतानं भेदकृत् सर्ववस्तुषु ॥२३॥

वाङ्मात्रेणैव भिन्नस्य ह्यभिन्नस्यैव तत्त्वतः ।
ज्ञानादिगुणवृन्दस्य ब्रह्मणश्चतुरात्मनः ॥२४॥

नित्योदितत्वान्नित्यत्वाद्व्यापकत्वात् परं पदम् ।
पूर्णत्वात् षड्गुणत्वाच्च न कालो लब्धगोचरः ॥२५॥

शब्दादादित्यदैवत्यमहङ्कारं महामते ।
[1]मनश्चादित्यदैवत्यमहङ्कारमभूत् ततः ॥२६॥

बुद्धिप्रकाशदैवत्या व्यक्तानन्दात्मनो विभोः ।
दलादिकर्णिकान्ता या सूर्यपूर्वादिकल्पना ॥२७॥

प्रधानकमलस्यैषा मूर्तिर्गुणमयी स्मृता ।
बुद्ध्यादीनां च तत्त्वानां कारणं यदनश्वरम् ॥२८॥

अव्यक्ताख्यं महाबुद्धे ह्यभिन्नगुणमूर्तिभृत् ।
स्वगुणानधरीकृत्य स्वप्रतिष्ठं प्रवर्तते ॥२९॥

अध्यात्मलक्षणा वृत्तिः सर्वाः संहृत्य वै हृदि ।
उत्पद्यन्ते हि चैतस्माद्भावाः सर्वे द्विजोत्तम ॥३०॥

---

1. अनन्त

विपद्यन्तेऽत्र वै भूतास्तस्मात् पद्म परं त्विदम् ।
चिदादित्यकलाजालं ग्राह्यग्राहकलक्षणम् ॥३१॥

संक्रान्तं यत्र स्वं धाम स्वसामर्थ्यं च [1]चेत्यपि ।
विमलाख्या विमलता [2]ज्ञानशक्तिर्ज्ञताब्जज ॥३२॥

प्रभवाख्या प्रभवता सत्यसंज्ञा च सत्यता ।
नित्याख्या नित्यता चैव प्रकाशाख्या प्रकाशता ॥३३॥

अनन्तता ह्यनन्ताख्या कला कमलसंभव ।
सहानुग्रहशक्त्या वै ज्ञेयाऽनुग्रहता परा ॥३४॥

द्विचतुष्कं कलानां यत् स्वप्रतिष्ठं हि वर्तते ।
[3]संवर्तते परं चैव पुनरेव निवर्तने ॥३५॥

परापरविभागेन [4]कलास्त्वेतार्चिता (श्चिदा) त्मनः ।
प्रोक्ताः कमलसंभूत यासामानन्त्यमुत्तमम् ॥३६॥

स्वशक्त्याधिष्ठितं कृत्वा स्वस्वभावस्वभावया ।
ग्राह्यग्राहकरूपाय एवमव्यक्तपुष्करम् ॥३७॥

समास्ते केवलं शुद्धमीषत्काललवं द्विज ।
सामान्येनैव यो भूत्वा सांप्रतं शक्तयः कलाः ॥३८॥

---

1. ग–घ–चैवहि
2. क–ख–ज्ञानशक्त्यब्जता
3. ग–घ–संवर्तनेपरम्
4. क–ख–कलास्त्वेतार्चिता

[1]अस्मितालक्षणं धर्मं स्विकं सम्यङ्गिरस्य च ।
प्रवर्तते तन्निरासादानन्दमतुलं द्विज ॥३९॥

स्वप्रकाशमनौपम्यं तमिच्छेन्मन्त्रमव्ययम् ।
[2]परिच्छेद्या दिगाद्यैस्तु प्रकाशाकाशवर्तिनी ॥४०॥

कृत्वाऽऽश्रित्य कलामूर्तिं समनन्तरमब्जज ।
विहाय मध्यदेशं च प्रकाशगगनात् ततः ॥४१॥

धृतिशक्त्यासने स्वेऽथ उपविश्य यथासुखम् ।
विद्यादेहेन सूक्ष्मेण भूतदेहानुकारिणा ॥४२॥

अथानन्दकदम्बं तद्यत् स्वरूपं पृथक्कृतम् ।
रञ्जयेच्छास्त्रदृष्टेन व्यवहारं गतेन च ॥४३॥

स्वकेनालम्बनेनैव देवतालक्षणेन च ।
[3]ज्ञानानात्? सुस्थितान् पश्येदुदितान् [4]सुहृदादिषु ॥४४॥

लाञ्छनाभरणादीनि यथा न्यस्यानि विग्रहे ।
[5]स्वस्थानेष्वथ वै तस्मात्स्वदाता हृदादयः ॥४५॥

यथाशास्त्रक्रमेणैव यजेत विधिना ततः ।
एवमासनदाने तु परस्मात्तत्त्वसन्ततिम ॥४६॥

---

1. क-ख–अस्मिन् विलक्षमन्धर्मात्मकम्
2. ग-घ–परिच्छेद्यदिगाद्यैः
3. (घ) ज्ञानानात्
4. ग-घ–खर्हृ्वादिषु
5. ख–स्वस्थानेष्वथिवं

उदितां प्रलयं कुर्यात् करणे तदधिष्ठिते।
निवृत्ते पुरुषार्थे तु चान्तर्वा बहिरब्जज ॥४७॥

क्रमान्मन्त्रगणं स्मृत्वा यातं मन्त्रेश्वरे लयम्।
मन्त्रशक्तिं स्वसङ्कल्पशक्त्या वाऽथ शमं नयेत् ॥४८॥

सह सङ्कल्पशक्त्या वै विद्यामूर्तिं स्वकां ततः।
स्वकल्पसु लयीकुर्यात् कलाजालं तथाऽऽत्मनि ॥४९॥

प्राग्वदानन्दसन्दोहपरिपुष्टस्तु जायते।
सृष्टिक्रमेण संहृत्य त्वाधारं यत् पुरोदितम् ॥५०॥

ज्ञानिनां विगलन्त्येषां स्वभावात् तत्त्ववेदिनाम्।
निष्कलानां महाबुद्धे निष्पन्नानां सुकर्मणि ॥५१॥

विकासमेति चान्येषां नित्याकाररतात्मनाम्।
मन्त्रक्रियारतानां च नानात्वेन समात्मनाम् ॥५२॥

धृतमच्युतशक्त्या वै ह्यपरि[1]च्युतसत्तया।
सद्विकल्पस्वरूपं च विश्वासनमिदं द्विज ॥५३॥

विधृतं विभुना व्याप्तं स्वसामर्थ्येन यद्यपि।
तत्रापि तच्छरीराणां जीवानां तन्निवासनम् ॥५४॥

स्वशक्त्याऽनुगृहीतानां तमाक्रम्य महामते।
नानामन्त्रात्मना त्वास्ते तस्मिन् नानाविधात्मनि ॥५५॥

---

1. क–ख–च्युतशक्तया

संपूर्यमवि (?हि) ताना वै व्रजत्यर्चार्थ (?र्थं) सिद्धये ।
कर्मणा स्वल्पबुद्धीनां [1]स्वरूपं न जहाति वै ॥५६॥

व्रह[2]यज्ञोत्पलाद्यस्तु [3]दनावृन्दन्तु पौष्कर ।
प्रभवज्ञोपलाद्यद्वि... ... ... ॥५७॥

अनुग्रहपरो मन्त्रस्त्वेवमब्जज चाच्युतः ।
निजयत्स्वमहत्सत्तां (?नियमात्स्वामजहत्सत्तां) ज्ञानादिगुणलक्षणाम् ॥५८॥

निश्रेयसपदप्राप्तिपर्यन्तं कालवर्तिनाम् ।
विनियोगावसाने तु तेऽपि चायान्ति वै सह ॥५९॥

विलयं वासुवे (?देवे वै) तेषां क्रीडार्थमेव च ।
समारोप्य स्वविज्ञानमन्येषां भवशान्तये ॥६०॥

एवं परा मन्त्रिविभो? स तु सर्वेश्वरस्य च ।
स्थिता कमलसंभूत भूतयोनिविमुक्तये ॥६१॥

पौष्कर उवाच—

निष्क्रियस्य विभोर्नाथ त्वच्युत [4]स्याव्ययात्मनः ।
कथं मन्त्रात्मभावेन विविक्तमुपपद्यते ॥६२॥

---

1. ग–प्र–स्वरूपं तं जहाति
2. ग–घ–प्रहयज्ञोपलाद्यस्तु
3. ग–तनावन्दं तु घ–दन्विवृन्दं तु
4. क–ख–स्याप्ययथात्मनः

श्रीभगवानुवाच—

तृणानां हि यथाऽऽदाने [1]नारीश्चा (?च) सं? प्रवर्तते।
स्वशक्तिः पुष्यरागस्य [2]मणेर्विकसनेऽपि च ॥६३॥

तद्वद्भगवतो विष्णोः परस्य परमात्मनः।
प्रवर्तते शक्तिचयो यस्य मन्त्रस्य गं (?स्वं) वपुः। ॥६४॥

कर्मात्मकत्वाद्यादाय पुनरेव निवर्तते।
साऽच्युताख्या महाशक्तिः शान्तसंविन्मया पुरा ॥६५॥

एवं कर्मात्मतत्त्वस्य विद्यासंपालितस्य च।
स्थितिः संप्रतिबुद्धस्य [3]इन्द्रियार्थासु शक्तिषु ॥६६॥

यथा ह्यनिल [4]पूर्णानां वृतौ स्थित्वा सुशिक्षितः।
प्रतरत्यतिसंक्षिस्था (?तो) नष्टम (?सं) व्याकुलेन्द्रियः ॥६७॥

सत्त्वशिक्षितबुद्धेर्वै व्यक्षुब्धे (?ब्धें) हसि पौष्कर।
वर्तते त्वधरीकृत्य व्यूर्ध्वे त्वाकुलचेतसः ॥६८॥

[5]एवं संप्रतिबृद्धस्तु (?स्य) शक्तयश्चेन्द्रि [6]यान्तराः।
भावमन्त्रक्रियाणां च समर्था न्यक्करोति च ॥६९॥

---

1. घ—नारीश्चसंप्र
2. ग-घ—मर्णिविकर्षणेपि च
3. क—ख—इन्द्रियासु च
4. अनिलपूर्णायां वृतौ इति साधु
5. क—ख—स एवं प्रति
6. ग—घ—श्चेन्द्रियान्तरः

शुद्धसंविन्मयश्चास्ते निस्तरङ्गसमुद्रवत् ।
आमूढत्वाद्विजा (?दा) नन्दपरिस्पन्दं स्वकं पुनः ॥७०॥

शक्तिभिस्तु समारोप्य वेधवेदकतां भजेत् ।
इत्येवमुत्तमाधारस्वरूपं हि धरास्थितिः ॥७१॥

[1]जायते तत्परिज्ञानात् कर्मणां कर्मसंक्षयः ।
उदयाव्ययसंस्थानमन्तर्यागत्वदेव च ॥७२॥

नित्यमेवं हि मन्त्राणां (?चरतां) [2]वायुमूर्तिनाम् ।
मध्यदेशं समावृत्य मध्यमार्गेण संविशेत् ॥७३॥

सुव्यक्तो (?क्ते) रन्तरीभूतमात्मानं खे पुरोदितम् ।
ध्रियेभृतविधि (?धृति) यावदेतद्वै शासनं पुरा ॥७४॥

बहिस्तदनु सा वृत्तिर्भिदानां यजनाय च ।
... ... ॥७५॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
आधारासनलक्षणो नाम
द्वाविंशोऽध्यायः

*

---

1. क–ख–ज्ञायमेतत्परिज्ञानात्
2. क–ख–चपनोवायु ग–च ऋतेवायु घ–चरतोवायु

अथ त्रयोविंशोऽध्यायः

श्रीभगवानुवाच—

एवमाधारसंस्थानं कृत्वा तदनु विन्यसेत् ।
आकजक्षेत्रदेशाद्वै यावद्द्वारावनि क्रमात् ॥१॥

[1]आधेयाधारकत्वेन तदधिष्ठातृदेवता ।
अपेक्षाप्राग्वशेनैव दिग्विदिक्षु यथाक्रमम् ॥२॥

ऐश्वरं पौरुषं प्राच्यां प्राजापत्यं तृतीयकम् ।
तत्राद्यमपवर्गादिसाधने [2]कर्मिणां हितम् ॥३॥

तत्सिद्धिसाधनत्वेन सर्वेषां चाक्रं स्मृतम् ।
प्रयाति चाङ्गभावं तु मन्त्रिणामप्यमन्त्रिणाम् ॥४॥

प्रसिद्धं सिद्धकामानां तृतीयममलेक्षण ।
स्वबुद्धिशक्त्या ह्यागसिद्धये उक्तमब्जज ॥५॥

स्वमन्त्रं व्यक्ततां नीतं यत्तत्वे नित्यसंमुखम् ।
भूतसामर्थ्यमूर्तेर्वै चित्तेः सकरणस्य च ॥६॥

वस्तुत्वेन फलत्याशु त्वसमाम्मात्रवेदिनः? ।
भक्तिश्रद्धावशेनैव सन्निरुद्धो [3]भवानि यत् ॥७॥

---

1. ग-घ—आर्याचारकत्वेन
2. ग-घ—कर्मणाम्
3. ग-घ—भवादिवत्

एवं मन्त्रार्क [1]दग्ग्रश्मिजालेनाभासितं हि यत्।
ततः संकल्पमाद्यं हि नित्यनिश्चयचेतसाम् ॥८॥

मन्त्रैकशरणानां तु [2]बहिरप्यर्चने हितम्।
अन्तर्वा बहिरब्जोत्थ आ (?मा) धारादिगुदक् स्थितम् ॥९॥

निपतत्यंशुजालं च यत्र तत् पौरुषं स्मृतम्।
भगवान् [3]भूतभावानामात्मदैवत्ययाजिनाम् ॥१०॥

गुणा [4]बहुभिदश्चाशु बहिरन्तर्यथैश्वरम्।
यन्निश्चयीकृतं पूर्वं तत्प्रसिद्धिवशात्त्वपि ॥११॥

सुप्रसिद्धं च तद्वृत्ति तृतीयं हि महामते।
रुचिदिग्वीक्षमाणानामेकद्वारादिकात्मनाम् ॥१२॥

देवतायतनानां च नमतानां महामते।
शेषादिशयनानां च भूपादीनां निवेशने ॥१३॥

धर्मादिलक्षणे कार्या तद्वशादासनी स्थितिः।
इन्द्रादि लोकपालानां यज्ञादीनां तथैव च ॥१४॥

प्रयोजनवशेनैव मन्दमध्यपरायणैः।
कलशस्थं च कुण्डस्थं यन्त्रस्याराधनस्य च ॥१५॥

---

1. क–ख–दृग्वह्निज्वालेन
2. ग–घ–बहिरभ्यच्यते
3. ग–घ–भावभूतानां
4. ग–घ–गुणावहि तिहाच्चाशु

एवमेवमनुष्ठेयं लोकेशानस्य पूजनम् ।
वनेऽत्र गहने विप्र सद्भूधरगुहान्तरे ॥१६॥

भूगृहे बलिभूमौ वा लोकधर्मरतात्मनाम् ।
लोके शासन [1]शास्त्रार्थं मन्त्राणां संस्थितिं सदा ॥१७॥

[2]सममन्त्रस्य दृष्टया वै कार्या कमलसंभव ।
अतत्व (ज्ञ) वद [3]ब्जोत्थ मन्त्रतत्त्वज्ञमाचरेत् ॥१८॥

नगरायतनादीनां सुस्थिराणां च सर्वदिक् ।
एवं ज्ञात्वा पुरा सम्यग्दिग्विदिङ्नियमं तथा ॥१९॥

सुयोग्यतावशेनैव [4]स्वस्यान्तष्करणाय च ।
समाचरेत् ततो न्यायं (?सं) मण्डलानां यथा शृणु ॥२०॥

सदैव शक्तिभावेन सद्रूपात्मनि वर्तते ।
स्थूलसूक्ष्मद्वयं विप्र त्वेवं सत्वात्मना सह ॥२१॥

व्यक्तिशक्तिसमूहं तु सूक्ष्मात्मन्यनुवर्तते ।
सत्ताख्येन [5]स्वरूपेण संयुक्ता सूक्ष्मदेहिनाम् ॥२२॥

---

1. क–ख–शास्त्राख्य
2. ग–घ–सद्यमन्त्रस्य
3. क-ख–दब्जार्य
4. क–ख–स्वस्यान्त्यकरणाय च
5. क–स्वरूपेण···

[1]स्थूलात्मन्यब्जसम्भूत संस्थिता सर्वदैव हि।
ऊर्ध्वेऽत्र विहितो बाऽपि बहिरन्तर्व्यपेक्षया ॥२३॥

पद्मावनिसमीपे तु पक्षन्यासो विधीयते।
द्विधा सत्तात्मकं रूपं रूपं सर्वस्य (?वंस) देवहि ॥२४॥

समीपे यागभूमौ तु विहिता न्यासकर्मणि।
बृहद्रूपं (?पा) तु सर्वेषामन्योन्यारागता द्विधा ॥२५॥

मण्डलीयेषु पीठेषु यस्मादब्जसमुद्भव।
बाद (?पा) गात्रकबिंबानां द्विविधा वर्तते स्थितिः ॥२६॥

स्त्रेनोपदान्वितस्पष्टा? सुस्पष्टाऽन्या च केवला।
एवं ज्ञात्वा पुरा सम्यग् यथावदमलेक्षण ॥२७॥

पूर्ववन्मण्डलानां तु पर्यन्तन्यासमाचरेत्।
सर्वदा सर्वयागानां दलाद्व्योमदलान्तरे ॥२८॥

शब्दे प्रकाशमात्रं तु स्वदैवत्यं न्यसेद्ध्रुवम्।
व्योमबाह्ये त्वपीठानामग्निकोणादितो न्यसेत् ॥२९॥

[2]युगस्वभावमूर्ति च धर्माद्यं हि चतुष्टयम्।
तन्निविष्टं तथा भूतं [3]तद्व्यत्ययगुणं हि यत् ॥३०॥

---

1. क–ख–"स्थूलात्मनि" इत्यादि "दैवत्यं न्यसेद्ध्रुवम्" इत्यन्तं सार्धं श्लोकषट्कं गलितम्
2. ग-घ–ज्ञानस्वभाव
3. ग-घ–तद्व्यत्ययगणम्

[1]सह ऋक्पूर्वसामान्यं कालभेदेन चान्वितम् ।
ततो देशे सपीठानां [2]तदुद्देशं तथैव च ॥३१॥

तदै (?वै) व [3]शब्दाकाशं तु चतुर्था (?धा) त्वेव ए(?मे)व हि ।
शरदिन्दुकलासारकान्तिभूतं तु विन्यसेत् ॥३२॥

पीठानामष्टबिम्बानां प्रादक्षिण्येन योजयेत् ।
आग्नेयादौ [4]चतुष्कार्ये ईशकोणावसानकम् ॥३३॥

धर्मज्ञानं च वैराग्यमैश्वर्यं कमलोद्भव ।
प्रागादावुत्तरान्तं तु त्वधर्ममलेक्षण ॥३४॥

[5]अज्ञानं च त्ववैराग्यमनैश्वर्यमनन्तरम् ।
चतुष्खण्डे तु वै पीठे केवले पूर्ववन्न्यसेत् ॥३५॥

[6]धर्माद्यैश्वर्यमूलं तु यथोद्दिष्टक्रमेण तु ।
बाह्यतश्चोपपीठे तु व्योमभावो (?बाह्यो) पलक्षणैः ॥३६॥

चतुष्टयभ्रमाद्यं तु [7]पादन्यासादनन्तरम् ।
पीठानामेकबिम्बोत्थं गात्राणां कमलोद्भव ॥३७॥

---

1. ग-घ-सहान्यत्पूर्वं
2. ग-घ-तदुद्देशे
3. ग-घ-शब्दकोशं तु
4. ग-घ-चतुष्कं तु
5. क-ख-अज्ञानं च अवैराग्य
6. ग-घ-धर्माद्यैश्वर्यनिष्कं तु
7. क-ख-पादा⋯दनन्तरं

द्विबिम्बचरणानां तु तत्र चाभ्यन्तरे क्रमात् ।
व्यत्ययैः सहधर्माद्यैः प्राग्वद्वेद्यास्ततो बहिः ॥३८॥

[1]गात्रकेषु कृताद्याश्च चत्वारश्च यथाक्रमम् ।
साङ्घ्रिणा गात्रकाणां तु बिम्बमध्यात् तदात्मनाम् ॥३९॥

पूर्वापराभ्यां बिम्बाभ्यामाग्नेये तदनु न्यसेत् ।
परापरविभागेन धर्मस्तत्रैव तद्बहिः ॥४०॥

दक्षिणोत्तरभागाभ्यामैश्वर्यं [2]द्विज शक्तिदम् ।
उदग्दक्षिणयोस्तत्र ह्यधर्माख्यं च रूपभृत् ॥४१॥

प्राचीपूर्वापराभ्यां तु [3]अधर्मं च द्विरात्मवत् ।
[4]युगं हि कृतनामाख्यमात्मना (?नो) दक्षिणोत्तरे ॥४२॥

याम्ये प्राक् पश्चिमे त्रेता ह्यज्ञानं दक्षिणोत्तरे ।
वारुणे त्वप्यवैराग्यं द्विधा प्राक्पश्चिमे न्यसेत् ॥४३॥

सोत्तरे दक्षिणे भागे द्वापरं विनिवेश्य च ।
उत्तरे तु ह्यनैश्वर्यं [5]दिग्द्वये दक्षिणादितः ॥४४॥

बिम्बद्वये तु प्रागाद्यैर्वि[6]धान्यकलिकं ततः ।
त्रिबिम्बचरणे पीठे पद्मबिम्बे तु गात्रके ॥४५॥

---

1. क–ख–गात्रक्षेषु
2. क–ख–त्विचर्शावित
3. क–ख–भ्यां तु···
4. ···नामाख्य
5. ग–घ–दिश्वये
6. क–ख–विधानकलिकम्

अभ्यन्तरेषु पादानां धर्मास्तद्बहिरस्य च।
सूक्ष्म (लक्षणरूपाश्च) साधारास्तु कृतादयः ॥४६॥

गात्रकेषु त्वधर्माद्या न्यस्तव्या मूर्तिलक्षणाः।
अथैकबिम्बपीठाग्रे पञ्चबिम्बे तु गात्रकम् ॥४७॥

यथा तदनु सार्धेन एकाग्रमवधारय।
स्वक्षेत्रेषु च धर्माद्या न्यस्तव्या व्यक्तलक्षणाः ॥४८॥

मध्यतो गात्रबिम्बानामधर्माद्यास्तथाविधाः।
तस्य सव्यापसव्याभ्यां बिम्बाभ्यां कमलोद्भव ॥४९॥

एक एव द्विधा चैव ऋग्वेदं सूक्ष्मलक्षणम्।
ततः सत्तास्वरूपं तु कृतं तदुपपक्षयोः ॥५०॥

एवं दक्षिणदिग्भागे [1]यजुस्त्रेतायुगान्वितम्।
प्रत्यक् प्राग्द्वापरं ह्युदक् [2]त्वथर्वा(?त्रे)युगनी (?वान्) कलिः ॥५१॥

द्विबिम्बचरणानां तु पीठानां कमलोद्भव।
द्विबिम्बगात्रकाणां तु विन्यासमथ मे शृणु ॥५२॥

मन्त्र (?ध्य) बिम्बेषु पादानामग्ने [3]रीशपदावधि।
परस्वरूपा धर्माद्या [4]बहुस्थूला कृतादयः ॥५३॥

---

1. क–ख–ग–घ–यजुस्त्रेता
2. क–ग–साथर्वयुगः कलिः
3. क–ख–मग्नेः श्रीश
4. क-ख–बहु···ला

मध्ये (?ध्य) बिम्बेषु गात्राणां धर्माद्या परमात्मकाः ।
तत्पक्षयोस्तु साकाराः श्रुतिसञ्ज्ञा द्विधा द्विधा ॥५४॥

द्विबिम्बचरणे पीठे तदन्यत् पञ्चबिम्बके ।
[1]परस्थली (स्थूल) विभेदेन धर्माद्यास्त्वायतेषु च ॥५५॥

ततोऽधर्मादयः स्थूला मध्यतो गात्रभूमिषु ।
पद्मावनिसमीपे तु मध्यबिम्बस्य पक्षयोः ॥५६॥

सत्तास्वरूपद्वित्वेन न्यसनीया ऋगादयः ।
[2]एवमाकृतिमन्येऽपि बहिः प्राग्वद्द्वयोरपि ॥५७॥

कृतादयस्तु साकारा[3]श्चा (?त्या) त्मना द्व्यात्मना न्यसेत् ।
चतुर्बिम्बेषु पादेषु पीठेष्वेव महामते ॥५८॥

[4]अन्यत्र पञ्चबिम्बेषु न्यासक्रममयोच्यते ।
तत्र धर्मादयस्तावत् परसूक्ष्ममयाः क्रमात् ॥५९॥

सर्वान्तरस्थ (?स्था) तद्बाह्ये प्रत्यग्रे तु पदे पदे ।
ताभ्यां तदनु बाह्यस्थां बिम्बाभ्यां विनिवेश्य च ॥६०॥

[5]स्थूलत्वेन ततो भूयस्तथा रूपा युगास्तथा ।
न्यस्तव्या युग्मयोगेन स्याच्चतुर्णां यथाऽष्टधा ॥६१॥

---

1. ग–घ-परस्थूलोविभेदेन
2. क–ख–एनमाकृतिमन्त्येपि
3. क–ख-द्वामनाच्चात्मना
4. क–ख–अन्यपत्रं च
5. क–ख–'''लस्सोततो

साकारस्तु ह्यधर्मात्मा गात्रकाणां हि मध्यतः।
[1]समं व्यूह्य क (जे) सम्यक् पक्षबिम्बमपि (?धि)
स्थितम् (?तः) ॥६२॥

[2]वा (?न्या) साभाव (?वाद्) द्विधैकैकं पुनरप्यत्र पूर्ववत्।
[3]त्रि प्रकारा द्विधावस्था ऋग्वेदाद्यास्ततो न्यसेत् ॥६३॥

गात्रकेष्वष्टबिम्बेषु चतुर्बिम्बेषु चाश्रिषु।
[4]विन्यासं (तेषु) चाब्जोत्थ (?त्थं) यथा तदवधारय ॥६४॥

आरभ्यान्तरबिम्बाद्यैर्बाह्यबिम्बान्तमङ्घ्रिषु।
परसूक्ष्मविभक्तेन ततो धर्मादयः क्रमात् ॥६५॥

तत्रैव पक्षदेशाभ्यां कृता युग्मयुतो (?तौ) गतः (?ताः)।
मुखसेनाद्यष्टा मूर्तिलक्ष्मणा विनिवेश्य च ॥६६॥

स्थूलभूतस्त्वधर्माद्या गात्रकाणां तु मध्यतः।
पत्रसूक्ष्मात्मना तेषां बिम्बमध्यबहिः स्थिते ॥६७॥

स्थूलात्मा सर्वऋग्वेदमेकं [5]तत्पक्षयोर्द्विधा।
पुनः सूक्ष्मात्मना चैव न्यसेत्तदुपपक्षयोः ॥६८॥

---

1. ग–घ–समं व्यूहकासम्यक् पक्षबिंबमाधिस्थितः
2. ग–घ–द्वाह् वभाव
3. क–ख–त्रि ... काराद्विधाव्यवस्था ...वेद्यास्ततो
4. क–ख–विन्यासं ... चाब्ज ... यथा
5. क–ख–तच्चक्रयोः

भूत (?ता) स्तद् बाह्यसंस्थाभ्यां [1]पादाभ्यां तत्पदात्मनाम् ।
एष (?तत्) ए (?तदे) व हि तद्विप्र न्यसनीयं प्रयत्नतः ॥६९॥

एवं दक्षिणदिग्भागादुदङ्निष्ठं द्विजोत्तम ।
अथर्ववेदपर्यन्तं यजुर्वेदादिकं न्यसेत् ॥७०॥

[2]दृक्श्रोत्रपाणिपादानां करणानां यथैव हि ।
[3]सत्वैवाकातुश्च? वै (?सत्वग्वागादिकाश्चैव) विश्व (?श्वं) तथैतेषां
द्विते? ततः (?तत्तथैवेषां स्थितिस्ततः) ॥७१॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
आसनदेवतान्यासो नाम
त्रयोविंशोऽध्यायः

*

1. क-ख–पाद्याभ्याम्
2. क–ख–दिक्श्रोत्र
3. सर्वत्र विकृतान्यक्षराणि

अथ चतुर्विंशोऽध्याय:

श्रीभगवानुवाच—

पूर्वापराभ्यां द्वाराभ्यां [1]सुपर्णं सत्यविक्रमम् ।
न्यसेद्वं [2]सर्वे (सं) थानां तत्र [3]पृष्ठगते (?तं) विभोः ॥१॥

ईषत् तद्द्वारमाश्रित्य [4]हेमदण्डं (च) मन्दिरे ।
संमुखं सम्मुखे द्वारि भूगतं विधृताञ्जलिम् ॥२॥

दक्षिणोत्तरभागाभ्यां द्वाराभ्यां कमलोद्भव ।
गदाचक्रे ज्वलद्रूपे विन्यस्ते तत्परायणे ॥३॥

चण्डादीनां पुराष्टानां [5]चतुर्द्वारगतौ स्थितः (?तिः) ।
प्रकाशितावग (?द्यव) स्थानां सेव (?वा) यागेषु भूगताः ॥४॥

क्रमेण तु गतं तेषां [6]शोभाष्टगतमष्टकम् ।
शोभाष्टकयुते यागे वज्रनाभादिकं हि यत् ॥५॥

उपशोभाष्टकार्थानां यागानामथ तद्गतम् ।
न्यस्तत्र्यमष्टकमिदं तृतीयं क्रमशो द्विज ॥६॥

---

1. ग–घ–सुपत्यस्सत्य
2. ग–घ–सर्वथाधानाम्
3. ग–घ–तत्रपृष्ठगतम्
4. क–ख–हेमदण्डं ममाथिरे ग–घ–हेमदण्डममन्दिरे
5. क–ख–द्वारगतो
6. क–ख-शोभाष्टगणमष्टकम्

लोहिताक्षो महावीर्यस्त्वप्रमेयः सुशोभनः।
वीरहा विक्रमो भीमः शतावर्तस्तु चाष्टमः ॥७॥

त्रयोऽपि शोभानुगत [1]मन्यशोभाष्टकं द्विज।
तत्राष्टकमिदं चान्यच्चतुर्थं क्रमशो न्यसेत् ॥८॥

अनिवर्ती महावर्तो [2]नागहा सर्वजित् स्थिरः।
जयन्तो [3]भयकूर्मादि त्वष्टमं कमलोद्भव ॥९॥

उपद्वारेषु यागानामिदं षोडशकं क्रमात्।
प्रदक्षिणेन प्राग्भागाद् द्वौ द्वौ चण्डप्रचण्डवत् ॥१०॥

दृढव्रतो बहुशिरा महाकायो महाबलः।
जितक्रोधो दुराधर्षो महोत्साहस्त्रिविक्रमः ॥११॥

अनिलो दुष्टहार्ऽचिष्मान् [4]सर्वदृग्दुरतिक्रमः।
विषमो गहनो मेघः षोडशैते मयोदिताः ॥१२॥

चतुरश्रेषु यागानां वह्नेरीशपदावधि।
चतुष्टयमिदं विप्र न्यसनीयं यथाक्रमम् ॥१३॥

[5]ऊर्जितश्चामृताङ्गस्तु सर्वाङ्गः सर्वतोमुखः।
कोणानामेकबिम्बानामित्युक्तं कमलेक्षण ॥१४॥

---

1. क–ख–मन्यथोक्ताष्टकम्
2. क–ख–दर्पहा सर्पहा इति स्यात्
3. ग–घ–भयकुम्मानि (भयकुन्मानि)
4. क–ख–सर्पविग्दुर
5. क–ख–ऊर्जितश्च भृशाङ्गस्तु

[1]द्विबिम्बानां सदुद्देशात् तत्पादान्तं बहिः पुनः।
चतुष्टयं योजनीयं न्यासकाले द्विजं महत् (?द्विजोत्तम) ॥१५॥

शुभाङ्गो वरदश्चैव वागीशः शब्दविक्रमः।
विद्धि शङ्खविशेषास्ते सूक्ष्मस्थूला यथाक्रमम् ॥१६॥

इदमुक्तं यदुद्दिष्टं मण्डलानां पुरा मया।
आधारदेवताव्यूहं पीठामरगणान्वितम् ॥१७॥

द्वारेशानुगते (?तो) सार्धं (?र्धम) श्रीणा (?र्णां) नाथ गणं हि यत्।
सर्वेषामर्चनं[2] विप्रा (?प्र) दाराध्या (?विदध्याद्) हृदयान्वितः ॥१८॥

स्वसंज्ञाप्रणवोपेता नमस्कारपदानुगाः।
या [3]पनस्थूलसूक्ष्माख्या युक्ताऽन्येषां पदेन तु ॥१९॥

आत्मनेतिपदोपेताः स्वाहान्ता होमकर्मणि।
चित्तसम्प्रतिपत्त्यर्थं [4]मा (?र्थंसा) राधारादथाब्जज ॥२०॥

यथाक्रमेण सर्वेषां [5]ध्यानमार्गक्रियामलम्।
[6]शान्त मुज्झिततच्छेदं स्थितमन्तर्मुखं स्थितम् ॥२१॥

---

1. क–ख–इदमर्धं लुप्तम्
2. ग–घ–विप्रवाराध्या
3. क–ख–या पुरः स्थूल
4. घ-माधारा ··दथाब्जज
5. ग–घ–ध्यानक्रणियामलम्
6. क–ख···मुज्झितत ग–घ शान्तमुज्झिततच्छिष्टम्

आधेयोल्लिखिताकारमाधाराख्यं स्मरेत् प्रभुम् ।
कूर्ममुद्रान्वितं कूर्मवक्त्रं निष्टप्तरुक्मभम् ॥२२॥

शङ्खपद्मधरं कूर्मं स्वस्तिकेन स्थितं स्मरेत् ।
मुञ्चन्तमनिशं तेजो देहाद्भीषणमुत्कटम् ॥२३॥

तिर्यगूर्ध्वं तदाधारं [1]ज्वलामालमिवोज्ज्वलम् ।
अनन्तशशिसङ्काशमनन्तमथ संस्मरेत् ॥२४॥

सहस्रफणमालाढ्यं सहस्रफणभूषितम् ।
स्वपाणिसंपुटेनैव शोभवत् स्वाङ्ग[2]भूषितम् ॥२५।

सितरविन्दशङ्खाक्षसूत्र [3]चक्रकरान्वितम् ।
[4]पतनाशङ्कबुद्धेर्वै वित्रस्तमनसस्तु च ॥२६॥

मा भैरित्य[5]भयं यच्छन्मात्रब्रह्मभुवनस्य च ।
[6]निश्शेषरक्तहेमाभां [7]प्रावृट्श्रियमिवोज्ज्वलाम् ॥२७॥

पद्मासनेनोपविष्टां ध्यायेद्बद्धाञ्जलिं धराम् ।
फुल्लकुन्दावदातं च सितस्निग्धजटाधरम् ॥२८॥

---
